गादाधर्यां व्ववयपवटिप्पनी

१५२३

८३

ॐ श्रीगणेशाय नमः ॥ अनुमानं निरूप्य न्यायतदवयवान्निरूपयितुं प्रतिजानीते मूले तच्चेति। तत्र निरुक्ता-
नुमाने परार्थे विचारदशायां मध्यस्थस्य विवादविषयसाध्यनिश्चयरूपप्रयोजनसाधनं न्यायसाध्यमिति न्याय-
यप्रयोज्यमित्यर्थः वादिप्रयुक्तन्यायजन्यशाब्दबोधेन मध्यस्थस्य चरमकारणलिंगपरामर्शरूपानुमानजन-
नादिति भावः ज्ञायमानलिंगस्यानुमानत्वे तु विशेषणस्य परामर्शस्य न्यायाधीनत्वेन तद्विशिष्टस्य तथात्वमि-
त्यवधेयं अथवानुमानमनुमितिः परार्थे मध्यस्थस्य साध्यसंशयनिवृत्तिरूपप्रयोजनसाधनं परस्य प्रतिवादि-
नोऽर्थो निवृत्तिर्निर्णयस्यात् तादृशशाब्दमिति वा एतेन निर्णयप्रयोजनसाधनं परस्य प्रतिवादिनोऽर्थो निवृत्तिर्निर्णयस्या-
नुपदर्शितं न्यायप्रयोगद्वारा मध्यस्थस्यानुमितेरेव न्यायेतानप्रयोजनत्वात् कारणप्रयोजकसंबंधकथने
न प्रसंगो वा संगतिरपि दर्शिता समस्तरूपेति पक्षसत्त्वादिपंचरूपेत्यर्थः उपनयनेन पक्षसत्त्वस्य उदाह-
रणेन व्याप्तिघटकसपक्षसत्त्वविपक्षासत्त्वयोर्निगमनेन चाबाधितत्वासत्प्रतिपक्षितत्वयोः प्रतिपादनाल्ल-
क्षणसमन्वयः अत्रैवेति समस्तरूपोपपन्नलिंगमित्यत्रैवेत्यर्थः अतिव्याप्तेरिति इदमुपलक्षणं उदा-
हरणादित्रिकस्यापि न्यायत्वापत्तिरिति द्रष्टव्यं अनुमिनोतीति अनुमितिचरमकारणं यो लिंगपरामर्शः व्याप्ति-
प्रकारेण पक्षे यल्लिंगज्ञानं तत्प्रयोजकं यत् शाब्दज्ञानं तज्जनकवाक्यमित्यर्थः अत्र च प्रयोजकत्वं प्रति-
ज्ञादिसकलावयवजन्यमहावाक्यार्थबोधस्य तावत्पदार्थगोचरसमूहालंबनबोधस्य वा परिचायकमत्रै-
तत्परामर्शप्रयोजकत्वेन शाब्दज्ञानस्य लक्षणघटकता किंतु तावदर्थविषयकबोधत्वेनैव अतो धूमवा-
पर्वत इत्यादिवाक्यमात्रजन्यायाश्च अपि बुद्धेरुपनायकज्ञानादिविधया मानसपरामर्शप्रयोजकतया तत्रा-
तिव्याप्तिरिति निरस्तं तादृशप्रायत्किंचिद्वाक्यार्थबोधं प्रति शाब्दधर्मप्रकारकज्ञानत्वेन शाब्दज्ञानस्य कारणता

गदा. ३

तत्रत्वच्छेदकप्रविष्टयत्किंचिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वपर्यवसितस्यविवक्षित-
त्वात्तस्माकं न्यायैकदेशोतिव्याप्तिः तादृशधर्मस्य प्रतिज्ञादीनामानुपूर्वीविशेषापवपर्वतो वह्निमानित्या-
द्याकारकबोधे पर्वतो वह्निमान्पर्वतो दहनवानित्याकारकविविधानुपूर्वीप्रकारकज्ञानामेव हेतुत्वतया
तथाविधैकैकानुपूर्वीघटितवाक्यपंचकस्यन्यायत्वानुपपत्तिरतो यत्किंचिच्छाब्दबोधनिवेशः समाना-
नुपूर्वीकनानावाक्यविषयतानामेवानुगतरूपेणैककारणतया समवच्छेदकत्वात्पर्वतो वह्निमानित्या-
द्यैकैकवाक्यव्यक्तिघटितवाक्यपंचकवृत्तिसमुदायत्वस्य न तादृशकारणतावच्छेदकविषयताश्रयव-
र्णत्वव्यापकत्वमिति यत्किंचिज्ज्ञानीयविषयतानिवेशः नच वाक्यांतरसाधारणसमुदायत्वमादाय वा-
क्यांतरघटितसमुदायेतिव्याप्तिरितिवाच्यं तादृशसमुदायत्वमादाय वाक्यांतरघटितसमुदायेतिव्या-
प्त्यानिष्टत्वान्न वृत्तितानिरूपकत्वेन निरुक्तसमुदायत्वस्य विवक्षणीयत्वात् नचैवमपि व्युत्क्रमप्र-
युक्तप्रतिज्ञादिसमुदायेतिव्याप्तिरितिवाच्यं स्वाश्रयीभूतयत्किंचित्प्रतिज्ञाद्यव्यवहितोत्तरत्वहे-
त्वादिवृत्तियत्तत्तद्रूपत्वस्य समुदायत्वे विशेषणान्न दोष इति मंतव्यमिति दिक् न्यायजन्यबोधस्य प-
रामर्शप्रयोजकतां संगमयति ज्ञादीनि एकवाक्यतयेति विशेषणे हीनता तथा चैकवाक्यतापन्नैरि-
त्यर्थः एकवाक्यत्वं च विशिष्टैकार्थप्रतिपादकत्वं तच्च स्वव्याप्याकांक्षानिवर्तकत्वतन्निवर्तनीयाकांक्षा-
व्यापकत्वान्यतरवत्त्वं वा तेन पंचवाक्यजन्यमहावाक्यार्थबोधासंभवेपि न क्षतिः स्वार्थविशिष्टज्ञाने
नत्र द्वाक्यार्थविषयकज्ञानं तच्च समूहालंबनमन्यथा वेत्यन्यदेतत् विशिष्टवैशिष्ट्यावगाहिमानांतरं विशि-
ष्टवैशिष्ट्यबोधात्मकपरामर्शजनकं मनः अस्याप्येतस्वात्मकसहकारित्वं पन्थीक्रियते तेन तथावि-

धेन मनसा परामर्श उत्पाद्यत इत्युपाध्यायः अत एव ज्ञानं परामर्शरूपमुपनयार्थविषयकत्वादित्या
हुः येोपनयस्य व्याप्त्यंशे न तात्पर्यं तत्र व्याप्तिन्यायजन्यबुद्धौ उदाहरणार्थेन याउपनयार्थे तथा च व्याप्तिभाने
पौनरुक्त्यं स्यात् किंतु पक्षधर्मत्वमेवोपनयेन विवक्षितं तथा चोदाहरणार्थव्याप्तेरुपनयार्थपक्षधर्मता
यास्त्व विशिष्टावलम्बेव भानमिति न्यायजन्यबोधस्य न व्याप्तिविशिष्टवैशिष्ट्यावगाहिताः व्याप्यः पक्षे वर्तते इ
न चेत्याकांक्षानिवर्तनानुरोधेन वह्निव्याप्यादिमत्पर्वत इत्युपनयवाक्यं प्रयुज्यत इति सम्प्रदायसमाहितवान्
अचेद्विचिंत्यते यदि व्याप्तिविशिष्टपक्षधर्मत्वमेवाकांक्षितं तदा व्याप्तिविशिष्टविषयक एव बोधस्तादृशाकां
क्षानिवर्तयिष्यतीति तथाविधबोध एवोपनयतात्पर्यमावश्यकं न चैवमप्याकांक्षानिवृत्तये वांतरवा
क्यार्थबोधे उपनयाद् व्याप्तिभानं नोपपन्नं उदाहरणादेव तज्ज्ञानात् अवांतरवाक्यार्थधियः परामर
र्शरूपत्वेपि निगमजन्यानुमितित्वादिप्रतिपत्त्ये अनुमितावपि हितत्वाज्ञावत्पर्यंतं तद्रूपत्वेन परामर्शेन त
द्रूस्यापेक्षितेति वाच्यं अवांतरवाक्यार्थबोधे व्याप्तिभावानुरोधेन तदंशे व्याप्त्यंशेप्युपनयतात्पर्यकल्पना
या आवश्यकत्वे महावाक्यार्थबोधे तज्ज्ञाने पि बाधकाभावादिति न्यायजन्यज्ञानस्य वा दिवाक्यजन्यत्वेनाप्रामा
ण्यशंकाकवलितया अनुमितिजननायोग्यतया परामर्शान्तरस्वीकारादि इति मिश्राः न च व्याप्त्यंशे व्या
प्तिविशिष्टवैशिष्ट्यावगाहिज्ञानमेवानुमितिहेतुः न तु व्याप्यत्वाभिमतहेतुमद्भेदज्ञानं तादृशवैशिष्ट्याव
गाहिता च न न्यायजन्यपञ्चावयवैर्नामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात् अतो व्याप्यत्वावच्छिन्न
हेतुनिष्ठप्रकारताकबोधहेतुविशेष्यकव्याप्तिरूपविशेषणतावच्छेदकप्रकारकमानसज्ञानात्मानस्त
एव तादृशपरामर्शावश्यमंगीकर्तव्य इत्यभिप्रायेण तेन चेत्यभिहितं वैशिष्ट्यावगाहिमानान्तरं विशिष्टवैशि

गदा० अ०

2

ष्यबोधजनकं विशेषणतावच्छेदकीभूतव्याप्तिप्रकारकं धूमत्वावच्छिन्नविशेष्यकं ज्ञानं उपनयेन जन्य
ते तेन तादृशविशेषणतावच्छेदकप्रकारकज्ञानेन परामर्शो जन्यत इत्यर्थः न चैवं तेन परामर्शस्य जनना
दिति ग्रन्थासंगतिः तत्परामर्शपदस्य व्याप्त्यभिन्नहेतुमत्पक्षभिन्नबोधपरत्वादित्याशयात् उद्देश्यतावच्छेद
कावच्छिन्नविषयत्वधर्मत्वावत्वात् तथा च तत्पक्षधर्मत्वबोधमात्रतात्पर्यकं वाक्यमर्थकपदार्थदितिमेवोपनयवा
क्यं प्रकृतमुपनयत्वमिति प्राचीनमताभिप्रायकं ग्रन्थमपरे दीधितिकृतास्तन्मताभिप्रायेणैवोदाहरणोपनययोरेव
तत्त्वं स्यादित्यत्रोदाहरणानभावेनैव परामर्शप्रयोजकत्वपर्यवसानप्रसंगात् उपनयमात्रस्यैवेति वदन्ति अ
त्र परामर्शप्रयोजकत्वेन शाब्दज्ञानस्य वक्ष्यमाणपञ्चकत्वे स्वयमनुपपत्तेर्वक्ष्यमाणतया शाब्दज्ञानपरं
प्रतिज्ञादिप्रतिपाद्यतनाद्विशिष्टार्थज्ञानपञ्चकपरं जनकवाक्यपदं च प्रत्येकं तज्जबोधजनकवाक्यपञ्च
कपरं अतः प्रतिज्ञादिवाक्यपञ्चकलाभः प्रयोजकीभूतं च बोधविशेषाणां परिचायकमात्रं यद्यप्येवं प्रतिज्ञादि
पञ्चवाक्यैरेकज्ञानाजननेप्येतादृशलक्षणानिर्वाहविरहः तथापि प्रतिज्ञादिजन्यबोधानां परामर्शप्रयो
जकतालाभोयं एवं संभवाभिप्रायेण तावदर्थविषयकमेव ज्ञानं परामर्शप्रयोजकत्वेनाभिहितं इत्यभि
प्रेत्य दीधितिकारः पर्यवसितन्यायलक्षणमाह ॰ उचितेति उचितानि पूर्वीकानि प्रतिज्ञादीनि पञ्च यत्र
समुदाये तत्त्वं तादृशपञ्चपर्याप्तसमुदायत्वमिति यावत् पञ्चपदं निगमनादावतिव्याप्तिनिवेशलाभाय
न तु पञ्चत्वेनापि तेषां निवेशः प्रयोजनाभावात् उत्क्रमप्रक्षेपे प्रतिज्ञादिपञ्चकेऽव्याप्तिवारणाय उ
चितानुपूर्वीकेति उचितानुपूर्वी प्रतिज्ञानन्तरं हेतुस्तदनन्तरोदाहरणं तदनन्तरोपनयस्तदनन्तरनिगमनत्वरूपा तत्र किमिदमु
चितानुपूर्वीकत्वं न तावत्तादृशानुपूर्व्याश्रयत्वं दर्शितानुपूर्व्या निगमनपदवैयर्थ्यात् नापि तादृशानुपूर्वी

घटकत्वं घटकताया दुर्निर्वचत्वात्। तद्भिन्नस्वाविषयकप्रतीत्यविषयतादृशानुपूर्वीकत्वं प्रतिज्ञाघ-
विषयकप्रतीत्याश्च इत्यनिगमनत्वस्याविषयीकरणाद्विशिष्टनिगमनत्वे तादृशप्रतीत्यविषयत्वानुपपत्तिः
विशिष्टवृत्तेर्विशिष्टानुयोगिकाभावानभ्युपगमात्। नापि तादृशानुपूर्वीविषयिताव्यापकविषयिताकत्वं-
शाहूव्यक्तिभेदेन प्रतिज्ञादेर्भिन्नतया कस्याश्चिदपि प्रतिज्ञाव्यक्तेर्विषयितायास्तादृशानुपूर्वीविषयितासामा-
न्यव्यापकत्वासम्भवात्। प्रतिज्ञादिव्यक्त्यपरघटितन्यायविषयकज्ञानेपि तादृशानुपूर्वीविषयितासत्त्वात्। य-
त्किंचिदानुपूर्वीविषयिताव्यापकत्वस्य व्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयितायामेव तादृशप्रतिज्ञादिविषयि-
ताव्याप्यत्वात्। न च ज्ञानभेदेन विषयिताभेदानभ्युपगमान्नैवमिति वाच्यं तादृशप्रतिज्ञादिव्यक्तिसामानाधिक-
रणत्वादिनाऽऽनुपूर्वीविशेषावच्छिन्नन्यायविषयकज्ञानीयानुपूर्वीविशेषविषयितायास्तादृशप्रतिज्ञादि-
व्यक्तिविषयिताशून्यावृत्तित्वान्न स्यात्तद्व्याप्यत्वानपायात्। अथ निगमनपूर्वोदाहरणपूर्वत्वरूपानुपूर्व्याश्र-
यत्वेन प्रतिज्ञायास्तादृशोदाहरणपूर्वत्वे सति प्रतिज्ञोन्नयत्वादिहेतुपूर्वत्वरूपानुपूर्व्याश्रयत्वेन च हेत्ववयवादीनां-
निवेशान्नानुपपत्तिः। अथवा तादृशैकविधानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वमेव तादृशा-
नुपूर्वीघटकत्वमिति चेत्। एवमप्येकैकन्यायघटकं यत्प्रतिज्ञाद्येकैकवाक्यं तत्समुदायेति प्रसंगो दुर्वार एव-
वेति चेन्नैवं स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियत्समुदायत्वं तदन्यत्वस्य समुदा-
यत्वविशेषणत्वेन तात्पर्यात्। व्युत्क्रमप्रयुक्तप्रतिज्ञादिनिष्ठस्य नानान्यायांतप्रतिज्ञादिपंचनिष्ठस्य च समु-
दायत्वस्य तदन्यत्वाविरहान्नातिप्रसंगः। एवं च घटमानयेत्यादौ वाक्यवृत्तिसमुदायत्ववारणाय प्रतिज्ञादिवृ-
त्तित्वविशेषणमपि सार्थकमित्यवधेयं। प्रतिज्ञादिवृत्तित्वं च प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकधर्मपंचकव्यापक-

गदा॰
अ॰
3

त्वं अतः प्रतिज्ञादिपंचकैकदेशसमुदायेनातिप्रसंगः प्रतिज्ञात्वादेर्व्यासज्यवृत्तितया तदाश्रयैकदेशमात्र-
वृत्तेस्तत्पर्याप्त्यनवच्छेदकत्वात् समुदायत्वं वानेकपर्याप्तो धर्मः तस्य च पर्याप्तिसंबंधेन न्यायपदप्रवृत्ति-
निमित्तत्वान्नैकदेशे न्यायप्रयोगव्यवहार इति विभावनीयं ननु प्रतिज्ञादिलक्षणे न्यायांतर्गतत्वविशे-
षणस्य प्रवेशनीयतया अन्योन्याश्रयप्रसंग इत्यत आह प्रतिज्ञात्वादिकमिति उदासीनवाक्यवारके-
ति न्यायानंतर्गतवाक्यवारणमात्रप्रयोजनकेत्यर्थः एतेन न्यायानंतर्गतप्रतिज्ञादिपंचकस्य उचितानुपू-
र्वीकत्वविरहादेव न्यायत्वाप्रसक्तेर्न्यायघटकप्रतिज्ञादिशरीरे तादृशविशेषणानुपादानेपि न क्षतिरिति
सूचितं क्रमप्रयुक्तं विभिन्नपक्षसाध्यहेतुकप्रतिज्ञादिपंचके अतिव्याप्तिं शंकां निरस्यति साध्यादीनि
तत्साध्यतत्पक्षहेतुकन्यायलक्षणे तत्साध्यतत्पक्षकप्रतिज्ञा तत्साधनके हेतु तत्साध्यसाधनकोदाहरण-
तत्साध्यपक्षसाधनोपनयतत्साध्यसाधनकनिगमनानि निवेशनीयानीत्यर्थः नन्वेवं न्यायपदार्थस्याननु-
गततया न्यायपदस्य नानार्थतापत्तिरित्यत्रेष्टापत्तिमाह व्याप्त्यादेरिवेति व्याप्त्यादिपदार्थस्येवेत्यर्थः सा-
ध्यादेरननुगमात् स्वघटकसाध्यादीनां भिन्नभिन्नरूपेण निवेशनीयत्वात् अननुगमः अनुगतप्रवृत्तिनि-
मित्तविरहः न्यायादेः न्यायादिपदार्थस्यादिपदादवयवादिपरिग्रहः इष्यत एवेति गत्यंतराभावादिति भावः
यथाश्रुतमूलस्वरससिद्धवाक्यपंचकजन्यमहावाक्यार्थबोधमादाय लक्षणसमन्वयं निराचिकीर्षुर्वाक्य-
पंचकस्यैकविशिष्टार्थबोधकतां खंडयति प्रतिज्ञानिगमनयोरिति न कथमप्येकार्थप्रतिपादकत्वमित्यग्रे-
तनेनान्वयः प्रतिज्ञार्थे वह्निमति पर्वते निगमनार्थस्य विशिष्टहेतुज्ञानज्ञाप्यसाध्यवत्त्वस्यान्वयोपगमे सा-
ध्यवत्त्वांशमादाय पौनरुक्त्यप्रसंगात् दंडवान् रक्तदंडवानित्यादाविव विधेयांशेऽधिकावगाहित्वाहृष्टा-

न्वयबोधस्य संभवेपि मुख्यपक्षतावच्छेदकाविशिष्टेप्यबाधितत्वादिविशिष्टसाध्यवत्तावगाहित्वात् प्रतीतेरे
वोपयोगित्वेन साध्यविशिष्टपक्षेतात्पर्यात्साध्यवत्तान्वयबोधस्यानाकांक्षिततया वादितात्पर्याविषयत्वाच्च
यत्तु वह्निविशिष्टपर्वतोद्देश्यकबोधे वह्निमत्युन्नतपर्वतपदोपस्थितिरपेक्षिता नीलोघटः सुन्दरइत्या
दाविव घटोनीलः सुन्दरइत्यादौ नीलान्वितघटाद्यंशोविधेयाभानात् उद्देश्यतावच्छेदकपदस्य उद्देश्यवाचक
पूर्ववृत्तितायाअपेक्षणीयत्वात् तेन तादृशान्वयबोधसंभवः नच मुख्यपर्वतत्वावच्छिन्नएव मुख्यवह्नि
मत्त्वनिगमनोपस्थाप्यविशिष्टवह्निमत्तायाअर्थापत्तिविधेयतयान्वयोपगमे नैकवाक्यत्वं निर्वहतीतिवा
च्यं गुणानांच परार्थत्वादसंबंधः समत्वादिति न्यायेन विधेयतया भासमानतयोः मुख्यवह्निमत्त्वविशिष्ट
वह्निमत्त्वयोरवच्छेदकाभावापन्नविषयिताकत्वरूपसंबंधाभावेनैकवाक्यत्वानिर्वाहात् अतएवविधेय
भेदेसर्वत्र वाक्यभेदः केवलोपनयजन्यबोधेपक्षे साध्यव्याप्यहेतुमत्त्वस्यविधेयत्वेप्युपनयनिगमना
धीनबोधे उद्देश्यपदपूर्वनिर्दिष्टस्यव्याप्यवाचपदार्थस्योद्देश्यतावच्छेदकतायैवभानेन तद्विषयकत्व
निगमनार्थविषयकत्वयोरवच्छेदभावान्न उभयैकवाक्यतेति तत्र तात्पर्यसत्त्वेयोजनयापितादृशबो
धसंभवात् उद्देश्यवाचकपदपूर्वकत्वेन प्रतिसंधानस्यापेक्षणीयतया योजनयैवोपनयेन पक्षेश्रयपदा
र्थे साध्यव्याप्यत्वबोधनात् तात्पर्यसत्त्वेवादिवाक्ये योजनायाः दूषणानर्हत्वात् तज्ज्ञात्पर्यप्रतिपादक
त्वं प्रतिज्ञार्थे वह्निमतिपर्वते उपनयार्थस्य साध्यव्याप्यहेतुमन्यत्वस्याप्रमतादृशहेतुमत्त्वांशश्चादित
तयाविधेयत्वसंभवेपि प्रतिज्ञामितरउपयोगिनः पक्षतावच्छेदकाविशिष्टेहेतुमत्त्वस्याकांक्षितत्वेवोपनयप्रति
पादनाकांक्षितस्य पर्वतापर्वताभेदबोधस्य तात्पर्याविषयत्वात् उदाहरणावयवान्तयोरिति उदाहरण

गदा·
व्यु·
4

वद्धकयोर्यत्तत्पदद्वयादितमगयोरप्यनेकविशिष्टार्थबोधकत्वं तद्वह्निसत्कायत्पदेनमहानसत्वमहान
सान्यत्वादिना उद्देश्यतोपस्थापनात्· तत्पदेनापितद्रूपावच्छिन्नपरामर्शान्महानसेधूमवद्वह्निमच्च
महानसान्यत् धूमवत्वह्निमच्चेतिवाक्यार्थवत्तत्प्रयविषयकसमूहालंबनस्यैवबोधस्योदयात् ।
नचवीप्सयाव्यापकत्वबोधनोद्भूमव्यापकवह्निमानित्याकारकविशिष्टार्थबोधएव तत्रोत्पद्यत इ
तिवाच्यं योयइत्यादेरनन्वितार्थप्रसंगात् नचवह्निसत्कायत्पदस्यैवव्यापकत्वमर्थः सचसाध्यांशेऽन्व
तीतिवाच्यं· नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वात्· व्यापकत्वावच्छिन्नस्यतदर्थस्याभेदेनान्वय
इत्यपिनसंभवति· स्तंदरोदंडीत्यादौदंडाद्यंशेस्तंदरादेर्भेदान्वयवत्समानविभक्तिकत्वाभावेनमत्व
र्थीयप्रकृत्यस्योपस्थाप्येऽर्थेऽसमस्तनामार्थाभेदान्वयस्यासंभवात् अभेदान्वयप्रतियोगिसापेक्ष
ततयाऽसामर्थ्येनसाध्यवाचकपदोत्तरंतद्धितासंभवाच्च· तत्पदस्यतावतापिसार्थक्यासंभवाच्च· त
स्माद्यत्पदार्थहेतोस्तत्पदार्थेतस्मिन्साध्यस्यविधेयतयाभानमेवतच्चजायतेतदुत्तरंव्यापकताबोधोमा
नसःसएवपश्चाद्बोधःसाध्यवाचकपदस्यप्रकृतसाधनव्यापकताविशिष्टसाध्येलाक्षणिकतयातत्प
दार्थेव्यापकताविशिष्टसाध्यवत्वमवगाहमानइत्थमेवयवीप्सासमभिव्याहारस्थलेव्यापकत्वतात्पर्यस्या
नादितयानाहृशालत्वलक्षणायानिरूढलक्षणात्वेनवादिवाक्येतत्स्वीकारेहानिविरहात् नचव्यापकता
बोधस्याव्यापकत्वेनानाहेत्वधिकरणेवह्न्यादिमत्वबोधनस्याप्रयोजकतयाधूमादिकमुद्देश्यतावच्
छेदकीकृत्यसमूहालंबनात्मकएवव्यापकताविशिष्टसाध्यबोधउपेयतां यत्तत्पदेनतादृशालत्वार्थ
तात्पर्यग्राहकमेवास्त्वितिवाच्यम् अर्थबोधकत्वसंभवेनत्यागायोगात् योयोनवह्निमान्सनधूम

वानित्यादौ व्यतिरेक्युदाहरणे वह्निमद्भेदादित्यादिहेतुके तादृशान्वय्युदाहरणे वा यत्पदार्थाविवक्षायां प्रति
योगिवाचकपदसमानविभक्तिकपदोपस्थाप्यस्यानुयोगिनः प्रवेशेन न अन्योन्याभावबोधनासंभवाच्च·
एवं चैत्रो जानातीकर्तृत्वादित्यादौ न्यायांतर्गते यो यः करोति स जानातीत्याद्युदाहरणे यत्तत्पदार्थाविवक्षा
यां धर्मिणोः लाभे साध्याप्रयविवालनया उदाहरणाभासताप्रसंगाच्चेति एवं च उदाहरणसमुदायस्याव·
यवांतरेण समभिव्याहृतार्थप्रतिपादकत्वं सुतरामेव न संभवतीति भावः एतेन हेतूदाहरणयोर्धूमवान्
धूमाद्वह्निमानित्येतादृशविशिष्टार्थबोधजनकत्वसंभवादुदाहरणावयवांतरयोरित्यप्युपपन्नमित्यपि
निरस्तं इगिवुस्तरामेव न संभूयैकार्थप्रतिपादकत्वमित्युपपद्यते प्रतिज्ञाहेत्वोरित्यत्रापि न कार
विहाय ताभ्यां पर्वतो धूमज्ञानज्ञाप्यवह्निमानित्येतादृशविशिष्टज्ञानजननादिति भावः अथ प्रतिज्ञा
जन्यबोधानंतरं ज्ञानस्य साध्यज्ञापककांक्षायां तन्निवर्तकहेतुवाक्यं प्रयुज्यते तन्निवर्तकत्वाच
पक्षविशेषणतापन्नसाध्यांशे हेतुज्ञानज्ञाप्यत्वबोधनेनापि निर्वहतीति पक्षांशे हेतुज्ञाप्यत्व·
विशिष्टसाध्यवैशिष्ट्यावगाहिबोधस्य अन्वयप्रयोगितया न तात्पर्यविषयत्वमिवेन्न· पर्वतो वह्निबोधा
नंतरं पर्वतो यद्वह्निज्ञापकं तद्वैवाकांक्षा जायते न त्विह वह्निरस्य साध्ये धूमादिज्ञानजन्यपर्वतविशेष्य
कज्ञानविषयत्वप्रतिपादनेन धूमाद्वह्निमन्महानसमित्यादिवाक्यस्य पर्वतो वह्निमत्त्वेन ज्ञातः इत्या
कांक्षानिवर्तकत्वाभावात् पंचमीतत्तादृशपर्वतविशेष्यकज्ञानविषयत्वमानेन तद्विशेषणतापन्न
साध्यांश एव उक्तवाक्यान्महानसादिविशेषणतयोपस्थितेन तदप्रतीतेरेकधर्मिविशेषणतापन्नेन्य
विशेष्यकहेतुविशेषाधीनज्ञानविषयकत्वबोधकतायाः पंचम्याऽप्युत्पन्नत्वादिति धूमाद्वह्निमा

गदा०
अ०
5

त्यवर्तत इत्यादिति शिष्टवैशिष्ट्यबोधस्यावश्यकत्वात् कथंचिदिति निगमनेयं पदानुषंगापत्ते वह्नि
व्याप्यधूमवत्पर्वतादित्युपनयार्थे निगमनार्थधूमज्ञानज्ञाप्यवह्निमत्त्वाद्यन्वयसंभवादितिभावः अ
नुषंगापक्षे तत्तादृशवह्न्यादिमत्त्वरूपनिगमनार्थमात्रबोधनेवाकांक्षानिवृत्तेरुपनयार्थविशिष्टपक्षेनि
गमनार्थीभूतविशिष्टपक्षबोधस्यानुपपत्तेस्तन्नतात्पर्यविषयतेतिकथंचिदित्यन्तं इदं त्ववधेयं अनु
षंगपक्षेप्युपनयार्थैकदेशे यत्पदार्थे पक्षमात्रे निगमनार्थान्वयमात्रेणैव कृतकृत्यतयानतु समुदा
यार्थविशिष्टपक्षे निगमनार्थविषयकबोधेपि तात्पर्यमप्रामाणिकमिति नन्वेवं प्रतिज्ञादीनां
पंचानां कथमेकवाक्यताव्यवहार इत्यत आह एकेति विशिष्टेति विशिष्टैकार्थप्रतीतीच्छाप्रयो
ज्यत्वमात्रेणेत्यर्थः मात्रपदेन तादृशप्रतीतिजनकत्वव्यवच्छेदः तादृशप्रतिपत्तिर्निगमनरूपच
रमवाक्यार्थबुद्धिसध्रीच्यो वा मानसः परामर्शः तत्प्रयोजकता च तामजनयतोप्युत्तरोत्तरवाक्यप्रयो
जिकाकांक्षामुत्थापयतः प्रतिज्ञादेर्वह्निधूमइत्यादिवचसामान्यमानिकवह्न्यादिधीपरतावनि
र्वहत्येव तत्प्रयोजकतयैव नन्वेतावद्भिरवयवैः संभूयैकमहावाक्यार्थबुद्धेरजननेपि परामर्शप्र
योजकीभूतस्वार्थतत्तद्विशिष्टार्थधीजनकतायाः सर्वावयवेष्वेवं सत्त्वेन निराकांक्षलक्षणसमन्वयो
नोपपन्न इत्यत आह परामर्शप्रयोजकत्वेचेति परामर्शप्रयोजकज्ञानजनकत्वेचेत्यर्थः तद्विष
येति परामर्शविषयेत्यर्थः तत्पदार्थोपस्थापकतयेति अभेदेतृतीया तथा च तदुपस्थापकतारूपमित्य
र्थः विवक्षितमिति शेषः तथा च यादृशयादृशवाक्यैः परामर्शविषयकसकलपदार्थोपस्थापनं तेना
वयवसमुदायत्वं विवक्षितमिति पर्यवसितार्थः उदाहरणोपनययोरेवेति उपनयस्य व्याप्यबोधकताभिप्रा

६

येणोदाहरणेऽन्तर्भावः तन्न्यायत्वं पर्यवसानतिताभ्यामेव परामर्शविषययावत्पदार्थोपस्थापनादिति भा
वः अथ यथा कथंचित्परामर्शोपकूलत्वं यावदृश्यावद्वाक्यानां ताद्रूप्यवाक्यसमुदायत्वं विवक्षितम
तेनोदाहरणापनयमात्रातिव्याप्तिरित्याशंकते अथेति तदाद्युपकूलत्वमात्रेणेति। पूर्ववदभेदे तृतीयापरा
मर्शप्रयोजकत्वमित्यत्र उच्यते इत्यादिः समुदायस्य न्यायत्वं स्यादिति शेषः कोवह्निमानित्यादिवाक्याना
मपिजिज्ञासाज्ञानद्वारामपिअवयवप्रयोजकत्वेन यथाकथंचित्परामर्शोपकूलत्वसंभवादिति भावः
इत्यादीत्यादिपदाद्युक्तं मम यावज्ञाप्रतिज्ञादावतिव्याप्तिरित्यादिपरिग्रहः मूलेत्ताऽवयवलक्षणे शाब्दज्ञान
स्याचरमितिचरमकारणलिंगपरामर्शजनकशाब्दज्ञानजनकत्वाभिधाने पंचवाक्यानामेकमहावाक्या
र्थधीजनकत्वाभिमानेन प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थगोचरशाब्दधीविशेषाणां परिचयायैवतेषांनि
वेशः तत्तद्विशिष्टतत्तदर्थविषयकशाब्दबुद्धित्वेन तत्तन्निरूपणशाब्दधीजनकत्वेन तथा सत्येकैकावयवजन्य
शाब्दबुद्धेरपि परामर्शप्रयोजकतया तज्जनकस्यैव तत्तद्वाक्यार्थज्ञानजनकेऽवयवावयवेतिप्रसंगस्य दुर्वारत्वा
त् नच साध्यविशिष्टपक्षादिविषयकशाब्दबुद्धित्वेन बोधपदेकनिवेशेन निवेशेननुगमः जनकानस्य तत्त
द्बोधजनकान्यतमत्वादिरूपाननुगतधर्मावच्छिन्नपरत्वात् नचैवं सति न्यायानंतर्गते पर्वतोवह्निमानिति वा
क्येतिव्याप्तिः वाक्यपदस्य न्यायांतर्गतत्वार्थकत्वमभिप्रेत्य पर्यवसितं तल्लक्षणार्थमाह न्यायेति अथ कि
मिदं न्यायांतर्गतत्वं नतावत्तत्त्वाविषयकप्रतीत्यविषयन्यायकत्वं प्रतिज्ञाद्यविषयकप्रतीत्यापि हेत्वादिरू
पन्यायैकदेशस्य विषयीकरणात् नवद्यादिनसमुदायात्मकन्याये प्रतिज्ञाद्यविषयकप्रतीत्यविषयत्वस्य
दुर्घटत्वात् एकदेशावृत्तित्वाव्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभाववत्त्वांगीकारात् नापि न्यायविषयि

ताव्यापकविषयिताकत्वंचावयवभेदेनैकानुपूर्व्यवच्छिन्नवाक्यानामपिभेदात्क्वचिदपिप्रतिज्ञादि
वाक्येविषयिताव्यापकविषयमपिन्यायमवगाहमानेषुसर्वेषुवृत्त्यभावात् मैवं। स्वाविषयकप्रती
त्यविषयन्यायकत्वमेवतन्न्यायत्वसामानाधिकरण्यमात्रेणतादृशप्रतीत्यविषयकत्वंविवक्षणीयं
एकैकप्रतिज्ञादिव्यक्त्यविषयकप्रतीत्याव्यक्तेनघटितन्यायस्यतन्न्यायैदाशवंश्यैकदेशहेत्वादेश्चावगा
हमानेपिन्यायत्वाधिकरणेनतत्प्रतिज्ञादिव्यक्तौनतत्प्रतिज्ञादिव्यक्त्यविषयकप्रतीत्यविषयत्वसत्वेन
तासांनघात्वमित्यवधेयं। अथवान्यायत्वाश्रयत्वमेवतथापर्याप्त्यविवक्षयाएकदेशस्यापितथात्वो
पपत्तेः। वस्तुतोन्यायत्वच्छेदकस्यसमुदायत्वांशस्यावैलक्षण्यप्रयोजकत्वेनानिवेशादुचितानुपूर्वीकत्वमा
त्रंविवक्षितं। तदेवन्यायांतर्गतत्वेएकदेशासाधारण्यमुचितानुपूर्वीकत्वंचप्रतिज्ञात्वहेत्वादिघटितवाक्य
पंचकानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वंविशिष्टधर्मावच्छिन्नप्रतियोगितावच्छेदक
तायास्तद्घटकसमुदायपर्याप्तत्वमतयाएकदेशस्यापितदाश्रयत्वात्प्रतिज्ञादेस्तद्वत्वमस्त्वतेनउपनयवि
शेषोनयत्वविशिष्टनिगमनत्वशरीरेचवैशिष्ट्यघटकतयानिगमनस्याप्यंतर्भावात् नतत्साधारण्यम
तत्तमेवोक्तधर्मस्यविशिष्टस्यावच्छेदकताघटकएकमवच्छेदकमपरंतद्विशेषणंतन्निष्ठावच्छेदकत्व
स्यावच्छेदकेनतत्समुदायेऽवच्छेदकत्वपर्याप्तिरुपगमेचतादृशानुपूर्वीविशेषप्रकारकनिरूप्यत्व
समनियतकारणतावच्छेदकविषयिताकत्वंविवक्षणीयं। तादृशांचतादृशानुपूर्वीविशिष्टवैशिष्ट्या
वगाहिशाब्दत्वावच्छिन्नकार्यतानिरूपितकारणतातदवच्छेदकत्वंचहेत्वादिनिष्ठानंतयाप्रकारतापन्न
प्रतिज्ञादिविषयितानामव्याहतंविनिगमनाविरहादितिविषयतानिरूपितत्वेनानिरूप्यत्वविशिष्टेव

नकारणीभूतज्ञानविषयत्वकालनिरूपितविषयितानां कारणतावच्छेदकत्वात्प्रतिज्ञोत्तरहेत्वादिविशिष्टवैशि
ष्ट्यबुद्धित्वावच्छिन्नकार्यतानिरूपिताप्रतिज्ञोत्तरहेतुरित्यादिज्ञानसाधारणकारणतातादृशानुपूर्व्यवच्छिन्न
भिन्नवाक्यत्वाद्यवच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्ननिरूपितातादृशवाक्यत्वादिप्रकारकज्ञानकारण
तांचादासीनातिप्रसंगवारणाय कारणताया तादृशधर्मव्याप्यत्वव्यापकत्वयोर्निवेशनेन च तादृशानुपूर्वीविशे
षावच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणतायाः अपि न तादृशानुपूर्वीविशेष
प्रकारकानिश्चयत्वसमनैयत्यसंभवः प्रतिज्ञात्वादिना पदार्थोत्तरावगाहितादृशानुपूर्वीप्रकारकज्ञान
साधारणत्वात् तादृशज्ञानस्य वास्तवप्रतिज्ञाद्यविषयकत्वेन तद्घटितानुपूर्वीप्रकारकत्वाभावादिति
वाच्यं॰ प्रतिज्ञात्वावच्छिन्नप्रकारतानिरूपितहेतुत्वाद्यवच्छिन्नप्रकारतेति क्रमेणनिगमनत्वावच्छिन्न
विषयतापर्यंतनिवेशे पतच्छालिनिश्चयत्वसमनैयत्यसंभवेऽपि विवक्षितत्वात्तादृशनिश्चयत्वस्योक्तभ्रमसा
धारण्येन सत्ताविरहात् नचैवमुदासीनप्रतिज्ञाद्यानंतर्य्यहेत्वाद्यंशेऽवगाहनतयोऽभ्रमः तद्विशिष्टतादृशप्रति
ज्ञादिविषयितायाअपि निरुक्तकारणतावच्छेदकतयातिप्रसंगो दुर्वार इति वाच्यं॰ अभ्रमाहृतविषयिताया
एव निवेशनीयत्वादित्याहुः तं विस्तरेण॰ अवयवैकदेशस्य वारणाय प्रतिज्ञाद्यन्यतमत्वमिति अथ धूमा
दालोकवान्पर्वतो वह्निमान्धूमादित्यादिन्यायांतर्गतप्रतिज्ञैकदेशे धूमादित्यादिभागे तिव्याप्तिः तस्या
पि हेतुप्रतिपाद्यया तादृशविशिष्टार्थस्तन्मात्रबोधकत्वेन हेतुलक्षणाक्रांततया प्रतिज्ञाद्यन्यतमत्वात् न
चतद्घटकपंचम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्वाभावान्नवस्तुमात्रहेतुलक्षणाक्रांतत्वं नस्येति वा
च्यं॰ एवमपि धूमाद्वह्निमत्त्वस्य धर्मी पर्वतो वह्निमानित्यादिप्रतिज्ञाघटकतादृशभागे तिप्रसंगस्य दुर्वार

गदा॰
ग्र॰
7

त्वादिति चेन्नः प्रकृतपक्षतावच्छेदकावच्छिन्नविशेषणतापन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नान्वित-
स्वार्थबोधजनकत्वे सति प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयितावहिर्भूतवि-
षयिताशून्यबोधजनकवाक्यत्वरूपहेतुत्वस्यैव निवेशनीयतयाऽतिप्रसंगात् निगमनघटकस्य
तस्मादिति भागस्य वारणाय विशेष्यदलं तज्जन्यबोधे तादृशविशिष्टविषयितावहिर्भूतव्याप्त्यादिविषयिता-
सत्वेन तद्वारणात्। ननु प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञादिभिन्नभिन्नत्वरूपं प्रतिज्ञाद्येकदेशसाधारणं भे-
दस्याव्यासज्यवृत्तितया समुदायवृत्तित्वे पञ्चदेशावृत्तितायाअपि दुर्वारत्वात्। अथ प्रतिज्ञादिभिन्नभेदानु-
योगितावच्छेदकरूपवत्त्वं तन्नादृशं च रूपं प्रतिज्ञादिकमेव न तु तदेकदेशपर्याप्तपर्वतत्वादिकं तदवच्छि-
न्ने व्यासज्यवृत्तिप्रतिज्ञात्वाद्यवच्छिन्नभेदसत्वादिति चेन्न प्रतिज्ञाद्येकदेशे प्रतिज्ञात्वाद्यवच्छिन्नभेद-
सत्वेन तादृशभेदावच्छिन्नभेदस्य प्रतिज्ञात्वाद्यवच्छिन्नेपि सत्वासंभवात् प्रतिज्ञात्वानिरूप्याधिकरणस-
मुदायस्यैकदेशानतिरिक्तत्वात् न हि व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकपञ्चदेशभेदः प्रामाणिकः घ-
टपटौ द्वौ न घट इति प्रतीतेरसिद्धेः। प्रतिज्ञादिभेदपंचकानुयोगितावच्छेदकं यद्रूपं तदवच्छिन्नानुयोगिता-
कभेदप्रतियोगितावच्छेदकधर्मत्वं वह्निवलक्षणे च प्रतिज्ञाहेत्वादिसमुदायेति व्याप्तिः तादृशसमुदायत्वावच्छि-
न्ने प्रतिज्ञात्वाद्यवच्छिन्नभेदासत्वात् तादृशसमुदायत्वस्य निरुक्ततादृशानेकत्वेन तादृशसकलधर्मावच्छिन्नानु-
योगिताकभेदप्रतियोगितावच्छेदकत्वात् प्रतिज्ञात्वाद्यवच्छिन्नानुयोगितावच्छेदकं यद्यत् तदवच्छिन्नप्र-
तियोगितावच्छेदकत्वेनापि तादृशधर्मविशेषणे च प्रतिगौरवमतो लघुलक्षणान्तरमाह। प्रतिज्ञाद्य-
घटकत्वमिति। अत्रापि न्यायाङ्गत्वे सतीत्यनुषज्यते अतो न्यायबहिर्भूतवाक्यव्युदासः। प्रतिज्ञाद्ये-

कदेशवारणाय प्रतिज्ञाद्यघटकत्वं निवेशनं तदर्थञ्च प्रतिज्ञादिघटकतानवच्छेदकधर्मवत्वं तेन प्रतिज्ञा
दिघटकतदेकदेशभेदस्य प्रतिज्ञात्वादिरूपव्यासज्यवृत्तिधर्मावच्छिन्नेऽनभ्युपगमेऽपि न क्षतिः प्रतिज्ञादिघ-
टकतावच्छेदकत्वेन प्रतिज्ञात्वादिन्यूनवृत्तित्वेन च प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वे सति प्र
तिज्ञात्वादिसमानाधिकरणत्वं तथात्वे तदेकदेशवृत्तिपर्वतपदत्वादेरेतद्घटवच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्न-
भेदसत्वात् ननु प्रतिज्ञात्वादेर्हेतुत्वादेः प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वात् तत्संग्रहाय
विशेष्यदलं न च मिलितभेदप्रपञ्चकानुयोगितावच्छेदकाभिन्नत्वनिवेशे हेतुत्वादेर्हेतुत्वाद्यवच्छिन्नभे-
दानुयोगितावच्छेदकत्वविरहात् तादृशानुयोगितावच्छेदकाभिन्नत्वमव्याहतमेवेति विशेष्यदलमनर्थक
मिति वाच्यं धूमादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञाद्यघटकधूमादित्यादिभागसाधारणस्य हे-
तुत्वस्य निवेशेन तत्रातिप्रसङ्गभयेन मिलितभेदप्रपञ्चकानुयोगितावच्छेदकत्वस्यैकत्वनिवेशासंभवात्
वस्तुतस्तु तथाविधदूषणपूर्वोपदर्शितहेतुत्वनिवेशनेनैव तादृशभागवारणसंभवात् मिलितभेदप्रपञ्चकानुयो
गितानवच्छेदकत्वस्यैव निवेशनीयतया नोपादेयमेव विशेष्यदलं मिलितभेदप्रपञ्चकानुयोगितावच्छेदकत्व-
स्य प्रतिज्ञादिघटकतावच्छेदकत्वानात्मकत्वे विशेष्यदले उभयाघटकत्वनिवेशेनैवोपपत्त्या तद्घटकभा
गद्वयाघटितत्वपर्यन्तनिवेशवैयर्थ्यात् प्रतिज्ञादिघटकभागघटितवृत्तिसमुदायत्वस्य प्रतिज्ञात्वाद्यव-
च्छिन्नभेदानुयोगितावच्छेदकत्वे प्रतिज्ञाद्यघटकतानवच्छेदकत्वदलेनैव वारणासंभवात् मिलितभेद-
प्रपञ्चकानुयोगितावच्छेदकत्वस्य प्रतिज्ञादिघटकतावच्छेदकत्वेन प्रतिज्ञात्वपर्याप्त्यधिकरणहेतुत्वैकदेश
हेतुत्वपर्याप्त्यधिकरणप्रतिज्ञैकदेशादिवृत्तिसमुदायत्वस्य प्रतिज्ञात्वहेतुत्वाद्यवच्छिन्नभेदानुयोगिता-

गदा॰
ग्र॰
8

नवच्छेदकत्वमानत्वसमुदायत्वमादायातिप्रसंगवारणाय भागद्वयपर्यंतनिवेशसार्थक्यात् नवैकप्र
तिज्ञात्वव्यक्तेरपरप्रतिज्ञात्वव्यक्त्यावच्छिन्नभेदानुयोगितावच्छेदकतया प्रतिज्ञादिघटकतावच्छेदकत्वं
दुर्वारमेवेति वाच्यं॰ स्वसमानाधिकरणप्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वसंबंधविवक्षणीय
त्वात् घटकतानवच्छेदकधर्मस्तु व्याप्यत्वमत्र पक्षवृत्तित्वेन विवक्षणीयः अतो न प्रतिज्ञादिघटकवर्णत्वेन म
त्वादिकमादाय न तेषामतिव्याप्तिः केचित्तु प्रतिज्ञादिघटकतावच्छेदकत्वं स्वाश्रयाविषयकप्रतीत्यवि
षयप्रतिज्ञादिकत्वे सति प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वं सत्यंतमनिवेश्य प्रतिज्ञादिविष
यकत्वाभावकूटवत्प्रतीतिविषयत्वावच्छेदकत्वनिवेशे धूमादिहेत्वादिभागेतिव्याप्तिस्तत्र प्रकृतहेतु
तावच्छेदकावच्छिन्नविशिष्टहेतुत्वप्रतिपादकत्वरूपहेतुत्वसत्वेन तत्प्रतीतेर्हेतुविषयकत्वघटिता
भावकूटवत्वाभावादतः प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वावच्छिन्नभेदहेत्वविषयक
प्रतीतिविषयतावच्छेदकत्वावच्छिन्नभेदकूटवद्धर्मत्वमेव प्रतिज्ञादिघटकत्वमित्यनेनाविवक्षणीयं॰
तथा चासंभववारणाय सत्यंतमवच्छेदकविशेषणं प्रतिज्ञाद्येकदेशाविषयकप्रतीतिविषयत्वस्य प्र
तिज्ञात्वाद्याश्रयतदेकदेशांतरे सत्वेन तदाश्रयसमुदायस्य तादृशप्रतीत्यविषयत्वासंभवेपि प्रतिज्ञात्वा
द्याश्रयतत्तदेकदेशस्य तत्तदेकदेशाविषयकप्रतीत्यविषयतयैव तत्तदेकदेशवृत्तिधर्मे सत्यंतनिर्वाहः प्रति
ज्ञापदस्य प्रतिज्ञात्वाद्याश्रयपरत्वात्॰ सत्यंतमस्य स्वपदेन प्रतिज्ञात्वादेरुपादानेऽशक्यतयासंभवदु॰
ति विशेष्यदलं॰ तत्र प्रतिज्ञाद्येकदेशमात्रवृत्तिपदेन पदत्वादावेव तदाश्रयमात्रविषयकप्रतीतेस्तत्स
मुदायरूपप्रतिज्ञाद्यविषयकत्वस्य व्याहतत्वात् नतु प्रतिज्ञात्वादेरेकदेशमात्रविषयकप्रतीतिवि

षयतायामतिप्रसङ्गस्य तस्यावच्छेदकत्वासंभवात् नचैकदेशमात्रविषयिकायामपि प्रतीतौ प्रति-
ज्ञात्वाद्याश्रयाविषयकत्वासंभवेन तदाश्रयसमुदायाविषयकत्वविवक्षणे एकैकप्रतिज्ञादिविषयिका-
यामपि प्रतीतौ प्रतिज्ञात्वाद्याश्रयापरव्यक्त्यविषयत्वेन तदाश्रयसमुदायाविषयकतया एकैकप्रतिज्ञादि
व्यक्तिपर्याप्तप्रतिज्ञात्वादिकं तादृशप्रतीतिविषयतावच्छेदकमेव तदनतिप्रसक्तत्वादिति वाच्यं स्वाश्र-
याविषयकप्रतीत्यविषयताया तादृशप्रतिज्ञात्वाद्याश्रयेतादृशप्रतिज्ञात्वाद्याश्रयवर्णसमुदायावि-
षयप्रतीतिविषयतावच्छेदकत्वविवक्षया प्रतिज्ञादिविषयकसकलप्रत्ययानामेव तादृशसमुदा-
यविषयकत्वेनादोषात् अवच्छेदकत्वं चेह्यानतिरिक्तवृत्तित्वमेव न तु स्वरूपसंबन्धरूपविशेषः तेन प्रति-
ज्ञात्वादिना तदेकदेशमात्रविषयकज्ञानविषयतायां प्रतिज्ञावादेस्तथाविधावच्छेदकत्वसत्त्वेपि न क्षतिः
तथाविधयत्किंचिदेकज्ञानविषयतात्वावच्छिन्नानतिरिक्तवृत्तित्वमिह निवेशनीयम् तेन प्रतिज्ञादि-
घटकेषु सकलवर्णेष्वेव प्रतिज्ञाद्यविषयकप्रतीतिविषयत्वसत्त्वेन तादृशविषयतासामान्यस्याप्रसि-
द्धावपि स्वव्यापकतादृशविषयतात्वावच्छिन्नकत्वस्य प्रतिज्ञात्वादिसाधारण्येपि न क्षतिरिति वदन्ति
तदसत् एतदपेक्षया उक्तप्रतिज्ञाद्यन्यतमत्वस्यैव लघुत्वात् तत्रानिर्भरस्य निर्वक्तुमशक्यत्वात्
एतेन प्रतिज्ञादिघटकतावच्छेदकत्वस्वसमानाधिकरणत्वानधिकरणवृत्ति प्रतिज्ञात्वादिकात्वमपि
हेयं एतावतानुगमेन तादृशांस्वघटितविशिष्यतावतामनेनभेदानां निवेशनीयतया महागौरवात् प्र-
तिज्ञाहेत्वादिसमुदायवारणाय उभयेत्यादि उभयघटकभागद्वयावृत्तिधर्मवत्त्वार्थकं तथा च प्रतिज्ञा-
दिघटकतानवच्छेदकत्वे सत्युभयघटकभागद्वयावृत्तिर्यो धर्मस्तद्वत्त्वं दलद्वयार्थः प्रतिज्ञाद्येको-

गदा॰ अ॰ 9

कावयवघटकभागद्वयस्यापि यत्किंचिदुभयघटकत्वादसंभव इत्यतः प्रतिज्ञाहेत्वाद्युभयघटकस्य
विशिष्योभयपदार्थतामाह उभयं चेति इति विशिष्य वक्तव्यमित्यग्रेणान्वयः इति इति रीत्या प्रतिज्ञा
हेत्वाद्योरपि प्रतिज्ञाहेतूभयत्वादिना न घटकत्वांशे विशेषणता तादृशोभयघटकभागाप्रसिद्धेः ।
किंतु प्रतिज्ञात्वहेतुत्वादिना तथा च प्रतिज्ञादिघटको यो भागो यश्च हेतुघटकस्तद्द्वयाघटितत्व
मिति क्रमेण घटितत्वघटकत्वांशे निवेशनीयं प्रतिज्ञाहेत्वाद्येकदेशघटितसमुदायत्ववारणाय घटक
भागनिवेशनं प्रतिज्ञादिघटकत्वं चैकदेशसाधारणं प्रतिज्ञात्वाद्याश्रयत्वं तथा च प्रतिज्ञात्वाद्याश्रय
हेतुत्वाश्रयोभयावृत्तित्वादिरूपविशेषणं वक्ष्यमाणधर्मविशेषणे पर्यवसितं । न चैवं धूमाद्वह्निमतः स
धर्मा पर्वतो वह्निमान्धूमादित्यादौ प्रतिज्ञायामव्याप्तिः तस्याः हेतुलक्षणाक्रान्तभागघटितत्वात् त
थाहेतुत्वस्य पूर्वोपदर्शितहेतुत्वस्य निवेशेपि निगमनेयं पदान्तर्घटनापत्तेस्तत्रोपनये चाव्याप्तिर्दुर्वारैव तस्यो
पनयघटकेनायंपदेनोपनयस्य च तद्घटकेन तेन च घटितत्वादिति वाच्यं अनुषंगपदेउपनयघटकैकट
कभागनिगमनघटकत्वेन चोपनयघटकस्य भागस्य विशेष्यवाचकपदातिरिक्तत्वेन वा भागद्वयस्य
विशेषणीयत्वात् अथ तस्मादित्यादिभागस्य च तत्त्वे तेनैव वारणात् स्थानाश्रयातिरिक्तभागद्वय
वृत्तेन्यत्वेन धर्मो विशेषणीयः तेनाहेत्वाद्यंशपरित्यागेन प्रतिज्ञोदाहरणादिसमुदायेन्यायान्तर्गतेनाऽ
तिप्रसंगः वस्तुतस्तु प्रतिज्ञाहेत्वित्यादौ हेत्वादिपदं प्रतिज्ञाद्यतिरिक्तपरम् । तथा चोदाहरणादेः
प्रतिज्ञाद्यतिरिक्तत्वान्न दोषः प्रतिज्ञाद्यतिरिक्तघटकत्वं च प्रतिज्ञाद्येकदेशाव्यावृत्तं प्रतिज्ञात्वाद्यनाश्र
यत्वमेव पर्यवसितं बोध्यमित्यादिक मूलस्य शाब्दज्ञानजनकशाब्दज्ञानान्तमन्यतमत्वेनानुगतरूपे ।

णावयवप्रतिपाद्यतत्तद्विशिष्टार्थविषयकशाब्दबोधपरं । अतो नागमः तादृशबोधजनकानां वाक्या
नामन्यतमत्वेनागमेऽव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावानभ्युपगमे पूर्वोपदर्शितात्र
पपत्तिप्रसंगात् शाब्दबोधानामन्यतमत्वेनोपादानेऽननुगतत्वादित्यभिप्रायेण मूलेऽवयवलक्षणमन्य
थाव्याचक्षाणानां केषांचिन्मतमाह । प्रतिज्ञादिप्रतिपाद्येति विशिष्यनिवेशानां विशिष्टार्थविशेषाणां
साध्यविशिष्टपक्षादीनां परिचायकमात्रमेतत् । न तु प्रतिज्ञादिप्रतिपाद्यत्वेन तेषां निवेशः । विशिष्टा
र्थविशेषमनेनभाव्यप्रतिज्ञात्वादीनां तु निर्वचनतया तेषां विशिष्यनिवेशेन स्वावश्यकत्वेन तद्विशिष्टा
र्थबोधजनकवाक्यप्रतिपाद्यत्वेन तत्तद्विशिष्टार्थनिवेशस्यापि गौरवेणानेन नातिकाश्यपि तुल्यत्वात्
एतत्सूचनायैव तत्तदित्युक्तं । न चात्र नानावयवजन्यसमूहालंबनबोधं प्रतिज्ञादिहेत्वादिजन्यविशि
ष्टार्थबोधं चादाय तज्जनकसमुदायातिव्याप्तिस्तत्तद्विशिष्टार्थबोधनिष्ठतत्तदेकदेशबुद्धित्वावच्छिन्न
जन्यतानिरूपितजनकताश्रयैकदेशेऽवयवे चातिव्याप्तिरिति वाच्यं तत्तद्विशिष्टार्थविषयकशाब्दबु
द्धित्वावच्छिन्नजन्यतामन्यत्वेनोपादाय तन्निरूपितजनकतावच्छेदकधर्मपर्याप्त्यधिकरणतायाः निवे
शनीयत्वात् तादृशो धर्मः पर्वतो वह्निमानित्यादिवाक्यत्वमेव वाक्यत्वस्य व्यासज्यवृत्तित्वान्नैकदेशे
तिव्याप्तिः तादृशशाब्दबुद्धित्वावच्छिन्नत्ववतादृशशाब्दबुद्धित्वपर्याप्तावच्छेदकतानाक्रान्तं । अतः प्रति
ज्ञाहेतुसमुदायादेः साध्यविशिष्टपक्षावगाहिशाब्दत्ववृत्तितद्धर्मावच्छिन्नजनकत्वेऽपि नातिप्रसंगः वाक्य
ज्ञानस्य जनकतामते तत्तादृशजनकतायां विषयतासंबंधेन यादृशधर्मावच्छिन्नं यादृशधर्मावच्छिन्नवि
षयत्वं वा अवच्छेदकं तादृशधर्मपर्याप्त्याश्रयत्वे विवक्षणीयमिति नासंभवः तादृशोऽपि धर्मः पर्वतो वह्नि

गदा॰
अ॰
10

मानित्यादिवाक्यत्वमेव अथाकांक्षादिमत्पदसमूहत्वरूपवाक्यत्वमेव व्यासज्यवृत्तितद्वच्छिन्नविषयक-
ज्ञानत्वेन च न तथाभूतज्ञानजनकत्वं तत्समूहत्वे ज्ञानस्यानुपयुक्तत्वात् किंत्वानुपूर्वीविशेषात्मकाकांक्षावच्छिन्न
विषयकज्ञानत्वेनैव तथात्वं आनुपूर्वीविशेषश्चैकवर्णनिष्ठापरवर्णानंतर्यरूपो न व्यासज्यवृत्तिरित्येक
देशातिप्रसंगाद्युद्धारः न च तादृशजनकतावच्छेदकीभूतविषयितानिरूपकवर्णसमुदायत्वमेव विवक्षणी
यमतो नातिप्रसंग इति वाच्यं तत्तत्प्रतिज्ञादिव्यक्तिभिन्नप्रतिज्ञादिघटकवर्णानामपि तादृशसमुदायघटकत्वा-
पात्त्वाविदप्यवयव्यत्वोतादृशसमुदायत्वापर्याप्तेः प्रत्येकावयवव्यवहारानुपपत्तेः मैवं तादृशबोधजन-
कतावच्छेदकीभूतयत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णसमुदायत्वस्यैव विवक्षणीयत्वात् तादृश
चज्ञाने तथाविधजनकताद्वयस्यान्यत्वेन विशेषणीये तेन प्रतिज्ञाहेतुसमुदायेनातिप्रसंगः न चैवं हेत्व
र्थप्रतिपादकभागघटितप्रतिज्ञाविशेषेऽव्याप्तिः तद्विषयकज्ञाने हेत्वर्थबोधकताविरमादिति वाच्यं
व्याप्यव्यापकभावानापन्नजनकताद्वयस्यान्यतायाः निवेशनीयत्वात् वस्तुतस्तत्त्वानवच्छेदकविष-
यिताविशिष्टतादृशजनकतानाश्रयत्वं ज्ञाने विशेषणं स्वजनकताः प्रतिज्ञानिहेतुभयादिविषयकज्ञा
नं च प्रतिज्ञार्थबोधजनकतानवच्छेदकीभूतहेत्वादिविषयिताविशिष्टतादृशजनकताश्रयपर्वतधूमादालो-
कवान्पर्वतो वह्निमान्धूमादित्यादिप्रतिज्ञामात्रविषयज्ञानं च न तादृशाविशिष्टजनकताश्रयस्तन्निष्ठहेत्व
र्थबोधजनकतावच्छेदकविषयिताया अपि विशिष्टप्रतिज्ञार्थबोधजनकतायामवच्छेदकत्वात् एतेन व्या-
प्यव्यापकभावानापन्नतथाविधजनकताद्वयस्यान्यत्वप्रवेशो धूमादालोकवान् पर्वतो वह्निमान्धूमा-
दित्यादिसमुदायेऽव्याप्तिः तादृशसमुदायविषयकज्ञाननिष्ठप्रतिज्ञार्थबोधजनकत्वहेत्वर्थबोधजन-

कान्वयार्थबोधजनकतयोर्व्याप्यव्यापकभावात् व्याप्यव्यापकभावानापन्नतथाविधजनकताद्वयशून्यत्वा
दितिनिरस्तेः तादृशवाक्यविषयकज्ञानीयप्रतिज्ञाद्यघटकहेतुसमानाकारकवाक्यविषयितायाः विशिष्टा
र्थबोधजनकतावच्छेदकत्वेपि प्रतिज्ञावाक्यविषयितानंतःपातिन्याः हेतुविषयितायाः तादृशजनकतानव-
च्छेदकत्वात् यदि चोदासीनपदार्थविषयितानियतविषयिताकावयवव्यक्तेः प्रामाणिकीतदास्वानवच्छेद
काविषयितातथाविधजनकतावच्छेदकत्वेन विशेषणीया तादृशावयवव्यक्तिविषयज्ञाने अवयवांतरविष-
यिताः नैयमन्यस्य प्रामाणिकत्वेन्यगतिरेवेति ध्येयं समानाकारकप्रतिज्ञाद्वयाद्यात्मकस्य न्यायस्यावयव-
त्वपर्याप्त्याश्रयत्वमिष्टमेतस्यान्यायत्वेन द्वारणप्रकारोपि चिंतनीयः न्यायांतर्गतत्वस्यापि निवेशनीयतया
नोदासीनवाक्यसाधारण्यमिति बोध्यं अत्र च यत्किंचित्त्वनिवेशादननुगमो दुर्वारः एवं प्रतिज्ञादिघटक-
हेत्वर्थप्रतिपादकभागेतिव्याप्तिः एवमुदाहरणस्य वाक्यद्वयात्मकस्य संग्रहाय तत्प्रतिपाद्यसाध्यवि-
शिष्टधर्मिविषयकशाब्दत्वावच्छिन्नजन्यतातथाविधहेतुविशिष्टधर्मिविषयकशाब्दत्वावच्छिन्नजन्यताद्वया
न्यतमन्यतागर्भे निवेशनीया तथा च तद्घटकप्रत्येकवाक्ये तिव्याप्तिः तादृशार्थद्वयविषयकबुद्धित्वं च न सं-
ग्रहायस्यापि जन्यतमत्वेन निवेशनीयाः न ह्येकैवउदाहरणप्रतिपाद्यतत्तद्विशिष्टार्थबुद्धित्वावच्छिन्नत्वानि रूपि
तज्जनकताद्वयं द्वित्वेन निवेशनीयं अत एकैकजनकताश्रयप्रत्येकभागाविषयकज्ञानमादायनप्रत्येक-
भागेतिभागेतिव्याप्तिरितिवाच्यं उभयभिन्नत्वस्य प्रत्येकमुभयोरसत्वादुभयभिन्नत्वस्य उभयत्रासंभवादन्य
तमत्वेनोभयोपादानासंभवात् व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदगर्भे तु मादृशान्यतमत्वाश्र
यप्रत्येकजनकतामादायातिप्रसंगस्य दुर्वारत्वात् एवं कल्पे तु प्रतिज्ञाद्यघटकत्वविशेषणेनैव नातिप्रसं

गदा· स्य· 11

गमकाश्च यो यो धूमवानिति प्रत्येकवाक्यस्य वाक्यद्वयात्मकोदाहरणघटकत्वात् न च वाक्यद्वयपर्याप्त
मुदाहरणत्वं पूर्वं च स्वघटकयत्पदोपस्थाप्यधर्मिणि हेतुमत्त्वबोधकं यद्वाक्यं यच्च तदनन्तरप्रयुक्तं
स्वघटकतत्पदोपस्थाप्यतादृशधर्मिणि साध्यवत्ताबोधकं वाक्यं साध्यतदुभयत्वमेव तथात्वात् अन्या
न्यापि प्रतिज्ञाघटकत्वं निवेशनीयमिति चेत् तर्हि गुरुशरीरस्य तादृशविषयितानिरूपकवर्णसमुदाय
त्वस्य निवेशापेक्षया निरुक्तोभयघटकभागद्वयाघटितत्वनिवेशनमेवोचितमित्यत्र विबीजमवधेयं नत्र
न्यायजन्यज्ञानस्यापि पुनः यथार्थसाध्यव्याप्यवत्पक्षावगाहितया परामर्शरूपत्वात् परामर्शजनकवाक्यत्वमे
व न्यायत्वे ज्ञातो न्याय्यते एवं तादृशवाक्यघटकवाक्यत्वमेवावयवत्वमस्तु किमुक्तान्यतमत्वन्यायघटकघटकव
ल्लात्र सत्त्वेनेति प्रतिज्ञादिपंचकस्याविशिष्टकार्यप्रतिपादकत्वाभिमानिनामाशंकामूलमुच्छिन्नाकरोति
अत एवेति तादृशलक्षणरूपेण्यवयवोज्ञाललक्षणानुसरणादित्यर्थः परामर्शमात्रस्य परामर्शजनकस्य च
परामर्शजनकमात्रस्य मात्रपदात् पूर्वोपदर्शितन्यायघटकत्वलक्षणघटकशाब्दबोधविशेषोक्रमे
ण व्यवच्छेद्यो समुदायवाक्यस्यैव प्रत्येकवाक्यस्यापि न्यायत्वमिष्टमेव परामर्शप्रयोजकवाक्य एव न्याय
व्यवहारात् न त्वस्य समुदायवत् प्रत्येकमात्रेपि सत्त्वात् परामर्शप्रयोजकवाक्यत्वमेव न्यायत्वमिति
केत् नत्वनमपन्यस्य नियवितिमत्ते पुनः लाघवात्तस्यापि न्यायपदेस्य नेनान्वयः परामर्शप्रयोजकेति
वह्निव्याप्यधूमवानयमिति वाक्यस्यापीत्यादिः विशेषेति वाक्यपंचकसमुदायादिर्यादृशवाक्यप्रयोग
नार्थान्तरादिनिबंधननिग्रहप्रयोजकाः तदेव न्यायव्यवहारविषय इति नियमाभिप्रायेणाहुर्यदिति तत्र
त्रेति कथायां विचारसमये श्रोताकांक्षाक्रमेणावयवाभिधाने निग्रहाप्रयोजकमिति शेषः इति अतः तदभिधा

नेयं द्वादित्यग्निमेणान्वयः विशिष्टवैशिष्ट्ये पक्षस्य व्याप्तिविशिष्टहेतुमत्त्वे आकांक्षाजिज्ञासा नास्ती
ति विप्रतिपत्तितः साध्यतदभावसंशयवतस्तदेकतरकोटिजिज्ञासा प्रथममुदेति ततः प्रतिज्ञावाक्यान्न ।
न्विस्तुवयेतद्वै तौ नत्वमतौ च तज्ज्ञ मनोपयिकाव्याप्तेनदनेन तमेव च पक्षस्य तादृशहेतुमत्त्वमिति भावः ।
तदभिधाने विशिष्टवैशिष्ट्यप्रतिपादकं वाक्योच्चारणेऽपि प्रथममतित्यनुष्टज्यते अन्यथा लाघवमा
त्रमाहत्य तस्य लक्षणत्वोपगमे परामर्शजनकतयेति लाघवाद्वाक्यत्वमप्यनेन तभाव्यपरामर्शजनक
त्वमात्रस्य लक्षणत्वौचित्यादिति भावः नन्वमध्यस्यस्य आकांक्षायतो निवर्तते स एव न्यायः सा च शाब्द
त्वप्रकारिकाविषयसिद्धिर्निर्वाहकशब्दादेव निवर्तते स एव न्यायः सा च शाब्दत्वप्रकाविषयसिद्धिनि
नतत्प्रमाणं तु शब्दे न च वक्तव्यादेन्यायत्वमित्यत आह आकांक्षेति आकांक्षानिवृत्तिविरहदर्श्यथं तदल्पपदे
ति व्याप्तिवक्ष्यावबोधकवाक्यस्य प्रथमप्रयोगेपि साध्यसन्देहाद्यधीनानां मध्यस्याकांक्षाणामनिवृत्तेरिति भा
वः इतिनिवृत्तिप्रसंभवि जनकताया अवच्छेदकानियतत्वात् ज्ञानस्यावच्छेदकज्ञानाधीनत्वादिति भावः
इतिनिवृत्तिप्रसंभवि जनकताया अवच्छेदकानियतत्वात् लक्षणान्तरस्य लक्षणदोषत्वात्स्वैव लक्षणत्वा
दिति मूलमसंगतमतो दोषं निष्कृत्य तज्ज्ञापकं व्याचष्टे तथाचेति तादृशानुगतरूपस्वीकारे चेत्यर्थः साध
काभाव इति तादृशधर्मस्यैव न्यायादिपदप्रवृत्तिनिमित्तत्वसंभवेन तत्प्रवृत्तिनिमित्ततया ज्ञाननिष्टजा ।
तिविशेषप्रसिद्ध्यसंभवात् यत्नापरस्याचासत्त्वादिति भावः बाधकमित्यस्य प्रतिज्ञादिजन्यत्वावच्छेदक ।
जातीनां नानात्वोपगमात्रसेवाबाधकाभाव इत्यत आह तत्रतत्रेति तर्कमानाभाव इति प्रतिज्ञाहेत्वादिनाना
नावयवजन्यबोधनिष्टप्रतिज्ञादिजन्यतावच्छेदकजातेर्हेत्वादिजन्यतावच्छेदकतया हेत्वादिजन्यता ।

गदा॰
व्यु॰
12

वच्छेदकतया हेत्वादावपि प्रतिज्ञादिलक्षणातिव्याप्त्यापत्या तादृशजातिघटितलक्षणाकरणासंभवे
न तादृशजातौ लक्षणानुरोधस्य प्रयोजकत्वानवकाशात् एकैकावयवजन्यबोधवृत्तिजातीरुपादाय स्व
रूपयोग्यताघटितलक्षणस्य निर्दोषत्वेपि भयादिजन्यबोधजनकज्जात्यभावनिर्वाहकप्रतिबध्यप्र
तिबंधकभावकल्पने महागौरवात् तत्तज्जात्यवच्छिन्नजनकतावच्छेदकत्वेनाभिमतानानुपू
र्वीणामपि ययोक्तधर्माणां प्रतिज्ञादिपदप्रवृत्तिनिमित्तत्वौचित्येन तत्तज्जातिकल्पने प्रवृत्तिनिमित्त
लाघवरूपप्रयोजकस्याप्यनवकाशादिति भावः अननुगमेन तत्तज्जातिघटितलक्षणासंभवात्तल्लक्षणा
नुपपत्तिरूपप्रयोजकस्य दूरापास्तत्वादिति भाववर्णनमनुपादेयं एकैकजन्यबोधवृत्तिजातिमादायैव
स्वरूपयोग्यताघटितलक्षणसंभवात् अन्यथेत्यादिमूलमन्यथा व्याचक्षाणानां मतमाह केचित्त्वि
ति तदेतत् नमन्यथेत्यस्यार्थः कदाचिदिति हेत्वादिजन्य इत्यत्राप्यनुषज्यते तेन परस्परव्यभिचारिता
लाभः स्यादिति वर्त्तत इत्यर्थः नियामकाभावादिति भावः नत्वनियमेन सर्वेष्वेव प्रतिज्ञादिजन्य॰
व्यक्तिवृत्तिजातिमत्त्वसंभवेन परस्परव्यभिचारितायाः दुर्घटत्वान्न संकरावकाश इत्यतो बाधकान्तर
मुद्भावयति सर्वेषामिति सर्वत्र सर्वजातिमत्त्वे जातीनां समनैयत्यादेकत्वापत्तेरुलभ इति सर्वजातीयत्वप्रस
ङ्गोऽसंगत इत्यत आह एकेति इत्थं च विजातीयशाब्दबोधजनकत्वघटितं प्रतिज्ञादिलक्षणमसंभवदु॰
क्तिकमेवेति भावः अत्र चानुगतकारणाभावेप्यननुगतकारणघटितसामग्रीणां जातिविशेषनियाम
कत्वं संभवतीति नोक्तरीत्या जातिसंकरावकाशः अन्यथा अनुमितित्वादिजातेरप्यनियमेन प्रत्यक्षा
दिसाधारण्यापत्तेः तत्रापि व्यक्तिव्याप्यतापरामर्शादीनामननुगतत्वात् अनुगतस्य कार्यस्य चित्कार॰

णस्य संभवेपि तस्यातिप्रसक्तत्वात्तादृशस्य प्रकृतेतिपि संभवाच्च । नच व्यभिचारेण तादृशजात्यवच्छि-
न्नशाब्दबोधप्रत्यनुगतस्य कारणत्वासंभवात् तादृशजातीनां कारणनियतत्वेन संभवतीत्येकस्या-
न्यजातीतीयता प्रत्येगोत्वादीरइति वाच्यं अनुमितौ परामर्शस्येव प्रकृतेप्यनुगतकारणस्य कार्यतावच्छेद-
कसंकोचेन व्यभिचारवारणसंभवादित्यस्यास्तबीजमवधेयं नचानुगतनियामकाभावस्याऽकिंचित्का-
रत्वमनुगतानां तिप्रसक्तरूपमंतरेणइनिरूपमिति मूलासंगतिरिति वाच्यं स्वमतेनुगतनियामकाभावे-
न निर्भरः अपितु न्यायजन्यबोधादौ संकररूपबाधकपर्वेनिवक्तो शक्यते यतस्तादृशबाधकस्य विचारासहत्वेपि
त्वनिविष्टत्वात् इदं च न विहायावधेयं प्रतिज्ञाद्यवयवादित्यादिमूले न जातिविशेषघटितप्रतिज्ञादिलक्षणाभि-
प्रायकं तथासति तादृशप्रतिज्ञादिलक्षणस्यात्रैव निराकृतत्वेन प्रतिज्ञाद्यंशे प्रतिज्ञाजन्यविजातीयज्ञान-
मित्यादिना जातिघटितप्रतिज्ञालक्षणमाशंक्यते नैवदोषेण तन्निराकरणस्य पौनरुक्त्यापत्तेः किंत्ववय-
सामान्यलक्षणपरे प्रत्येकमित्यस्य चावयवांतरासहकारेणेत्यर्थः तेन न्यायजन्यबोधतावाक्यैकवाक्यता-
धीनप्रतिज्ञाहेत्वादिजन्यबोधत्वस्यैव लक्षणमेलनतदात्मकसमुदायेऽतिव्याप्तिशंकानिरासः विजाती-
यत्वं प्रतिज्ञाद्येकदेशजन्यबोधावृत्तिजातिमत्त्वं एतेनावयवैकदेशातिव्याप्तिशंकानिरासः मूले तत्तज्ज्ञान-
कशाब्दत्वं तल्लक्षणमित्येपाठः तल्लक्षणमित्यस्यावयवलक्षणमित्यर्थः एवंचअन्यथेत्यादिमूलस्य-
प्रतिज्ञादिजन्यतावच्छेदकजातीनां परस्परसांकर्यत्वेन घटतेइति यदिलक्षणानुरोधमात्रेण जातिस्वीकारस्त-
दातत्साध्यपक्षहेतुकन्यायादिलक्षणानुरोधेनापि विभिन्नसाध्यादिकन्यायजन्यबोधेष्वपि विभिन्नानां प्र-
तिज्ञाद्येकदेशजन्यबोधाऽवृत्तिनानाजातीनां स्वीकरणीयतयातासांच तथाविधहित्वान्यायादिजन्यबोधे-

गदा॰
ग्रं॰
13

समावेशेन स्वंकीर्णजातिस्वीकारप्रसंग इति तादृशमूलार्थः यदि च संकररूपबाधकभयेन जातिक-
ल्पनासंभवात् जातिघटितन्यायविशेषणादिलक्षणं न संभवतीत्यन्यथैव तन्माध्यमलहेतुकन्याया-
द्यो निवेशनीयाः इत्युच्यते तदा व्याप्याद्युपदवन्यायादिपदस्यापि नानार्थत्वे लक्षणविरहात् सर्वसाधा-
रणन्यायत्वादिनिर्वचनानुरोधेन जातिस्वीकारोऽप्यनुचित इति भावः दीधितिकारस्तु तन्नद्वीजनकश-
ब्दत्वं तन्नलक्षणमिति मूलाशयादभिप्रायेण प्रतिज्ञाहेत्वादिजन्यतावच्छेदकजातीनां न्यायजन्यबोधा-
दौ संकरप्रसंग इति मूलं व्याख्यातवान् तादृशपाठे तन्त्रं ग्रंथस्यावयवसामान्यलक्षणपरत्वानुपपत्तिः ए-
वं च सति अग्रगन्थाभिन्नप्रस्तावे जातिघटितप्रतिज्ञालक्षणविरुद्धत्वप्रतिज्ञाग्रंथे पुनस्तदाशंकेति पर्या-
कथंचिदिति ग्रंथावतारो बोध्यः साध्यपदमनुमितिविधेयवाचकमित्यभिप्रायेण मणिकारकृषि-
ते स्वत्वकारीयप्रतिज्ञालक्षणे साध्यपदस्य प्रकृतानुमितिविधेयविशिष्टार्थपरतां स्वीकृत्यमरिष्माते
मारमाते साध्येति सामान्यतो विधेयत्वस्य धर्मित्वस्य च केवलान्वयितया अवयवांतरे विधेयविशिष्ट-
धर्मिबोधकत्वमतिप्रसक्तं एवं प्रतिज्ञासमानाकारन्यायवहिर्भूतवाक्येपीत्यतः साध्यपदस्य तद्विशेषप-
रत्वेनिर्देशपरस्य च बोधजनकन्यायावयवरूपवाक्यविशेषपरत्वमनुसृत्य पर्यवसितार्थमाह नत्वा-
चेति पक्षतावच्छेदकसाध्यतावच्छेदकयोर्न तत्त्वेन निवेशः अपितु विशिष्टवेति स्वचनायएवं तत्त्वादीति
वह्नित्वादीनि च तादृशविशिष्टवैशिष्ट्यावगाहि शाब्दबोधत्वावच्छिन्नजनकतात्किंविज्ञानविषय-
वर्णसमुदायत्वमिह विवक्षणीयं अतो हेतवेत्यादिविषयकप्रतिज्ञार्थबोधजनकतायाः हेतुत्वरूपवादिमा-
त्रविषयकबोधसाधारण्येपि न हेतुत्ववयवासाधारणव्याप्तिन्यायोनर्गतत्वरूपेऽपि न्यायावयवत्वनिवेशः

तत्प्रतिज्ञार्थबोधजनकप्रतिज्ञाहेत्वादिविषयकज्ञानमादायकज्ञानमादायप्रतिज्ञाहेत्वादिसमु-
दायेनातिव्याप्तिः पक्षतावच्छेदकविशिष्टत्वानिवेशनप्रयोजनमाह उदाहरणाद्येति यद्यपिसाध्य-
तावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानजनकत्वमात्रस्यैवनिवेशउपनयनिगमनयोरप्यतिव्या-
प्तिः तथापियत्किंचिद्धर्मविशिष्टस्वरूपसाध्यतावच्छेदकविशिष्टवैशिष्ट्यबोधजनकत्वनिवेशनेन-
तत्रातिप्रसंगः उपनयार्थव्याप्तिशरीरघटकसाध्यस्यधर्मितावच्छेदकाप्रवेशात् निगमनजन्यबो-
धेचसाध्यांशेहेतुज्ञानज्ञाप्यत्वस्याधिकस्यभानात्तत्रान्यथापक्षतावच्छेदकांशेभावेपिअनुषंगमहत्वेति-
त्वादित्युदाहरणमात्रानुसरणं तत्रापि उदाहरणजन्यबोधेव्यापकत्वेनविधेयतावच्छेदकता-
याभानात् अपितुस्वरूपवह्नित्वाद्यवच्छिन्नमेवसकलहेत्वधिकरणेभानमितिप्राचीनमतमत्रह-
त्वनिगमनेऽपक्षानुषंगपक्षेस्वरूपसाध्यतावच्छेदकविशिष्टत्वेननिविष्टविशेषणांतरावच्छिन्नव-
ह्न्यादिसाध्यकन्यायांतर्गतप्रतिज्ञायांस्वरूपवह्नित्वावच्छिन्नसाध्यकप्रतिज्ञालक्षणातिप्रसंगः प्रकृ-
तन्यायांतर्गतत्वाभावेनैवारणादित्यभिप्रायकमिदंअतोव्यापकत्वस्याधिकस्यउदाहरणजन्यबोधे
भानेपिनक्षतिरितिकेचित् तन्मतेनिगमनोपेक्षाबीजंचिंतनीयं यत्तत्पदस्योदाहरणस्थस्यनपक्ष-
तावच्छेदकावच्छिन्नपरत्वंअपितुपक्षान्यसाध्यवत्तासाधारणरूपावच्छिन्नपरत्वमेवपक्षतावच्छेदकाव-
च्छिन्नहेतुमत्त्वस्यततोलाभेउपनयतत्रयानात्तदवच्छिन्नेसाध्यवत्त्वस्यचप्रतिज्ञातएवलाभेनानाकांक्षि-
तत्वाद्येतिपक्षतावच्छेदकप्रवेशेनोदाहरणातिप्रसंगः अत्रयत्किंचिद्धर्मावच्छिन्नविशेष्यकसाध्यतावच्छेद-
कावच्छिन्नवैशिष्ट्यावगाहिशाब्दबुद्धित्वावच्छिन्नजनकत्वघटोदाहरणैकदेशेसर्ववह्निमानित्यादिवाक्य

गदा॰
ग्र॰
14

पर्वतत्वन्तस्य न्यायावयववत्त्वं तच्च प्रकृतार्थपर्वतत्वतात्पर्यजनकत्वमिति विशिष्टापक्षतावच्छेदका-
न्तर्भावेपि न उदाहरणातिप्रसंग इति नाशंकनीयं जनकत्वस्य जनकयत्किंचिज्ज्ञानविषयत्वमादा-
य उदाहरणसमुदायेऽतिप्रसंगवारणाय उभयघटकभागद्वयाघटितत्वमेव निवेशनीयेन तत्प्रतिज्ञा-
द्यघटकत्वमपि प्रयोजनविरहादुदाहरणैकदेशतादृशवाक्येतिप्रसंगस्य लक्ष्यतात्र प्रकृततरपक्षता-
वच्छेदकाविशिष्टवैशिष्ट्यनिवेशनेनैव वारयितुमुचितत्वात् यद्यप्येवं नीलपर्वतो वह्निमानित्या-
दिप्रतिज्ञैकदेशेन तथेति विशेषोपादाने प्रयासाधिक्येन उदाहरणाद्यावृत्तानामिति ध्येयं साध्यता-
वच्छेदकावच्छिन्नप्रकारकत्वनिवेशप्रयोजनमाह उपनयाद्येति साध्यवैशिष्ट्यमात्रनिवेशेपि प-
र्वतो वह्निमान् धूमादित्यादिन्यायान्तर्गतोपनये तत्स्थलीयप्रतिज्ञालक्षणातिव्याप्तिरिति साध्यताव-
च्छेदकविशिष्टवैशिष्ट्यावगाहित्वनिवेश इत्यवधेयं यथाश्रुतसप्तम्यन्तार्थस्य उदासीनवाक्यसाधार-
णप्रसक्तत्वमेव न्यायान्तर्गतवाक्यजन्यस्येव तदनन्तर्गततादृशवाक्यजनस्यापि शाब्दबोधस्य उपनाय-
कज्ञानादिविधया परामर्शप्रयोजनकत्वात् अतस्तदर्थमाह प्रकृतन्यायावयववत्वेति वह्निव्याप्य-
धूमसाध्यकानुमितेरपि कदाचिदुद्देश्यतया वस्तुमात्राणातिप्रसंगवारणासंभवादुद्देश्यपदं प्रकृतार्थ-
कतया व्याचष्टे उद्देश्येति वह्निसाध्यकन्यायोपनयस्य तत्साध्यकन्यायान्तर्गतोपनयस्यैतदन्-
न्यसाध्यकन्यायमादाय सत्यन्तदलस्याविष्कृतं वह्निव्याप्यधूमसाध्यकेत्यादिना अन्यसाध्यकानुमि-
तिमादाय विशेष्यदलसत्त्वे स्फुटीकृतं वारणाय। प्रतिज्ञाव्यवहारविषयतावारणाय प्रकृतद्वयं प्रकृ-
तिपदार्थं प्रविष्टन्यायानुमित्यादिकसमघटकत्वप्रापकप्रकृतपदद्वयं प्रकृतन्यायावयववत्त्वपर्यन्ता

निवेशे वह्निव्याप्यधूमसाधकप्रतिज्ञाद्यनुरोधेन तत्साध्यकानुमितेरपि प्रकृतपदेन विवक्षणीयत
यातादृशावयवप्रदर्शितोपनये प्रकृतत्वानुमितिपर्यन्ततानिवेशः तथाच सति अभिन्नसाध्यपक्षकन्या
यानुमितिं प्रति भावे यादृशो लक्षणार्थस्तं स्फुटयति तथा चेति यत्तादृशोपनये वह्निव्याप्यधूमसा
ध्यकप्रतिज्ञाव्यवहारवारणाय न्याये वह्निसाध्यकप्रतिज्ञाव्यवहारणाय यानुमितौ प्रकृतत्वनिवेशः
नमितिप्रकृतत्वं यमित्यनार्थः इति निष्कृतेः तत्साध्यपक्षकप्रतिज्ञाव्यवहारविषयस्यात्र निर्वाच्य
त्वे प्रतिज्ञापदार्थघटकन्यायानुमित्या हृभयत्र समभिव्याहृतसाध्यपक्षत्वयतिवेशादृश्च नाप्र
कृतत्वं यत्साध्यपक्षकार्थकमित्यस्याभिधानात् एवं च तत्यानेऽपेक्ष्य प्रतिज्ञाव्यवहारविषयतावच्छे
दकीभूतैकधर्मशरीरे द्विधानिविष्टयोः साध्यपक्षयोरभेदमात्रलाभाय तथा चेत्याद्यभिधाने संदर्भ
विरोधात् यादृशेत्यादेः स्वसेत्यादिः तादृशोत्यादेः स्वनिष्ठमित्यादिः पर्यवसितार्थः प्रतिज्ञापदप्र
तिपाद्यतावच्छेदकतया मूलाभिप्रायविषयः एवं च सति प्रतिज्ञादिपदस्य नानार्थत्वेन दोषापगमेन त
दविरहादिति प्रागेवोक्तं ग्रंथकृतैव तत्साध्यतावच्छेदकावच्छिन्नतत्साध्यकत्वस्य न्यायघटकनिवेश
नेनक्तोपनयप्रवृत्तिप्रसंगः यत्पक्षकानुमितिसमानविषयकत्वं तत्पक्षकन्यायान्तर्गतत्वस्यात्
त्वादिति तन्निवेशनं द्रव्यं व्याप्यधूमवान् धर्मिमिकारकद्रव्यत्वावच्छिन्नसाध्यकोपनयवारणाय
साध्यतावच्छेदकनिवेशनं एतल्लक्षणघटकन्यायावयवत्वशरीरे उदाहरणघटकत्वनिवेशस्य
सिद्धाद्यपि याधीनन्यायप्रयोगानंगीकारपक्षे प्रयोजनं नान्तरविरहात् न्यायघटकत्वमात्रस्य तद्देशास्य
धारणस्य निवेशनोपपत्तावपन्नयादिसाध्यकन्यायान्तर्गतस्य यत्किंचिद्धर्मिकवन्न्यादिसाध्यकानुमि

गदा॰
स्व॰
15

त्यन्यूनानतिरिक्तविषयकबोधजनकस्य तद्वह्निमानित्याद्युदाहृतैकदेशस्य वा वारणाय पक्षधर्मावच्छिन्नपक्षका-
त्वनिवेशनं वस्तुतोऽनुमित्यन्यूनानतिरिक्तविषयकत्वं प्रकृते यत्पक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वे सति तादृश
वैशिष्ट्याविषयिताशून्यत्वरूपमनुमितिमनन्तर्भाव्यैवाग्रे निर्वचनीयतया तत्र प्रकृतपक्षादिनिवेशे व्याहतिर
ग्रे दर्शनीया किं व्याहतिस्तालान्तरानुसारेणेत्यत यत्तु पक्षविशेषमनन्तर्भाव्यानतिप्रसक्तस्य न्यायत्वस्य
दुर्निर्वाचतया पक्षप्रवेशनमिति तदसत् तथा सति हेतुविशेषमनन्तर्भाव्यापि तस्य दुर्वाचतया हेतुक
त्वस्यापि वक्तुमुचितत्वात् यदि च न्यायपदोपादानादेव तदुद्देश्यविशेषनियंत्रितन्यायलाभ इति न तदभिहि
तमिति उच्यते तदा पक्षप्रवेशस्यावश्यकत्वेपि न्यायपदादेव पक्षविशेषनियंत्रितन्यायलाभ इति यादृशपक्षकार
त्वाभिधानस्यानुपपन्नतेति हेतोर्वारणायेति अनतिरिक्तविषयकत्वं पक्षतावच्छेदकविशिष्टे पक्षे यत्साध्यता
वच्छेदकविशिष्टवैशिष्ट्यविषयकत्वं तद्भिन्नलक्षणाविषयिताशून्यत्वेनानुप्रकृतानुमित्यविषयाविषयकत्वं
स्वयमग्रे दूषणीयत्वात् तादृशविषयिताविलक्षणत्वं च तादृशविषयितापर्याप्त्यधिकरणत्वावच्छिन्नातिव
त्त्वावच्छिन्नातिवृत्त्या संशयनिवर्तकतावच्छेदकरूपं निर्वक्ष्यते एवं चोक्तहेत्ववयवजन्यबोधस्यानुमित्यवि-
षयवह्निनिष्ठसूक्ष्मत्वानन्तव्याप्यत्वविषयकत्वेपि तादृशविषयिताविलक्षणविषयताशून्यत्वमक्षतमेवेत्य
तिव्याप्तिप्रसक्तिरिति भावः निगमनवारणायेति निगमनजन्यबोधस्यापि पक्षतावच्छेदकविशिष्टे साध्यावच्छे
दकविशिष्टवैशिष्ट्यावगाहित्वेनान्यूनविषयकतया तिव्याप्तिप्रसक्तिप्रसक्तिरिति भावः निगमनेन तस्माद्व
ह्निमानित्यादिवाक्यसन्निधाने साक्षादिति अवयवान्तरबहिर्भावेनेत्यर्थः नच्च्यतइति तयावाक्यं तज्जन्य
बोधस्यापि पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वेनान्यूनविषयकतया तिव्या

प्तिप्रसक्तिरितिभावः निगमनेतस्याहृक्तिमानित्यादिवाक्यसन्निधानेसाकाङ्क्षादिति अवयवांतरबहिर्भावेनेत्य
र्थः नआश्रयतइत्तितथाचकार्यतज्जन्यबोधस्यान्यूनविषयत्वमितिभावः न्यूनताभंगावशाकांक्षायारणायप्रस
क्तावच्छेदकविशिष्टपक्षेताहृशसाध्यवत्ताबोधनकत्ताहृशवह्निमानित्यभिधानेचताहृशकांक्षाउत्सर्गतो।
जायतइत्यत्रभवसिद्धमेवेतिभावः अन्वयंगादिति निगमनसमभिव्याहृतत्वेनानुसंधानोपगमादित्यर्थः त
थाचतदंतर्भावेनैवनिगमनावयवत्वंपर्यवस्यतीत्यन्यूनविषयकबोधजनकन्यायावयवत्वमादायताहृशसङ्
ग्रहायातिव्याप्तिप्रसक्तिरितिभावः निगमनंचनपरामर्शहेतुरिति यथाश्रुतानिमङ्गलग्रंथस्यसत्वंतदलवि
रहेणनिगमनेनातिव्याप्तिरित्यर्थपरत्वेप्रतीयतेतच्चनघटतेसत्वंतस्यन्यायावयवत्वोच्छेदेतस्यचनिगमन ते॰
साधारण्यात् यथाश्रुतस्यापिसत्वंतार्थस्यप्रतिज्ञायामिवतत्राप्यसत्वात् अनतिरिक्तविषयकत्वविशे
षणेनैवतद्वारणाच्चेत्यनतिरिक्तविषयकत्वविशेषणस्यनिगमनातिव्याप्तिवारकतापरत्वेनताहृशग्रंथम
त्रैवव्याख्यातंभूमिकामारचयतीतिरहस्यमेवचेति अन्यूनानतिरिक्तेति तथाचन्यायावयवत्वपर्यवसितः।
परामर्शप्रयोजकशाब्दज्ञानकत्वेसत्येपिअन्यूनानतिरिक्तविषयकज्ञानकत्वेनास्तीतिपर्यवसितार्थः अबा
धितत्वादिपरतायाउदीच्यतद्वेधेनापिनिर्वाहान्निगमनजन्यशाब्दबोधेतज्ज्ञानार्थलक्षणादोषेनयत्नइति।
मूलोक्तं तद्विषयकतयातिरिक्तविषयकत्वेनविचारसहत्वंप्रपंचसंतभागार्थस्यातिरिक्तस्यविषयतायाः
तथात्वाप्रतिपादनेनन्यूनत्वंचेत्यतःसूचयति तद्बोधोपयिकेतिअबाधितत्वादिबोधोपयिकेत्यर्थः विशिष्ट
हेतुसंबंधस्यव्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानज्ञाप्यत्वस्यतस्यचाबाधितत्वादिव्याप्यतयातद्बोधोपयिकत्वे
बोधं मिश्रास्तत्रपत्यस्यातिपवित्रिति पृथिवीतरेभ्योभिद्यतेइत्यसमस्तेइतरपदेपृथिवीतरपदेयत्तादिसंबंधि।

गदा. ग्र. कार्यबोधकपदानां समभिव्याहृतपदोपस्थाप्यत्वतद्दर्शनेत्यादिना निरूपकलक्षणश्रुतोवादिवाक्येत्वारसिक-
लक्षणाविरहेपिनक्षतिः प्रतिज्ञायां सर्वत्रपक्षेनेवपदेन साध्यादिनिर्देश इति नियमः तेनाप्रमेयत्वपृथिवीतरेभ्यो
16 भिद्यते इत्युदाहरणप्रयोगाविरोधः विशेष्यवाचकं पृथिवीतिपदं तत्र स्मरणीयं श्रुतपदं समस्तमित्येव वा उदाहरण
वारणायतितज्जन्यबोधेपि पक्षसाध्याश्रयताकत्वसंबंधरूपानुमितिविषयसकलपदार्थभानेनान्यूनविषय-
कत्वादित्यभिमानः तत्रअनतिरिक्तेतिअन्यूनविषयकत्वंहिनप्रकृतानुमितिविषयिताव्यापकविषयताकत्वंसर्-
वस्मात्कालत्ववानयंकालपरिमाणवान्सर्वस्मादित्यत्रहेत्ववयताकत्वे सर्वस्मात्कालत्ववानयंकालपरिमाण
वान्सर्वस्मादित्यत्रहेत्ववयवेतिव्याप्तेः नापिपक्षतावच्छेदकविशिष्टपक्षविषयकत्वंहेतुत्वंप्रमेयत्वाद्घटत्ववत्
मेयत्वादित्यादौहेत्ववयवेतिव्याप्तेः नापिपक्षतावच्छेदकविशिष्टविषयकत्वेसतिसाध्यतावच्छेदकविशिष्टविष-
यकत्वंतद्विशिष्टविषयकत्वंवाप्रमेयहेतुत्वंप्रमेयंप्रमेयादित्यहेतावतिव्याप्तेः तज्जन्यबोधेप्रमेयत्वत्वरूप
साध्यतावच्छेदकविशिष्टस्यप्रमेयपदार्थतावच्छेदकस्यधर्मिणोवैशिष्ट्यभानादितिपक्षतावच्छेदकविशिष्टे
साध्यतावच्छेदविशिष्टवैशिष्ट्यावगाहित्वंतद्वाच्यंतथाचनोक्तोदाहरणेतिव्याप्तिरित्याशयेनदूषयति नन्वव्याप्ति
तिनत्वअंतः पृथिवीपदस्याविशेष्यपरत्वेइतरपदस्यपृथिवीतरपरत्वमवगत्यतादृशोदाहरणात् पृथिवीत्वविशि
शिष्टेसाध्यवत्त्वप्रत्येतीतितत्रातिव्याप्तिप्रसक्तिरित्यतआह तात्पर्यभ्रमेणेतितादृशेतिअन्यूनविषयकेत्यर्थः अ-
अतिप्रसक्तत्वात् तथाचायमित्याकारकसाध्यवत्त्वपरत्वतात्पर्यभ्रमविषयसर्वनामपदघटितोपनयेतिव्याप्त
त्वात् तात्पर्यभ्रममादायापिनातिव्याप्तिरित्याह नचतावतापीति उदाहरणसोदाहरणत्वपर्याप्त्यधिकरण-
स्यपञ्चेत्यादेः पञ्चेत्यादिभागार्थस्यानन्वयात् पृथिवीपृथिवीतरेभ्योभिद्यते इत्येतादृशबोधेऽप्रवेशात् तथा

चान्यूनविषयकत्वात्तादृशबोधजनकत्वमेकदेशस्यैव नतु यत्रेत्यादिघटितसमुदायस्यैकदेशस्यतन्न्यायावयवत्वाभावादे
वनातिप्रसक्तिशंकान्यायांतर्गतत्वस्यैकदेशस्यातादृशस्य निवेशे चानतिरिक्तविषयकत्वनिवेशेपि तादृशोदाहरणैकदेशेप
वातिव्याप्तिरिति भावः तात्पर्यं भ्रमेणैव यत्रेत्यादिकं मतभेदाय यत्र पृथिवी इतरेभ्यो भिद्यत इत्यन्वयबोधः संभवतीति ना
शंकनीयं जलं न द्रव्यं गंधवदित्यादितो जलभिन्नं गंधवदित्यन्वयबोधस्यानुभवविरुद्धतया नञर्थादेः प्रतावच्छेदकक
बोधस्याव्युत्पन्नत्वात् यदितरभिन्नं पृथिव्यन्यदित्याकारकोपरस्थविशेष्यकबोधोपि न संभवति अयं न पचतिपुरु
षइत्यत्र इदं पदार्थे पाककर्तृत्वरूपभेदबोधस्यानुभवविरुद्धतयाभावप्रतियोगितावच्छेदकत्वेनाव्युत्पन्नार्थभानस्य पचति
चैत्र इत्यायमित्यादितः पाककर्ता चैत्रादिसादृश्यबोधस्यानन्तभवेनेतरविशेषणतया तज्ज्ञानस्यैवाव्युत्पन्नत्वात् अत्र
केचित् अन्यूनविषयकत्वे पक्षतावच्छेदकविशिष्टविषयकत्वे सति साध्यतावच्छेदकविशिष्टविषयकत्वमेव नतु
पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वं च दर्शितव्याप्तेरेवं दाहरणजन्यबोधस्यापिता
दृशान्यूनविषयकत्वसत्वादतिव्याप्तिः प्रसज्यते न चैवमपि साध्यतावच्छेदकविशिष्टसाध्यघटितवाक्यार्थबोधकत्व
मुदाहरणैकदेशस्य न तु तत्र पृथिवीत्यादिभागघटितसमुदायस्येत्यवत्वविशेषणप्रवेशादेव नातिव्याप्तिशंकेति वाच्यं
तादृशान्यूनविषयकत्वघटितधर्मावच्छिन्ननिरूपितजनकतापर्याप्तेर्निवेशात् वाक्यार्थद्वयविषयकसमूहालंबन
बोधजनकतामात्रायसमुदायातिव्याप्तेः प्रसंजनान्न हि तादृशसमूहालंबनबोधजनकत्वमेकदेशे पर्य्यवस्याति
अपितु समुदाय एव अस्य चान्यायांतर्गतत्वमेव सत्यं तात्पर्यः अत एव मिश्राणां घटशब्दोऽगुणः द्रव्यकर्मान्यत्वे सतिस
त्वादित्यत्रोदाहरणे यदि प्रतिज्ञाद्यपशब्द एव हेतुत्वेनोपादीयते तदा न जातिव्याप्तिवारणार्थं कत्वादित्यादिना शाब्द
ज्ञानपदस्य व्याहृत्तिदानसंगतिः तद्दानेन जातिव्याप्तिप्रसक्तिः विषयविधया श्रावणप्रत्यक्षजनकत्वात् तादृशाद्

गदा.
ग्रं.
17

ष्यंतद्रूपशाद्बस्येति पक्षतावच्छेदकाविशिष्टविषयकत्वमेवान्यविषयकत्वं एवंच तादृशोदाहरणैकदेशाति-
व्याप्तिवारणायैव साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकमात्रावच्छिन्नसाध्यप्रकारकत्वार्थकमनतिरिक्त-
विषयकेति तज्जन्यबोधस्य साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकसंबंधेन साध्यप्रकारकत्वमात्रपरा-
र्थांतर्भावन्निगमनव्युदासः तज्जन्यबोधविशिष्टहेतुसंबंधस्यग्रकस्य साध्यांशे भानेनत्रुइ साध्यतावच्छेद-
कावच्छिन्नसाध्यप्रकारकत्वात् एवं वह्निव्याप्यधूमवानयमित्याद्युपनयजन्यबोधस्य व्याप्तिघटिकाधिकर-
णांशे साध्यतावच्छेदकावच्छिन्नप्रकारकत्वेपि साध्यांशे व्यापकत्वस्याधिकस्य भानेन न तत्राव्याप्तिप्रसंगः नचैव-
मपि यत्र पृथिवीतरान्यादित्याद्युदाहरणैकदेशेति प्रसंगः तज्जन्यबोधे पक्षतावच्छेदकाविशिष्टपक्षविषयकत्व-
स्यञ्ज साध्यतावच्छेदकविशिष्टसाध्यप्रकारकस्य च सत्वादिति वाच्यं पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वा-
वच्छेदेन तादृशसाध्यप्रकारकत्वस्य दलद्वयनिष्प्रयोजनार्थत्वात् तादृशोदाहरणभागजन्यबोधस्यैतदभेदांशे-
निर्द्धर्मितावच्छेदकतया तादृशसाध्यप्रकारकत्वविरहात् साध्यतावच्छेदकसंबंधनिवेशनं च यत्र कालिकसं-
बंधेन कालपरिमाणस्यैदत्वादेः साध्यतासमवायेन च तस्यैव हेतुतानत्रस्योपनयीयव्याप्यतातिरिक्तभागवा-
रणायेति साध्यधियिषयावत्या प्रयोगानभ्युपेयत इति यत्र साध्यतावच्छेदकाविशिष्टस्य साध्यतावच्छेदकसंबंधे-
नैव हेतुता तत्रान्योपनयीयतादृशभागेतिप्रसंगइत्यस्यानवकाशः नचैवमपि निगमनीयतस्मादित्यंशातिरिक्तांशेन व्याप्तिड-
वीरैवेति वाच्यं तस्मादित्यंशार्थमनंतर्भाव्य व्यवहितयोः पक्षसाध्यवाचकपदयोरन्वयबोधाजनकत्वादिति रीत्या उक्तस्थलेपि
व्याप्तिन्निदानं संगमयंति अपरपदानन्तुषंगमतेति निगमनेः नतिरिक्तविषयकत्वव्याप्तिर्विनं संगच्छत इत्याशंकते पादिचेति अथ
मादीत्यादिना इदमियामित्यादिपरिग्रहः वाक्यैकवाक्यतयेति उपनयनिगमवाक्ययोरेकवाक्यतयेत्यर्थः विशिष्टलाभात् प

त्तावच्छेदकविशिष्टेसाध्यवत्तालाभाद्विशिष्टाकांक्षानिवृत्तेः नचपक्षत्ववाचकपदानुषंगेन तस्मात्तेनराणीत्यादिनिगमनवि
रोधः अनुयोगिमिश्रितनञर्थशाब्दबोधस्यानुत्पत्तेस्तयातन्मात्रस्याऽबोधकत्वेनवाक्यत्वाभावादितिवाच्यं पक्षनाम्नतेनादृश
निगमनानभ्युपगमात् यद्यप्यनतिरिक्तविषयकत्वानिवेशोऽन्यूनविषयकबोधजनकत्वंतज्जनकज्ञानविषयत्वंवान्यायव
त्वविशेषितंप्रतिज्ञाहेत्वादिजन्यबोधमादायहेत्वादावतिप्रसक्तं तथापिप्रकृतपक्षेप्रकृतसाध्यवैशिष्ट्यावगाहित्वरूपा
न्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किंचिज्ज्ञानविषयतावद्वर्णसमुदायत्वनिवेशनेनायं
दोषइतिस्थलांतरेव्यावृत्तिमाह तदेत्यादिना भानेज्ञानेसामान्यतःअधिकरणत्वरूपसामान्यधर्मावच्छिन्नेविशेषरूपान
वच्छिन्नइतिवासाध्यवत्त्वभानात् साध्यवत्त्वविषयकत्वात् उपनयस्यवारणायनादितियोजना पक्षेसाध्यवैशिष्ट्यावगाहित्व
मेवान्यूनविषयत्वंनतुपक्षतावच्छेदकवैशिष्ट्यांतर्भावइत्यभिप्रायेणेदंप्रमेयाद्वाच्यत्ववानयंप्रमेयःप्रमेयादित्यादिवदप्र
माणहेतुवारणायपक्षतावच्छेदकवैशिष्ट्यांतर्भावस्यावश्यकइतितदंतर्भावाभिप्रायेणस्थलांतरेव्यावृत्तिमाह यत्रचेतिप
देति पक्षस्यतद्रूप्येणपक्षतावच्छेदकप्रकारेणदृष्टांततयायत्रोपन्यासस्तत्रोदाहरणस्यसाध्यस्यचतद्रूप्येणसाध्यताव
च्छेदकप्रकारेणहेतुतयायत्रोपन्यासस्तत्रोपनयस्यचवारणायनतदित्यर्थः रूपांतरेणपक्षसाध्ययोर्दृष्टांतत्वहेतुत्वेनोप
न्यासेदर्शितान्यूनविषयकत्वासंभवइतितद्रूप्येणेति ननुपक्षेसाध्यनिश्चयदशायामेवतादृशादृष्टांतत्वहेतुत्वसंभवइ
तिसंशयाभावान्न्यायप्रयोगएवनसंभवतीत्यतआह तादृशासिषाधयिषयेतिजल्पस्थलेसंशयस्याऽवश्यकत्वेपिवादस्थलेनतथे
तिसंशयमंतरेणाप्यनुमित्साधीनानुमितिनिर्वाहायन्यायप्रयोगसंभवादितिभावः ननुसिषाधयिषयान्यायप्रयोगोप
गमेपंचम्यर्थहेतुत्वेयादृशासंबंधेनप्रकृतार्थान्वयस्तत्संबंधे नवह्निसाध्यकहेतुत्वपक्षकवह्निहेतुकन्यायांतर्गतहे
त्ववयवेनिव्याप्तिइवौरैवेतिसिषाधयिषयान्यायप्रयोगानांगीकर्तव्यइत्यतउक्तव्याव्यावृत्तिर्नसंगच्छतेइत्यतःस्थलांतरा

ग॰टी॰
ग्र॰

18

मनुसरति यत्रवेति पर्वतत्वसामानाधिकरण्येन साध्यसिद्धेर्यत्रोद्देश्यतातत्रैतत्पर्वतत्वेनापिदृष्टांततानसंभवतिपर्वतत्वावं
च्छेदेनसाध्यवत्वनिश्चयस्यापितादृशानुमितिविरोधित्वात् अतः प॰र्वतत्वावच्छेदेनेतियद्यपिपर्वतत्वावच्छेदेनवह्निमत्वाव॰
गाहित्वात्तदनुमितौपर्वतत्वव्यापकत्वस्याऽधिकस्यावच्छेदकतयाभानात्तादृशादृष्टांतत्वादितोदाहरणजन्यबोधेचनतद्भानात्तस्या
नुमितिन्यूनविषयकत्वमेवतथापिपक्षतावच्छेदकविशिष्टेसाध्यतावच्छेदकविशिष्ट्यावगाहित्वरूपंतन्निर्वाच्यमन्यूनविष
यकत्वमत्राह तमेवेतिभावः यद्यपिपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वा
वच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयतानिवेशेउदाहरणैकदेशपक्षतादृशविषयतानतुसमुदायइतिन्याया
वयवत्वनिवेशान्नातिव्याप्त्यवकाशः तथापिइहप्रतिज्ञामात्रघटकत्वाऽगर्भन्यायावयवत्वंप्रकृतलक्षणेप्रविष्टंतत्त्व॰
यथायंपर्वतः इत्याद्युदाहरणैकदेशोपीत्याशयः अवच्छेदेनसाध्यकन्यायनिविष्टप्रतिज्ञालक्षणेचअवच्छेदकावच्छेदेन
साध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वनिवेशनेनैतद्व्यावृत्तिसंगतिरित्यपरितोषेणव्याख्यांतरमाह सत्यंतस्यैवे
ति यद्वारालक्षणघटकन्यायावयवत्वशरीरे उभयघटकभागद्वयाघटितत्वेननिवेशनीयंअनतिरिक्तविषयकत्वविशे
षणेनैवतादृशभागद्वयघटितसमुदायातिप्रसंगवारणात् नचशाब्दत्वानस्यैवशाब्दबोधजनकतयाजनकत्वमत्रज्ञापक
ज्ञानविषयत्वमेववाच्यं एवंचतादृशसमुदायविषयकज्ञानमप्येकदेशप्रतिज्ञाविषयकत्वेनतथाविधबोधजनकमि
तिसमुदायेतिप्रसंगइतिवाच्यं तत्तादृशबोधजनकतावच्छेदकीभूतयत्किंचिदेकज्ञानविषयतानिरूपकवर्णसमुदाय
त्वस्यैवविवक्षणीयत्वात् नचतादृशवर्णसमुदायत्वंतादृशवर्णत्वव्यापकसमुदायत्वंतादृशंचप्रतिज्ञाहेत्वादिसमुदाय
त्वमपीतितत्समुदायेतिप्रसंगएवेतितादृशभागद्वयाघटितत्वमवश्यमेवनिवेश्यमितिवाच्यं अनतिरिक्तपदसार्थक्यायता
दृशयत्किंचिदेकज्ञानविषयताशालिवर्णत्वसमनैयत्यमेवनिवेश्यप्रतिज्ञाहेत्वादिसमुदायत्वस्यवारणीयत्वात् समाना॰

र्थकप्रतिज्ञाद्वयादिविषयकयत्किंचिज्ज्ञानविषयत्वाश्रयवर्णत्वसमनैयत्यवत्तादृशप्रतिज्ञाद्वयादिपर्याप्तसमुदाय
त्वेपि न क्षतिः तदुभयाभावेपि प्रतिज्ञाव्यवहारात् अपि तु प्रतिज्ञैकदेशस्यापि तादृशबोधनिष्ठवाक्यसंबंधिबुद्धित्वाव
वच्छिन्नजन्यतानिरूपितजनकताच्छेदकीभूतयत्किंचिदेकज्ञानविषयताश्रयवर्णसमुदायत्वमादायैव प्रतिज्ञात्व
प्रसंग इति प्रतिज्ञाघटकत्वं प्रतिज्ञामात्रघटकत्वमेव वा निवेशनीयं अन्यूनानतिरिक्तविषयकशाब्दबुद्धित्वस्य यत्किं(
चिज्जन्यतानवच्छेदकतया तदवच्छिन्ननिरूपितजनकतानिवेशासंभवात् इत्थं चानुषंगपदेन मयं तस्माद्वह्निमानि
तिभागे प्रतिज्ञादिहेतुत्वं तद्भागेपि च व्याहृतिः संभवतीत्याशयेनाह सत्यं तस्यैवेति अवयवघटकेति न च तदुपादानेपि धू
मादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञार्थमात्रविषयकबोधनिष्ठधूमविशेषितहेतुत्वविषयकशाब्दत्वाव(
च्छिन्नकारणधूमादिनिष्ठहेतुत्वविषयकज्ञानीयविषयतामादायावयवघटके तादृशहेतावतिव्याप्तिवारणाय नातिरि(
क्तविषयकबोधनिष्ठफलतावच्छेदकावच्छिन्नविशेष्यकसाध्यवच्छेदकाविशिष्टवैशिष्ट्यावगाहित्वरूपान्यूनविष
यत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णसमुदायत्वनिवेशस्याव(
श्यकतया अवयवघटकत्वनिवेशननिष्प्रयोजनमिति वाच्यं तादृशहेतुवारणायावयवघटक इत्यनेनावयवैक
देशमात्रविषयकज्ञाननिष्ठजनकताव्याहृतावयवत्वपर्याप्त्यवच्छेदकयत्किंचिद्धर्मव्यापकविषयताकान्यज्ञानवृ
त्तित्वावच्छिन्नभेदस्यैवान्यूनानतिरिक्तविषयकबोधजनकतायां विवक्षणीयत्वात् अवयवत्वं चेदं न्यायांगत्वविशे
षणमुक्तं तेन प्रतिज्ञासमानाकारोदासीनवाक्यज्ञानेनिरुक्तप्रतिज्ञाज्ञानोपकारकतायाः सत्त्वेपि तत्संग्रहातादृशो(
दासीनवाक्येपि तथाविधत्वप्रसक्तेः वस्तुतस्तु अवयवत्वघटकविशेष्यदलपरित्यागसंभवेपि तत्परित्यागस्य प्र
कृतानुपयुक्तत्वमित्येतल्लाभायैव अवयवघटकेत्यभिहितमिति केचित्तु यत्र प्रतिज्ञैकदेशस्यापि कथंचित्प्रतिज्ञा स(

ग॰
ग्र॰
19

मान्वर्थकत्वं संभवति तत्रैकदेशेऽतिप्रसंगवारणायावयवावच्छेदकत्वनिवेशनमावश्यकमित्याहुः तदसत् प्रतिज्ञाप्रतिपा
द्यविशिष्टार्थबोधकतायाएकदेशे संभवेऽतिमितान्मात्रस्य तथाविधबोधपरत्वाभावात् थात्वे समुदायप्रयोगानुपपत्तेः क
थंचिन्नत्मयोगे वैयर्थ्येन समुदायसंभावान्यायत्वानंगीकारात् अप्रकृतार्थपरवाक्यवारणाय च वास्तवतथाविधतात्प
र्यसत्त्वायालक्षणे एव पर्याप्तनिवेशनीयतायाएकदेशमात्रस्य तादृशार्थपरत्वाभावेनातिप्रसंगानवकाशादिति कथितानु
नविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतानिवेशेन तज्ज्ञानप्रतियोग्यविशिष्टार्थबोधकतामादाय केवलहेत्वादाव
तिव्याप्तिवारणस्योक्तत्वात् हेतुमात्रनिगमनमात्रेऽपि दितेऽप्राप्न्यूनानतिरिक्तविषयकेत्यस्य प्रकृतानुमितिविषयस्यानु
नः सत्त्वेनातिरिक्तो विषयो यस्य निश्चुत्पत्ते रनुमितिविषयनिष्ठभेदप्रतियोगितानवच्छेदकत्वे सत्यनुमितिविषयातिरि
क्ताऽवृत्तिर्यद्विषयत्वं तत्त्वमिति यथाश्रुतमादाय नियमपीति यद्यपि प्रकृतपदतावच्छेदकावच्छिन्नपदार्थप्रकृतसा
ध्यतावच्छेदकावच्छिन्नविषयकयत्किंचिदनुमित्यविषयविषयकत्वपर्वतो वह्निमानित्यादिप्रतिज्ञः जन्यानिखिलबो
धानामेवेतितादृशानुमितिविषयत्वसामान्याभावो विवक्षणीयस्तथा च केवलाभिधेयत्वावच्छिन्नपदकस्थलेऽव्याप्ति
रिक्ताप्रसिद्धिरस्त्येव तथाप्यप्रसिद्धिः स्फुटोकर्तुमभिधेयत्वावच्छिन्नपदसाध्यकस्थले विशेषमेवानुमितिविषयइत्येत
ल्लाभायसर्वमित्युक्तं सर्वेभ्योदशसंपूर्णमासाविश्यत्रैव प्रकांतकतिपयपदार्थमात्रबुद्धिसर्वत्वावच्छिन्नतात्पर्येणापि विशे
ष्यवाचकपदांतरमभिधाय तत्सर्वपदप्रयोगसंभवात् सर्वं प्रमेयमित्युक्तोऽप्यनुमितिविषतायाः केवलान्वयित्वाला
भात् अभिधेयमित्युक्तं एवं चाकिंचिद्धर्मावच्छिन्नांशे भेदसंबंधेन स्वार्थविशेषणकबोधपरसर्वशब्दस्य तद्धर्मव्यापकविधे
यव्याप्यसर्वत्वबोधकत्वाभ्युपगमे ऽभिधेयत्वाव्यापकसर्वत्वलाभानानुमितेः कतिपयवस्तुमात्रविषयकत्वशंकेति भा
वः अतिरिक्ताप्रसिद्धिः प्रकृतानुमितिविषयातिरिक्ताप्रसिद्धिः प्रमेयत्वं पदनिष्ठाभावप्रतियोगितावेति संशयसंभवेनता

दृशप्रतिज्ञासंभव इत्यत आह तत्संग्रहायान्यानानतिरिक्तविषयकत्वमन्यथानिर्वह्निप्रकृतेनेति स्वविषयताव्यापकप्र
कृतानुमितिविषयिताव्यापकविषयताकत्वमित्यर्थः स्वविषयेऽनुमितिविषयान्यूनत्वस्य स्वविषयत्वे तद्विषयत्वव्या
पकत्वपर्यवसितत्वात् स्वविषयेऽनुमितिविषयानतिरिक्तत्वस्यानुमितिविषयत्वे स्वविषयत्वे स्वविषयताव्याप
कत्वपर्यवसितत्वादिति भावः यद्यपि समूहालंबनात्मकपर्वतपक्षकवह्निविधेयकानुमितिविषयताया विश्व
हृत्तेन वा पर्वतो वह्निमानिति प्रतिज्ञामात्रजन्यबोधान तादृशानुमितिविषयतासमनियतविषयताकः वाक्यांत
रसहिततज्जन्यसमूहालंबनबोधजनकयत्किंचिद्ज्ञानाविषयवर्णसमुदायत्वं च न तन्मात्रपर्याप्तं यत्किंचित्यज्ञाता
नुमितिव्याप्तिविषयत्वासमनैयत्यस्याविवक्षणेऽपि च निगमनाद्यतिव्याप्तिर्दुर्वारैव तज्जन्यबोधस्यापि पर्वतो वह्निमा
न् धूमज्ञानज्ञाप्यवह्निमांश्चेत्याकारकसमूहालंबनानुमितिविषयितासमनियतविषयताकत्वात् तथापि प्रकृ
तपक्षकप्रकृतसाध्यव्याप्यवत्तापरामर्शत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकविषयतासमनैयत्यं तत्त्वम्
विवक्षितत्वान्न दोषः नन्वेवं सति लिङ्गस्य लीयोपनयेऽतिव्याप्तिः तज्जन्यबोधस्यापि विश्वविषयकत्वेन तथाविधानुमि
तिविषयतासमनियतविषयताकत्वादित्यतो विषयतापदस्य प्रकारतापरत्वाभिप्रायेणान्यथा तदर्थानिर्वृतिप्रकृ
तेतिना दृशोपनयजन्यबोधे प्रकारीभवतोऽभावत्वादेस्तादृशानुमितावप्रकारत्वात् न तत्प्रकारतायाः समनैयत्यप्र
मितिनातिव्याप्तिरिति भावः सकलाभिधेयवृत्तिधर्मवदिदं ज्ञेयमितियोजनातादृशानुमिताविवपनतस्य लीयोपनयज
न्यबोधे विश्वस्यैवाभिधेयत्वेन प्रकारतया तत्प्रकारतायाः समनैयत्यमक्षतमेवेति भवत्यतिव्याप्तिरिति भावः ननु
विशेषणानवच्छिन्नप्रकारतानां समनैयत्यं विवक्षणीयमतो नातिव्याप्तिः उपनयजन्यबोधे भावत्वादौ तादृशप्रकार
तासत्त्वादज्ञानानुमितेस्तादृशप्रकारतायास्तत्रासत्त्वादित्यतो नानुमितावपि तेषां तथाविधप्रकारतासमुदयस्यालाभेनेति

ग॰
अ॰

२०

व्याप्तिमाह सकलाभिधेयेति अत्राभाववत्त्वप्रतियोगित्वाभावादीनां स्वरूपतः पक्षतावच्छेदकत्वाद्भवति तथानुमितिरिति भावः इत्थमिति विपरीतकोटिप्रसिद्ध्यर्थं विशिष्टपक्षबोध इति उपनयस्येदंपदेन विशेष्यमात्रपरामर्शेऽन्यूनविषयकत्व न संभवतीति भ्रमनिराकरणाय व्याप्तिशरीरे साधनासाध्यप्रकारेणैव तदधिकरणान्तर्भावः नत्वधिकरणत्वेनापीत्य नुमितौ तस्यैवास्वरूपतः प्रकारत्वविरहेऽपि नासंगतिः हेतुरप्यत्रेदंत्वं समवायेन द्रव्यमेव वा बोध्यं गुणादेस्तथात्वे हेतुतावच्छेदकगुणत्वादेः स्वरूपत उपनयजन्यबोधे भानेऽकथितप्रकारतासमनैयत्यानुपपत्तेः न चाभेदेन विषयतासम मनैयत्यतोक्तावनुमितिविषयतात्वसमनियतत्वविषयतात्वकत्वोक्तौ वा नायं दोष इति वाच्यं हेत्वर्थघटितार्थकप्र तिज्ञाघटितन्यायान्तर्गतहेतुजन्यबोधविषयतामनुमितिनिरूपितविषयितात्वाभावादनुमितिविषयतात्वव्याप्यवि षयतात्वकत्वाभावादेव तादृशबोधवारणसंभवेनान्यूनविषयताकत्वांशवैयर्थ्यापत्तेः नहि साध्यतावच्छेदकाव च्छिन्नसाध्यविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयताबहिर्भूतविषयताऽनुमितिनिरूपिता समूहालम्बनानु मितिनिरूपितत्वमादाय नातिप्रसंगावकाशः प्रकृतपरामर्शजन्यतावच्छेदकविषयतात्वस्यैव निवेशनीयत्वात् अ न्यथाऽसंभवापत्तेः इति उपनयविशेषणं व्याप्त्यनभिधाने चोपलक्षणपरं अन्यूनविषयकेत्यस्य निष्कृष्टार्थकत्वे सर्व स्मात्कालत्ववानयं कालपरिमाणवान्सर्वस्मादित्यत्र हेत्ववयवेनाप्यतिव्याप्तिबोधात्तज्जन्यबोधविषयताया वि शिष्टज्ञानत्वेनानुमितिविषयताव्यापकत्वात् एवं तादृशान्यूनविषयकत्वस्य किंचिज्जन्यतानवच्छेदकत्वेन तदवच्छि न्नजन्यताविवक्षणासंभवेन प्रतिज्ञाहेतुजन्यसमूहालम्बनबोधमादाय तन्निष्ठहेत्वर्थविषयकत्वावच्छिन्नजन्यतानि रूपितजनकताश्रये धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादौ हेत्ववयवेऽप्यतिव्याप्तिरीदृशीरागस्याऽनवच्छिन्न प्रकारताकत्वविवक्षयापि वारणासंभवादित्यपि बोध्यं पक्षदोषवारणाय प्रथममतोऽनुमित्यन्यूनविषयकत्वमन्यथा

निर्वह्नितथापिप्रकृतेनेतिपत्तद्रूपप्रत्यतावच्छेदकविशिष्टार्थकंतदनुपादानेप्रमेयाद्वाच्यत्ववानयंप्रमेयःप्र
मेयादित्यादौहेत्ववयवेयत्किंचिद्धर्मावच्छिन्नतोपादानेत्यपिघटान्यत्ववद्रूपघटान्यतरस्मात्घटान्यत्ववत्
धर्मात्घटगोत्वघटान्यत्ववानित्याकारिकायासामानाधिकरण्यसंबंधेनघटान्यत्वसाध्यकप्रतिज्ञानहृद्वदितन्यायां
नर्गतेद्रूपघटगान्यतरत्वावच्छिन्नाशेसमानाधिकरण्यसंबंधेनविशेषणतापन्नाघटान्यत्ववदितिनताहृशसंबंधा
वच्छिन्नहेततताकविशिष्टान्यतरद्रूपेहेतुप्रतियोगिकेहेत्ववयवेतिव्याप्तिः घटत्वादौसामानाधिकरण्यसंबंधेन
द्रूपवतिव्यभिचारकतयाघटान्यत्वात्मकविशेषणस्यधर्मिभेदेनविशेष्यस्यचगान्यतत्समानाधिकरण्यसत्ता
सत्तासमानाधिकरणेघटद्रूपादौव्यभिचारवारकतयाचविशेष्यतावच्छेदकस्यसार्थकत्वमित्यवधेयं।सामा
नाधिकरण्यसंबंधस्यवृत्त्यनियामकतयाव्यापकत्वावच्छेदकत्वेपिनित्यद्रव्यावृत्तिधर्मशून्यत्वनिवेशनेनित्यं
नित्यद्रव्यावृत्तिधर्मशून्यत्वात् वह्निमत्पर्वतावृत्तिधर्मशून्यत्वादालोकवान्पर्वतोवह्निमान्वह्निमत्पर्व
तावृत्तिधर्मशून्यत्वादित्यादौहेत्ववयवेतिव्याप्तिवारणायपदतावच्छेदकवैशिष्ट्यनिवेशनमावश्यकं।प्र
खंडाभावघटकतयाहेतुघटकतयाहेतुघटकद्रव्यत्वपर्वतत्वादीनामवैयर्थ्यंसाध्यतावच्छेदकविशिष्ट
साध्यनिवेशनप्रयोजनमाह पंचम्यर्थेति हेतुत्वेप्रमेयाद्वाच्यत्ववत्प्रमेयादित्यादौहेतुजन्यबाधस्याविभ
न्नर्थहेतुत्वेप्रमेयाद्यात्मकप्रकृत्यर्थवैशिष्ट्यावगाहित्वेपिप्रकृत्यर्थेनसाध्यतावच्छेदकविशिष्टवैशिष्ट्या
नवगाहित्वान्नातिव्याप्तिरित्यर्थः पदतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्र
कारकत्वाकत्वमेवपर्यवसितार्थः।संबंधविशेषस्यैतद्दलेनप्रवेशःप्रयोजनविरहात् अतःपंचम्यर्थप्रत्य
र्थस्यताहृशसंबंधेनान्वयस्तस्यवृत्त्यनियामकतयाव्यापकत्वावच्छेदकत्वेपिनैतद्व्यावृत्त्यसंगतिः यदिचजन्यताग्रह

ग॰ प्र॰

21

विषयत्वरूपं पंचम्यर्थैकदेशो जन्यत्वे प्रकृत्यर्थस्य हेतुजनस्यान्वयः नन्वपरं यत्संबंधेन तादृशविषयत्वे तदाजन्य
त्वपदकोक्तसाध्यहेतुकस्थले व्याप्तिबोधापत्तेः शाब्दविशेष्यकत्वापर्यंतानिवेशान्न ननु तादृशविषयत्वात्याव
च्छिन्नपदकस्थले हेतुजन्यबोधस्य तादृशविशिष्टपदेतरवैशिष्ट्यानवगाहित्वात् तादृशविषयत्वाविलक्षणे
नि साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविषय
ताविलक्षणेत्यर्थकत्वात् तद्विलक्षणत्वं च तद्भिन्नत्वे सति तज्जन्यबोधीयसाध्यादिविषयतायास्तद्भिन्नत्वेनासंभवा
यातात् तादृशविषयताभिन्नशाब्दविशेष्यताशून्यत्वनिवेशेनासंभवोद्धारे निगमनातिव्याप्तितादवस्थ्यात् अस्व
नविषयकत्वदलवैयर्थ्यात् वधूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवजन्यबोधीयहेतुत्व
निष्ठशाब्दविशेष्यतायास्तादृशविषयताभिन्नत्वात् एतेन तादृशविशिष्टविषयतानांतःपातित्वं प्रकृतपराम
र्शीयजन्यतानवच्छेदकत्वं वातादित्यपि निरस्तं आलोकांशे हेतुत्वप्रकारतायाप्येवं तादृशविषयतानांतःपातित्वा
त्प्रकृतपरामर्शीयजन्यतावच्छेदकत्वाच्च हेतुजन्यबोधीयतद्विषयताया अतथात्वात् न च तथाविधविषयता
वच्छेदककोटौ धर्मावच्छिन्नविषयताशून्यत्वनिवेशान्न दोष इत्यपि साधयन्तत्र प्रमेयसामान्यस्य पक्षतावच्छेदका
दिघटकतानां तादृशविषयतावच्छेदककोडाप्रविष्टाप्रसिद्धेः विलक्षणावच्छेदकतानिवेशोपि इव्यव्याप्यधूमादा
लोकवान् पर्वतो वह्निमान् धूमादित्यादिन्यायांतर्गतनिगमनादावतिव्याप्तेः तज्जन्यबोधविषयतावच्छेदका-
धूमत्वादेस्तादृशविषयतावच्छेदकत्वकोटिप्रविष्टत्वनियमात् अपि तु तादृशविषयताशालिनिश्चयत्वावच्छि
न्नानिवर्त्यसंशयनिवर्तकतावच्छेदकत्वमेवत् निगमनादिजन्यबोधीयज्ञानज्ञापित्वादिविषयतायास्तादृश
निश्चयत्वावच्छिन्नानिवर्त्यज्ञानज्ञाप्यत्वादिसंशयप्रतिबंधकतावच्छेदकतया तद्वारणं उक्तहेत्ववयवजन्यबोध

निवर्त्तस्यहेतुत्वंधूमीयंनचेत्यादिसंशयस्यधूमादिज्ञानाज्ञाप्यत्वघटितपक्षतावच्छेदकावच्छिन्नमत्वप्रकारतावच्छेद
कावच्छिन्नप्रकारकनिश्चयनिवर्त्यतयातादृशबोधविषयतायानतथाविधविषयताविलक्षणेतिनिश्चयस्यतत्पदस्य
व्याहतिसंगतिः सर्वेषामेवसंशयानांस्वविरोधिविषयकतथाविधविषयताशालितद्ग्रहालंबननिश्चयनिवर्त्य
तयातादृशानिवर्त्यस्याप्यसंशयाप्रसिद्धिरतस्तादृशानिश्चयत्वावच्छिन्नेतिद्वयंचाधिकमवगाहमानेपिनिगम
नजन्यबोधेतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयकत्वस्याक्षततयाधूमज्ञानज्ञा
प्यत्वादिसंशयस्यतादृशविषयताशालिनिश्चयानिवर्तनीयत्वात्प्रसक्तिरित्यपिसमाहितंप्रवच्छिन्नत्वमन्यूनवृ
त्तित्वव्यापकत्वपर्यवसितमतोज्ञानज्ञाप्यत्वंधूमीयंनवेतिसंशयनिरूपितप्रतिबंधकतायांधूमज्ञानज्ञाप्यत्वाति
रिक्तप्रतिज्ञाप्रतिपाद्यभागविषयताघटितधर्मस्यस्वरूपसंबंधरूपावच्छेदकत्वविरहेपितादृशनघटव्याहृत्यसंग
तिःअप्रामाण्यज्ञानास्कंदितस्यनिगमनादिजन्यबोधस्यसंशयाप्रतिबंधकतयातज्जनकत्वमादायातिप्रसंगस्याव
रणीयतातादृशसंशयानिवर्तकत्वमपेक्ष्यननिवर्तकतावच्छेदकविषयतान्यूनत्वेनबोधोविशेषणतःपक्षतावच्छेद
काद्यनिवेशनेनवच्छिन्नपक्षादिविषयताशालिनिश्चयसमुदायस्यकमपिसंशयंप्रत्यप्रतिबंधकतयातादृश
निश्चयतावच्छिन्ननिवर्त्याप्रसिद्धिरतस्तन्निवेशइतिद्वयंचानतिरिक्तविषयकत्वघटकसाध्यतावच्छेदकावच्छिन्न
साध्यविशिष्टपक्षतावच्छेदकावच्छिन्नविषयतायांस्वविनिवेशेनैवेन्यूनविषयकदर्शितहेतुजन्यबोधवारणसंभ
वेपृथगन्यूनविषयकत्वविशेषणमनर्थकमित्यपिसमाहितंतादृशविषयतायास्वनिष्ठत्वविशेषणेनिगमना
दिजन्यबोधस्यज्ञानज्ञाप्यत्वविशेषितसाध्यविशिष्टपक्षविषयताशालिनिश्चयत्वव्यापकप्रतिबंधकताकज्ञानज्ञा
प्यत्वादिसंशयान्यसंशयाप्रतिबंधकतयाऽनतिरिक्तविषयकत्वापत्तेर्दुर्वारत्वात्सत्यंनस्यन्यायावत्वमर्थः निगमने

ग॰
प्र॰

22

चपदत्वावचकपदमनुषज्यते इति तद्वारेण मननातिरिक्तपदप्रयोजनमिति मतमनुमत्य लक्षणार्थीव मननातिरिक्तविषयकत्वं
निर्वर्त्तिं प्रकृतेति प्रकृतहेतुकाया प्रकृतसाध्यसिद्धौपयिकीव्याप्तिस्तद्विषयकत्वमित्यर्थः यद्धर्मावच्छिन्नविशेषित
प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयकनिश्चयत्वं प्रकृतसाध्यतावच्छेद-
कावच्छिन्नसाध्यकानुमितिजनकतानतिरिक्तवृत्तितद्धर्मावच्छिन्नविषयकत्वमिति तत्पर्यवसितं तादृशं च तद्रूपं तद्धेतुता-
वच्छेदकावधर्मताविशिष्टहेतुपरतया तज्जन्यबोधस्य तादृशतद्रूपावच्छिन्नविषयकत्वान्नातिव्याप्तिः अन्वयव्यतिरेक-
व्याप्त्योर्विशिष्यैकतरनिवेशेऽन्वयिव्यतिरेकिणोरविनिगमनेन नियाप्तिरिति तत्तद्रूपावच्छिन्नत्वेन तद्द्वयोरनुगमः यदि च
यत्वनत्वयोर्निवेशानामनुगमः इति विभाव्यते तदा भावद्वयमेव वा बोध्ये निवेशनीयं एतल्लाभायैव चौपयिकोनमिति
ध्येयं यद्यप्युदाहरणजन्यबोधस्य नानितत्तद्रूपावच्छिन्नविषयकत्वं तथापि सिषाधयिषाधीनन्यायप्रयोगपरमुपगमे
नपक्षतावच्छेदकाविशिष्टसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वविरहादेव नातिप्रसंगः
हेत्वंशभागे च सत्पक्षताभावान्नातिव्याप्तिरित्यवधेयं वह्निव्याप्तिविशिष्टस्यालोकस्य पर्वतनत्वावच्छिन्नविशेषणत्वे तत्र
विशिष्टेऽपि पर्वतेन तद्व्यत्रेऽप्येतो लाभेनार्थेन तत्र प्रकृतपक्षे प्रकृतसाध्यगमकतालाभात् हेत्ववयवाभिधानप्रयोज-
काकांक्षावसर इत्यतस्तद्धर्मेति तस्याः प्रतिज्ञायाः नन्वेवमपि यत्र प्रकृतहेतुकप्रकृतसाध्यकव्याप्तिरेवांतर्भवति पक्षा-
भेन तत्रत्यप्रतिज्ञाया असंग्रह इत्याशंकां परिहरति वक्षीति विशिष्टपक्षेति पक्षतावच्छेदकविशिष्टपक्षेत्यर्थः तादृशा-
व्याप्तीति प्रकृतसाध्यसिद्ध्यौपयिकव्याप्तीत्यर्थः यद्यपि विशिष्टपक्षोपस्थापकपदांतप्रकृतहेतौ विशिष्टपक्षवृत्तित्व-
स्याप्यर्थतः प्रतीत्या उपनयादिप्रयोजकाकांक्षाया अप्यनवकाशः तथापि धूमवत्वव्याप्ते धूमवत्साधर्म्यनिवेशे तेन त-
स्यासंभव इति दृष्टान्तहरणमात्रोपादाने अन्यथा आकांक्षाविरहेऽप्यभिधानेति प्रसंगात् हेतुद्वयादेरप्यभिधानसंगात्

ज्ञानवानाकांक्षितानभिधानादेवपक्षवापकन्यायप्रयोगदशायांउभयव्याप्तीति अन्वयव्यतिरेकव्याप्तिद्वयेत्यर्थः
व्याप्तिद्वयस्याक्रमेणैवाभिधाने शक्यतया प्रथमोपन्यस्तव्याप्तिप्रतीत्यैव समीहितनिर्वाहे व्याप्त्यंतराकांक्षानुदया
दिति भावः एतेनान्वयव्यतिरेकोदाहरणाकांक्षाघटितान्वयव्यतिरेकिहेतुलक्षणानां तदुभयपरतल्लक्षणमभिधा
स्यतो मणिकृतः प्रथमलक्षणानिर्भरबीजस्याविष्कृतं ज्ञातपदेदर्शितप्रसंगस्य पृथगभिधानेवह्न्यादिसाध्यकप्रति
ज्ञायाः समव्याप्यायथोपवर्णितलक्षणमाक्षिपति यदि वेत्यादिना नच चासंभवासंभवमाविष्कर्तुं कालिमयप्रतिज्ञा
जन्यबाधस्य यथोपवर्णितानुमित्यनतिरिक्तविषयकत्वं व्यावस्थापयति मैवमित्यादिना अयं गौरित्यत्र गोत्वस्य सा
ध्यत्वेपदे साध्यतावच्छेदकगोत्वत्वविशिष्टप्रकारकज्ञानजनकत्वासंभवादाह तादात्म्येन गौरिति ननु भवतु
गोसाध्यकप्रतिज्ञा दृष्टान्तः तथापि यदि समवायेन गोत्वस्य साध्यत्वेपि तथाविधप्रतिज्ञा संप्रदायानु मतानदानत्सा
ध्यकताद्दृशप्रतिज्ञाया दर्शितबोधजनकत्वासंभवात् सामान्यतस्तथाकारप्रतिज्ञायास्तथात्वाभिधानमसंगतमा
मित्याशंकायां तस्या गोत्वादिसाध्यकत्वं निराकरोति गोत्वत्वाद्यनुपस्थित्येति तादृशप्रतिज्ञावाक्यादिः नत्वेति शे
षः अनुपपत्तेरिति प्रतिज्ञायाः साध्यतावच्छेदकोपस्थापकत्वानियमादन्यथा ह्रदं वह्निमत्वावच्छिन्नसाध्यकस्थ
लेपि वह्निमानित्याकारकप्रतिज्ञाप्रसंगादिति भावः यद्यपि समवायेन वह्नित्वविशिष्टदंडावच्छिन्नसाध्यकरण
न्ते दंडिमानित्यादिप्रतिज्ञायां न विशिष्टसाध्यतावच्छेदकबोधकतासंभवस्तथापि तत्र साध्यतावच्छेदकघटकस
कलपदार्थानामेव विशेषकालीनतानां तादृशप्रतिज्ञावाक्यादुपस्थितिस्तदधीनसाध्यतावच्छेदकविशिष्टसाध्यवि
षयकमानसबोधेनापि तत्र विशिष्टसाध्यसंशयप्रयोज्यनिजात्मविषयासिद्धिसंभवः प्रकृते तु विशेषकालीनतानामपि
गोत्वत्वादिघटितपदार्थानामनुपस्थितेरिति विशेषः गोत्वादेः साध्यत्वे दोषान्तरमाह पदार्थेति पदार्थतावच्छेदकत्वे

ग॰
अ॰

23

पदार्थांतिरन्वायित्वासंभवप्रयोजकत्वेनाभिहितं इदमुपलक्षणं अन्वयितावच्छेदकरूपेणानुपस्थितत्वमपि तथा हि बो-
धे पर्वतो वह्निमानित्याकारकप्रतिज्ञाने वह्निसाध्यकानुमितित्वाभेदेन वह्निमत्साध्यकैव तथा च तज्जन्यबोधविषयता-
याश्च भेदसंबंधेन वह्निमत्साध्यकानुमितिविषयतातो न वैलक्षण्यमतो न नत्राव्याप्त्यवकाश इत्यत आह तथैवेतीति
तादृशप्रतिज्ञाया वह्निसाध्यकत्वेनैवेत्यर्थः इत्युपनयसंगमानं इत्याकारकस्योपनयस्य तादृशप्रतिज्ञाघटितन्या-
यांतर्गतत्वोपपत्तेः वह्निमतः साध्यत्वे वह्निमद्व्याप्यवानित्याकारकस्यैवोपनयस्य संभवादिति भावः शाब्दज्ञाने वह्नि-
मानित्येतादृशप्रतिज्ञावाक्यजन्यज्ञाने अभेद इत्यनेनान्वयः तत्र वह्नेः संयोगेन इति शेषः नामार्थयोर्भेदान्वयबोधस्या-
व्युत्पन्नत्वादिति हृदयं तथा च तादृशप्रतिज्ञाजन्यबोधे निरुक्तविषयकत्वं च न संभवतीति भावः भेदेऽपीति प्रतियोगि-
विशेषितेन वा साध्ये इत्यादौ इत्यादिप्रतिज्ञायामादिपदादितरेभ्यो भिन्नमित्यादिपरिग्रहः वैलक्षण्यं अनुमितिवैलक्षण्या-
बोधजनकत्वं भेदसाध्यकानुमितौ भेदस्यानुयोगिताया इत्यत्र तावच्छिन्नभेदसाध्यकानुमितावनुयोगितयेतरविशेषित-
स्येतरस्याविशेषणतावि शेषणाभिद्यत इति प्रतिज्ञाजन्ये वै बोधे व्याख्यातानामस्थाप्यस्य भेदाश्रयत्वस्य इत्यनेनेतरेभ्यो भिद्यत
इत्यादिजन्ये च पंचम्यंतार्थेन तत्प्रतियोगिकत्वविशेषितभेदाश्रयत्वस्य तेन संबंधेन भिन्नमित्यादिजन्ये च विनिष्ठातोप-
स्थाप्यभेदाश्रयत्वावच्छिन्नस्येतरेभ्यो भिन्नमित्यादिजन्ये चेतरप्रतियोगिकत्वविशेषितभेदाश्रयत्वावच्छिन्नस्येतरभिन्न-
मित्यादिजन्ये चाभेदेनेतरप्रतियोगिकविशेषितभेदाश्रयत्वावच्छिन्नस्येतरेभ्योऽन्यदित्यादिजन्ये चेतरप्रतियोगिकत्व-
विशेषितभेदावच्छिन्नस्येतरान्यदित्यादिजन्ये चाभेदेनेतरप्रतियोगिकविशेषितभेदावच्छिन्नस्याभेदेन पक्षांशे विशेषणा-
त्वादिति घटानुमितेस्तादृशबोधवैलक्षण्यादिति भाव इदमुपलक्षणं ईदृशादिशाब्दप्रकृते विधेयांशे भानमिवोद्देश्यताव-
च्छेदकांशे भानेपि वैलक्षण्यमवसेयं गंधाद्यवच्छिन्नपक्षकाद्यनुमितौ गंधादेः साक्षाद्विधेयधर्मितावच्छेदकत्वात् गंध-

वर्तीतरेभ्योभिधानदृत्याकारकतादृशप्रतिज्ञाजन्यबोधेचगंधादिसंबंधस्यैवतया दृतिउद्देश्यपाठमितिपदस्य
याद्दृशविशिष्टार्थबोधप्रतिज्ञायाजन्यतेतादृशविशिष्टार्थबोधप्रतेत्यभिप्रेत्यसमाधत्तेयादृशेतियादृश
रूपावच्छिन्नपक्षकायादृशरूपावच्छिन्नसाध्यकसंप्रदायसिद्धप्रतिज्ञायादृशरूपावच्छिन्नपक्षेयादृशरू
पावच्छिन्नप्रकारकबोधजनकेकालातादृशरूपावच्छिन्नेतादृशरूपावच्छिन्नप्रकारकबोधानिवर्त्यसंशयानि
वर्तकतादृशबोधान्यतमबोधजनकत्वसतितादृशरूपावच्छिन्नपक्षकतादृशरूपावच्छिन्नसाध्यकन्यायां
तर्गतत्वंप्रतिज्ञात्वमित्यर्थः अत्रचजनकेत्यंतंबोधविशेषस्यापरिचायकमात्रंनतुतदर्थस्यलक्षणेनिवेशःबो
धाख्यविषयविशेषाद्विवेशणविशिष्टबोधादेयाः अतोनानाश्रयशंकावकाशःसाध्यकनिखिलप्रतिज्ञासा
धारणमपिप्रतिज्ञात्वेनैकसंभवतीतिबोधानामन्यतमत्वेनानुगमः नेनरूपेणजनकतांशेवन्यत्वांशेपिबोधा
नामननुगमेपितादृशबोधानेवर्त्यत्वाभावकूटचादितधर्मस्यानुगतत्वात्तादृशतादृशबोधभेदकूटवह्नित्व
त्वरूपाद्यन्यतमत्ववन्निवर्त्यत्वसामान्याभावस्थलेतादृशबोधनिवर्त्यत्वाभावकूटस्यैवलाघवेननिवेशयित
मुचितत्वात् एवंचतादृशाभावकूटनिवेशस्तुचनायैवान्यतमेनापीत्युक्तं एतेनसामान्याभावनिवेशस्तुच
नाद्यापिकारकत्वनिव्याख्यानमनादेयंविशेष्यदलेवन्यतमत्वानिवेशनमपियत्रप्रतिज्ञार्थानानाविधत्वंनत्वेव
पर्वतादिपक्षकवह्न्यादिसाध्यकस्थलेपर्वतादौवह्न्यादिमदभेदरूपैकविधबोधस्यैवप्रतिज्ञायाजननात्तत्र
तन्निवेशः एतेनएकमात्रायान्यतमत्वस्यासंभवेपिनक्षतिःशाब्दाभेदस्याप्रयोजकत्वात् वह्नित्वावच्छिन्नप्रति
ज्ञायाच्चवह्नेर्दहनत्वादिचादितधर्मावच्छिन्नविशेष्यकः एवंतत्वावच्छिन्नपक्षकप्रतिज्ञयाचतादृशधर्मावच्छि
न्नप्रतिज्ञाकारकोपिबोधोजन्यातेनतन्निवर्त्यस्वरूपत्वंलंचदववन्नवेत्यादिसंशयोपीतितप्रतिज्ञायांप्राक्तनपक्षताव

ग०
प्र०
२५

च्छेदकावच्छिन्नपक्षकत्वस्य प्रकारतया साध्यतावच्छेदकावच्छिन्नसाध्यकत्वस्य वा तदुपादानेन तादृशबोधानिवर्त्यसं
शयाप्रसिद्धिरतस्तदुपादानं यत्किंचिद्रूपावच्छिन्नपक्षसाध्यकप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधजनकत्वस्य
यत्किंचिद्रूपावच्छिन्नपक्षसाध्यकन्यायान्तर्गतत्वस्य निवेशनेनातिप्रसंगः प्राग्प्रदर्शितपर्वतो यादृशरूपावच्छि
न्नपक्षसाध्यकं प्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधानिवर्त्यसंशयानिवर्तकबोधजनकत्वं तादृशरूपावच्छिन्नप
क्षसाध्यकन्यायान्तर्गतत्वं निवेशितं अधिकं तु तत्त्वादिन्यायेन साध्यांशे हेतुज्ञानज्ञाप्यत्वमवगाहमानेप्यनिगम
नादिजन्यबोधे प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकत्वाभावात् तेन तन्निगमनादाव्याप्तिवारणाय तद्रूपाव
च्छिन्नविशेष्यकत्व तद्धर्मावच्छिन्नप्रकारकबोधानिवर्त्यसंशयानिवर्तकत्वरूपं तादृशबोधानतिरिक्तविषयकत्वं
बोधविशेषणं इत्थं च प्रतिज्ञाजन्यबोधानिवर्त्यस्य वह्निर्धूमज्ञानज्ञाप्यो न वेत्याकारकसंशयस्य निवर्तकतया तादृ
शबोधकारणे न च प्रतिज्ञाजन्यबोधस्य पर्वतत्वावच्छिन्नविशेष्यवह्निमत्त्वाद्यवच्छिन्नप्रकारकबोधत्वेनैवोपादे
यतया निगमनादिजन्यबोधस्यापि तथात्वान्निवर्त्यत्वमुक्तसंशयस्याज्ञानमेवेति वाच्यं अप्रामाण्यज्ञानानास्कंदि
ततादृशविशिष्टार्थविषयकनिश्चयत्वावच्छिन्ननिवर्त्यत्वस्यैव निवेशनीयत्वादुक्तसंशयस्य च धूमज्ञानज्ञाप्यत्वा
विषयकवह्निमत्पर्वतनिश्चयानिवर्त्यत्वेन तथाविधनिश्चयत्वावच्छिन्नानिवर्त्यत्वात् एतेन सर्वेषामेव संश
यानां यावह्निमत्पर्वतादिविषयकसमूहालंबनात्मकप्रमाविरोधिनिश्चयनिवर्त्यनीयतया तादृशबोधानिवर्त्य
संशयाप्रसिद्धिरित्यपि निरस्तं तादृशनिश्चयत्वनिष्ठनिवर्तकतावच्छेदकत्वं च न स्वरूपसंबंधविशेषः किंतु नति
रिक्तवृत्तित्वं तेन संबंधी वह्निमान् वेत्याद्याकारकैकदेशसंशयं प्रति वह्निसंबंधाभिन्नपर्वतादिनिश्चयत्वेन प्रति
बंधकत्वेपि तादृशसंशयनिवर्तकप्रतिज्ञाजन्यबोधस्य नासंग्राहः अतएव धूमादालोकवान् पर्वतो वह्निमान् धू।

मादित्यादौहेतुजन्यबोधनिवर्त्यहेतुत्वंध्रुमापन्नवेतिसंशयंप्रतिप्रतिज्ञाप्रतिपाद्यविशिष्टार्थाविशेषविषयकानिश्च
यत्वेनाप्रतिबंधकत्वेपिनविशेष्यदलवैयर्थ्यंवह्निमत्त्वाद्यवच्छिन्नप्रकारकानिश्चयत्वावच्छिन्नत्वावनिवर्त्यतत्वाद्य
वच्छिन्नविशेष्यकानिश्चयत्वावच्छिन्नानिवर्त्यस्यवाप्रसिद्धेस्ततोविशेष्यप्रकारविशेष्यप्रकारभेदेनिवेशनंयद्यप्यत्र
प्रतिज्ञाप्रतिपाद्यस्याविधेयविशिष्टधर्मिणएवयादृशविशिष्टार्थस्योपादानसंभवइतियादृशविशिष्टार्थबोधिके
तत्वेप्यनिष्टप्रकारकयोःखंडशउपादानस्तुचनापत्तेयादृशविशिष्टार्थवत्त्वबोधिकादृस्याभिधानमनुचितंनयापिध
मादालोकवान्पर्वतोवह्निमान्धूमादित्यादौप्रतिज्ञार्थविषयसमूहालंबनबोधजनकेहेतुत्वंनहेतोर्वान्यायावयव
त्वंपरित्यज्यन्यायांतर्गतत्वनिवेशपदेप्रतिज्ञाजन्यबोधनिष्ठैकदेशाविषयकबुद्धित्वावच्छिन्नजन्यतानिरूपितज
नकतामादायैकदेशेचातिप्रसंगवारणायविशिष्टार्थविषयबोधत्वावच्छिन्नजन्यताप्रतियोगिकजनकत्वनिवे
शेपर्वतोवह्निमानित्यादिप्रतिज्ञायाअसंग्रहःवह्न्यादिशून्यपर्वताद्यवगाहिभ्रमात्मकशाब्दबोधसाधारण्यात्तदो
षेनतत्तत्पदार्थानापरस्परोपश्लेषावगाहित्वंचतादृशप्रतिज्ञाजन्यतावच्छेदकत्वोपगमात्तत्राद्विशिष्टार्थविषय
कत्वस्यानथात्वादितिचेन्नतिरिक्ताविषयकबोधानिष्टतादृशपरस्परोपश्लेषावगाहित्वाद्यवच्छिन्नजन्यताप्रति
योगिकजनकतायानिवेशस्तुचकार्यःतथाभिधानंतादृशपरस्परोपश्लेषावगाहिशाब्दत्वेजन्यतावच्छेदकतापर्या
प्त्यनिवेशान्नानतिरिक्ताविषयकत्वदलवैयर्थ्यमित्यवधार्यभेदादिसाध्यकस्थलेपृथिवीतरेभ्योभिद्यतेइत्यादि
प्रतिपाद्यभेदाश्रयत्वादिरूपयत्किंचिदेकार्थनिश्चयाप्रतिवध्यभेदादिकोटिकसंशयंप्रतिपृथिवीनेतराइत्या
दिप्रतिज्ञाजन्यभेदादिप्रकारकानिश्चयस्यप्रतिबंधकतायानकस्याश्चिदपिप्रतिज्ञायातादृशसंशयानिवर्तक
बोधजनकत्वमतस्तत्राद्विशिष्टार्थविषयकानिश्चायानिवर्त्यत्वाभावकूटनिवेशनंप्रतिज्ञाजन्यबोधस्यस्वसमानाका

ग॰
ग्र॰
25

रानुमितौ सिद्धिविषयाप्रतिबंधकत्वात् तादृश्यानुमितेः सिषाधयिषाकालीनतादृशबोधानिवर्त्यतायास्तादृशाप्रामाण्यज्ञाना
नास्कंदितप्रतिज्ञाप्रतिपाद्यविशिष्टार्थनिश्चयत्वावच्छिन्नप्रतिबंधकताकान्यत्वादसंभव इत्यतो ज्ञानसामान्यमु
पेक्ष्य संशयपर्यंतानुधावनेन चानुमितेस्तादृशनिश्चयत्वावच्छिन्नप्रतिबंधकताकान्यत्वेपि तदप्रतिबंधकसिषाध
यिषाकालीनबोधजनकत्वमादाय प्रतिज्ञायां लक्षणसमन्वयः संभवतीति संशयपदमनर्थकं स्वरूपयोग्यतारूप
जनकतायाः प्रवेशनीयतया अव्याप्तेरप्यनवकाशादिति वाच्यं अनिवर्तकत्वं हि प्रतिबंधकतावच्छेदकीभूतवि
षयिताशून्यत्वेन न प्रतिबंधकत्वाभावः तथा सति अप्रामाण्यज्ञानास्कंदिततादृशार्थबोधमादाय निगमनातिव्या
प्तितादवस्थ्यात् तथा च सिषाधयिषाकालीनसिद्धेरप्रतिबंधकत्वेपि प्रतिबंधकतावच्छेदकीभूतविषयिताशालि
त्वेन अनुमित्यनिवर्तकत्वासंभवात् न च सिद्धेः पूर्वं प्रवृत्तो वा सिषाधयिषा उपादेया द्वितीयलक्षणे प्रथमलक्षणे वा सि
षाधयिषाविरहाविशिष्टत्वमत्र तन्मे वेति सिषाधयिषाविशिष्टाया अपि सिद्धेरनुमितिप्रतिबंधकत्वमत्र तन्मे वेति
कथं तस्याः अप्रामाण्यज्ञानानास्कंदिततादृशविशिष्टार्थनिश्चयत्वावच्छिन्नप्रतिबंधकताकान्यात्वमिति वाच्यं या
दृशसिद्धेः पूर्वं प्रवृत्तः सिषाधयिषोत्पादः तादृशसिद्धेरेवाप्रतिबंधकत्वात् प्रत्यक्षनिश्चये विशेषदर्शनकालीनविप
रीतनिश्चयस्याप्रतिबंधकतामतेन तस्यापि प्रतिज्ञार्थन्यायत्वावच्छिन्नाप्रतिबध्यता उक्तादृशासंभव इति प्रत्यक्षसामा
न्याद्युपेक्ष्य संशयपर्यंतानुधावनं अत्र च तज्ज्ञाविशिष्टार्थविषयकनिश्चयत्वानवच्छिन्नसंशयप्रतिबंधकताशून्यत्वस्या
ज्ञाने विशेषणत्वोपगमे नैवातिविज्ञाविषयकस्येहेत्वंतादिभागतबोधस्य तथाविधभ्रमज्ञानज्ञाप्यत्वादिसंशयप्रतिबंध
कताश्रयस्यावारणसंभवात् तादृशप्रतिबंधकतात्वेनैव तथाविधनिश्चयतावच्छिन्नप्रतिबंधकताकान्यसंशयप्रति
बंधकत्वात्वेन गौरवादित्यवधेयं उक्तहेत्वाद्यारणाय तादृशबोधान्यतमेति प्रकृतप्रतिज्ञाजन्यतावच्छेदकीभूतयादृशा

यादृशबुद्धित्वतादृशबुद्धित्वावच्छिन्नान्यतानिरूपितजनकतापर्य्याप्तस्यविवक्षणीयतयानोक्तसमूहालंबनबोध
मादायतत्रातिप्रसंगइत्युक्तप्रायंगवाभेदस्येत्यादिसकलग्रन्थैतैः समंबोधाविवक्षणीयतायान्योनोक्तसमूहालंब
नबोधमादायतत्रातिप्रसंगइत्युक्तविषयकबोधजनकत्वंप्रतिज्ञायाः समवेतीतिप्रागभिहितंतावतोचगवाभे
दः प्रतिज्ञाप्रतिपाद्यइत्यस्यालाभात् तत्रतादृशबोधमादायलक्षणंवर्तत्वमितिस्फुटमेव तथापितत्रातादृशप
बबोधेलक्षणाघटकोनत्वन्याविधइतिस्फुटीकर्त्तेतदुपादानंतादात्म्येनवह्नौसाध्येश्वयंवह्निरित्येवप्रतिज्ञाजाय
ते तत्रचवह्निमदभेदबोधेनलक्षणघटकइत्यतः संयोगेनसमवायेनचेतितादात्म्यातिरिक्तसंबंधेनेत्यर्थः वह्नि
वित्यादिसमस्यंतत्रायंसाध्यइतिप्राक्तनेनान्वितंवह्निमदभेदस्येति अत्राप्येतादृशबोधस्यप्रतिज्ञाजन्यतायाः
प्राग्दर्शितत्वेपिग्रन्थाविधबोधासंभवमाविष्कर्तुमेतदुपादानंपाककृतिमत्वस्येतिपाककृतिसमुदायस्येत्यर्थः
पचतीतिज्ञानजन्यबोधादितिभावः पाककर्त्रभेदस्येतिपाककृत्यवच्छिन्नाभेदस्यपाककृतिमत्वावच्छिन्नाभेद
स्यचेत्यर्थः पक्तापाककृतिमानित्यादिप्रतिज्ञानजन्यबोधादितिभावइतरभेदवत्वस्येतिइतरभेदाश्रयतासंबंधस्ये
त्यर्थः इतरेभ्योभिधानइत्यादितन्नादृशबोधादितिभावः इतरान्याभेदस्येति इतरभेदावच्छिन्नाभेदस्येत्यर्थः इ
तरान्योतिप्रतिज्ञानजन्यबोधादितिभावः इतरभेदवत्वस्येति इतरभेदवत्वस्येति इतरभेदसंसर्गस्येत्यर्थः नेतरवण
त्यतजन्यबोधादितिभावः इतरभिन्नाभेदस्येतिइतरभेदाश्रयत्वावच्छिन्नाभेदस्येत्यर्थः इतरभिन्नेतिप्रतिज्ञानजन्यबो
धादितिभावः अनतिरिक्तविषयकत्वार्थः सर्ववदेवग्रन्थनविषयकत्वंतावद्बोधनिवर्त्ययावत्संशयनिवर्तकत्वं
दर्शितहेतुजन्याबोधस्यज्ञानत्वाप्यत्वेधूमोपपन्नवेत्यादिसंशयप्रतिज्ञाजन्यबोधानिवर्तनीयं प्रतिबंधकत्वेपिता
दृशयावत्संशयांतर्गतपर्वतोवह्निमान्नवेत्यादिसंशयानिवर्तकत्वेनचारणासंभवादितिवदतोमतमाह तावदि

ग॰
प्र॰
26

ति नचाविशिष्टार्थविषयकोटीत्यर्थः तावद्बोधानिवर्त्यं यावत्संशयेतितं प्राग्विशिष्टार्थबोधान्यतमयात्किंचिद्बो
धानिवर्त्ययावत्संशयेत्यर्थे तेनभेदादिसाध्यकस्थलेभेदतदाश्रयत्वादिकोटिकनानाविधसंशयानामेवप्रकृतसा
ध्यपक्षकप्रतिज्ञार्थबोधानिवर्त्ययावत्संशयान्तर्गततया तावत्संशयानिवर्तकतायाः पृथिवीत्वेनरूपेणपृथिवी
तरेभ्योभिद्यतइत्यादिप्रत्येकप्रतिज्ञाजन्यबोधेसत्त्वेपितादृशसकलवाक्यजन्यसमूहालम्बनबोधस्यतावत्संश
यानिवर्तकत्वाद्यत्रचानिरुक्तज्ञानतिरिक्तानतिरिक्तविषयकत्वस्यापिसत्वात्तज्जनकत्वमादायैवप्रत्येकप्रतिज्ञा
स्थलेलक्षणासमन्वयोबोध्यः अत्रचस्वमतापेक्षयागौरवमेवास्वरसबीजंबोध्यं नचविषयितादिसंबन्धेनपाकाद्यव
च्छिन्नकृत्यादेर्यत्रसाध्यतानत्रकीदृशउपनयः नतावत्पाककृतिव्याप्यवानित्याद्याकारकः तस्यकृत्यवच्छेदकपा
कादिपदस्यपाकविषयकादिलाक्षणिकतयापाकविषयकाभिन्नकृतित्वावच्छिन्ननिरूपितव्याप्तेरेवलाभात्
कृतसाध्यतावच्छेदकावच्छिन्ननिरूपितायाव्याप्तेरलाभेनार्थान्तरप्रसंगादित्यतआह चेतत्रइति साध्यविशिष्ट
णत्वासंभवादितिभावः निपातार्थेनसाम्यार्थस्याभेदान्वयविधिबोधकव्युत्पत्तिविरुद्धतया नेतराणीत्यादौप्रथमायाअ
नुयोगितार्थकत्वमङ्गमितिहृदयं यथोपदर्शितेनेतिप्रतिज्ञायस्थापितेनेत्यर्थः उपनयेनबोधनीयत्वात्तादृश
व्याप्तेरेवोक्तत्वेनयः पाककृतिसामग्रीमानसपचतीत्याद्युदाहरणेनप्रतियादृशविशिष्टस्यासत्त्वपर्यन्तताको
द्यैवउपप्रयोगादितिभावः एवञ्चपक्षेतितथासतिनतादृशव्याप्तिविशिष्टहेतुमत्तापक्षोपस्थापनादितिभा
वः नचमणिकृतावयालम्पत्ययार्थेवितर्कयेतस्माद्ग्रथितिनिगमनस्यनिराकरणीयतयातथापदत्वादिनउपनयेपि
तदोषतासद्भावस्यानुमनस्तादृशोपनयइमनपतन्मतमनुसत्याह नव्यानामितिनत्पदेनयथोपदर्शितसाध्य
स्यवतादृशसाध्यव्याप्तिविशिष्टहेतोरपिपरामर्शसंभवइतिव्याप्त्यादिपदप्रयोगवैयर्थ्यमित्याशयेनाह नद्यानवे

ति ननु पक्षतादेरपि प्रक्रान्तत्वात्तस्यैव कथं नोपनयस्य तत्त्वेन परामर्श इत्यत आह योग्यतेति तात्पर्यविषयादित्यर्थः
व्याप्तिविशिष्टहेतुमत्त्वस्यैवाकांक्षितत्वेन तात्पर्यविषयतया एव तत्र ग्रहादिति भावः तद्वानित्त्वेन साध्यस्येति प्रथमकल्पे
तद्व्याप्यस्येति द्वितीयपक्षमभिप्रेत्य पर्वतो वह्निमानित्यादेर्न्यायस्य वह्निसाध्यकत्वे निराकृते वह्निव्याप्यधूमवांश्चा
यमित्याकारकोपनयेन निराकृतं मतमाह केचित्त्विति विप्रतिपत्तौ कोटितज्ज्ञान्यसत्तिविषयत्वं तज्जन्यप्रत्येकांशाद्
बोधप्रकारत्वं वा न तत्तदधीनसंशयप्रकारत्वमतो न संशये चेत्यस्य वैयर्थ्यं तत्प्रदर्शनं च संशयकोटितानिर्वाहक
त्वेन तस्य स्वतो जिज्ञासायामतेत्रत्वादित्यवधेयं यद्यपि वह्निमत्त्वउपस्थितिदशायां च हेतुत्वरूप्युपस्थित्या हृशाविप्र
तिपत्तिवाक्याद्वह्निकोटिकोपि संशयो भवितुमर्हति तथापि स्थानेत्रेणकोट्युपस्थितिः संशयप्रयोजिकेत्यभिप्राये
णेदमित्यवधेयं अथवा विप्रतिपत्तिवाक्याच्छाब्द एव संशय इति मतानुसारेणेदं वस्तुतो वह्न्यभावस्य कोटितयामेव
वह्निकोटिकस्य संशयस्योपपादयतेन तत्त्व वह्निमदभेदस्य स्वत्वाभावप्रकारकज्ञानस्यैव स्वसंशयत्वात् प्रकृते वह्न्य
भावो नोपस्थितोपि न तद्द्वेदपर्वतेति वह्न्यभावस्य कोटित्वासंभवाद्वह्निसंशयानसंभवतीत्यभिप्रायः एतत्तत्त्वनायेव
च वह्निमद्भेदस्य कोटित्वमभिहितं तदभिधानस्य प्रयोजनान्तराभावात् यद्वा धर्मिणि तत्प्रकारकबोधोपधायिकाकां
क्षा वा तदजन्यतदुपस्थितिवे धर्मिणि तत्कोटिकसंशयजनिका पर्वतो वह्निरभावइति वाक्याद्वह्न्याद्युपस्थितौ पर्व
ताढौ वह्न्यादिसंशयानुदयात् तथा च पर्वतो वह्निमानिति वाक्यस्य वह्न्यादिपदमपि न पर्वताढौ वह्न्यादिभेदान्व
योपयिकाकांक्षावदिति ताहशविप्रतिवाक्याद्वह्न्यादिकोटिकसंशय इति तु परमार्थः नवीनमते मतु सत्यात्
वह्निमद्व्याप्येति प्राञ्चरित्यत्र प्रशब्देन स्वरसाभावः सूचितः फलोपधायकताद्रूपजनकभानिवेशशोकयाप्रसक्तो
ताहशशाब्दबोधानुपधायकप्रतिज्ञायामव्याप्तियोग्यताविवक्षया निराकरोति यत्र चेति प्रकृतपर्वतेति हेत्वर्थादिविषय

ग० प्र०

27

यच्छाब्दबोधमात्रोपधायकप्रतिज्ञायामव्याप्तिः प्रसज्यते अनतिरिक्तविषयकशाब्दबोधोपधायकत्वादिति स्वचिन्तं तोदृशेति
तादृशशाब्दबोधजनकज्ञानविषयेत्यर्थः आकांक्षानिवेशात्पर्वतो वह्निः संबंधीत्यादिनिराकांक्षवाक्यव्युदासः नच पर्वतो व
ह्निमानित्यादिशाब्दं प्रति निराकांक्षतादृशवाक्यविषयकज्ञानत्वेनाजनकत्वात्तादृशशाब्दबोधजनकतावच्छेदकविषयिता
कत्वनिवेशेनैवोपपन्ने आकांक्षानिवेशनमफलमिति वाच्यं पर्वतो वह्निमानित्यादिवाक्यात् पूर्वोक्तप्रकारकभ्रमात्मकता
दृशनिराकांक्षविषयकज्ञानस्यापि तादृशविधशाब्दधीजनकतया तदीयविषयिताज्ञानकतावच्छेदकत्वेन तज्जनकताव
च्छेदकप्रकारतास्पर्शात् सर्वरूपाकांक्षाशालित्वनिवेशस्यावश्यकतया तदीयविषयत्वात् तच्छालित्वं च तद्वदकवर्
णसमुदायत्वे तज्ज्ञानकतावच्छेदकीभूतभ्रमान्ययत्किंचित्ताज्ञानवृत्तिविषयितानिरूपकवर्णसमुदायत्वमिति तत्पर्य्या
वसितार्थः कृत्वा वह्निमानित्यादिभ्रमात् अनुमितिसमानविषयकतादृशवाक्यस्य वारणाय योग्यतानिवेशनं योग्यत्वं वाचा
धितार्थकत्वं प्रकृतसाध्यविशिष्टप्रकृतपक्षबोधकत्वमिति यावत् वैशिष्ट्यं च वास्तवं न तु वैज्ञानिकं यद्यपि स्वातंत्र्येण यो
ग्यतानिवेशो निरर्थकः अन्यूनविषयितावच्छिन्नान्यताप्रतियोगिकजनकताया अवश्यं विवक्षणीयतया वास्तववैशिष्ट्या
घटितसाध्यविशिष्टपक्षविषयकत्वरूपान्यूनविषयकत्वनिवेशासंभवेप्ययोग्यवाक्यप्रतिपाद्यविशिष्टार्थप्रसिद्ध्या सं
प्रदायसिद्धप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधानिवर्त्यसंशयानिवर्तकत्वरूपानतिरिक्तविषयकत्वघटितलक्षणस्य तत्रा
तिव्याप्त्यप्रसक्तेः तथापि वास्तववैशिष्ट्यघटितानतिरिक्तविषयकत्वनिवेशस्य च लाघवयोग्यतोपादानं स्वादिपदानाम
र्थविशेषपरिग्रहः तेन निरुक्तानुमत्यकाङ्क्षादिघटितप्रतिज्ञासमानाकारवाक्यस्यापि तेऽतरमतादृशवाक्यस्य च व्यु
दासः अन्वाकांक्षादिनिवेशे शाब्दवाक्यपदयोर्वैयर्थ्यं आकांक्षादेर्ज्ञानान्तरोपधेयकत्वविरहाद्वाक्यातिरिक्तेः सत्त्वाच्चा
नुमितिजनकपरामर्शादौ शाब्दधीजनकयोग्यताज्ञानादौ चातिप्रसंगानवकाशात् यत्न आकांक्षादिमत्त्वलाभार्थकतया

तादृशपदोपादानं सार्थकमिति तल्लाभस्त्विति तल्लाभः शाब्दबोधं प्रति आकांक्षादिमत्पदवाक्यस्य जनकतया आकांक्षादिम
त्वलाभः तादृशपदद्वयोपादानादित्यर्थः शाब्दपदस्य योगेन शाब्दजन्यार्थकत्वेन तल्लाभः आकांक्षादिरहितस्यापि शाब्दस्य
जन्यज्ञानस्यानिहेतुत्वात् अतो जातिविशेषोपस्थापकेति तद्वाक्ये अनुभवनिष्ठशाब्दत्वजात्युपस्थापकार्थकं शाब्दबोधप्रति
आकांक्षादिरहितस्यापि तात्पर्यज्ञानादेर्हेतुतया वाक्यपदानुपादाने केवलशब्दपदात्तन्न लाभ इति वाक्यपदोपादानापेक्षेति
भावः तत्र तल्लाभस्त्विति अन्यूनविषयकशाब्दत्वावच्छिन्नोपयिकाकांक्षादिमत्त्वलाभस्त्वित्यर्थः शाब्दपदस्यावयवशक्त्या
शाब्दजन्यज्ञानत्वावच्छिन्नार्थकत्वे शाब्दजन्यतावच्छेदकजातिविशेषानुपस्थित्या तदवच्छिन्नजन्यताप्रतियोगिकजनक
तालाभो न भवतीत्यत उक्तं जातिविशेषोपस्थापकेति तथा च कार्यादिशिशाब्दत्वजातेः कारणादिशिच वाक्यपदेनाा
कांक्षादिमत्त्वस्य लाभात् तादृशशाब्दत्वावच्छिन्नोपयिकाकांक्षादिमत्त्वलाभ इति भाव इति भाव इति व्याख्याने तदसत्
अवच्छेदकतापर्याप्त्यनिवेशात् निरुक्तन्यूनविषयकत्वावच्छिन्नजन्यतानिवेशमात्रेणोपपत्त्या शाब्दत्वनिवेशप्रयोज
नाभावाच्च उपस्थितेरप्रयोजकत्वात् न च तत्तद्धर्मविषयकत्वस्य शाब्दत्वानिष्ठजन्यतावच्छेदकतया जन्यतायां तदवच्छि
न्नत्वविरहात् अन्यूनविषयकशाब्दत्वावच्छिन्नत्वेनैव जन्यतानिवेशनीयेति वाच्यं विनिगमनाविरहेण शाब्दत्वविशि
ष्टतत्तद्धर्मविषयकत्वस्यापि जन्यतावच्छेदकत्वात् ननु अन्यूनानतिरिक्तपदपरित्यागे अनुमितिविषयकशाब्दबोधजन
कमित्यवशिष्यते तथा च पर्वतो वह्निमानित्यादिप्रतिज्ञावाक्यस्यानुमितिबोधकतया व्याप्तिरित्याशंकां परिजिहीर्षु
रनुमितिविषयोपस्येति मध्यमपदलोपिसमासाभिप्रायेण समुदितलक्षणपर्यवसितार्थं व्याचष्टे तथा चेति दृष्टान्तव
तद्वन्निष्ठनिगमेणोदाहरणस्य इत्यादितान्वयः अन्वयकदाहरणस्य लिंगबोधकत्वाद्व्यतिरेकिण्यर्थे तात्पर्यानुधावने यो यो धू
मवान् स वह्निमानित्याद्युदाहरणस्य वह्न्यभावादिरूपलिंगाबोधकत्वात् पदविषयकत्वमात्रनिवेशेनैव तादृशोदाह

ग॰
ग्र॰
28

रणाचारणसंभवेन पक्षसाध्यविशेष्यकत्वपर्यंतस्य विवक्षणीयस्य व्यावृत्तिदानाय यथा कृतोभिन्नमित्यादि दृष्टांतघटितत्
दत्तमरणे दृष्टांताघटितेप्युदाहरणे व्यावृत्तिमाह कृतोत्पन्नेति उपनयवारणायेति पक्षतावच्छेदकावच्छिन्नपक्षविशे
ष्यकत्वनिवेशस्य प्रयोजनांतरविरहेप्येतदर्थमेवतन्निवेशेऽनुषंगपदेनिगमनातिव्याप्तिर्नसंभवतीत्यभिप्रायेणनिग
मनोपेक्षानन्तमनेनतेभ्योभिद्यत इत्यादि निगमनस्य पक्षविशेष्यत्वाभावान्निगमनसामान्ये नातिव्याप्तिसंभव इत्यभिप्राये
णवा वस्तुतः पक्षसाध्यविशेष्यकत्वनिवेशोपि गौरवसाक्षात्वाभाववह्नोत्वाभावादित्यत्र सास्नात त्रयोत्वमित्युदाहरणे पक्ष
साध्याविशेष्यकबोधजनकेतिव्याप्तिर्दीवैवपक्षमात्रसाध्यविशेष्यकत्वनिवेशेचविस्वपक्षकस्थलेमात्रायाप्रसिद्धा
व्याप्तिरिति पक्षतावच्छेदकावच्छिन्नसाध्यविशेष्यकत्वानिरूपकत्वमेव विवक्षणीयं तथा च निगमने ऽनुषंगपदे
नातिव्याप्तिर्नसंभवत्येवेतिध्येयं लिंगत्वस्य केवलान्वयित्वेन यासामान्यतोलिंगाविषयकत्वं ज्ञाने प्रसिद्धमिति प्रकृतलिंगा
विषयकत्वं विवक्षणीयं तथापि न निरस्तावदित्याशयेनाह यद्यपि प्रकृतेति प्रकृतलिंगतावच्छेदकावच्छिन्नाविषय
कत्वविवक्षणेपृथिवीइतरेभ्योभिद्यत इत्यादि प्रतिज्ञायासंग्रहः तत्रस्वबोधेस्वरूपतपवपृथिवीत्वादिरूपलिंगभाना
दित्याशयेनस्थानांतरेदोषनाहंगपवतीति तथाइतरेभ्योभिद्यतेऽनयसंभवइति तथाचताहृशप्रतिज्ञादिघटितन्याय
पवनसंभवतीतिकाव्याप्तिरितिभावः इदमाइदंशाहुस्यप्रतिज्ञोपदर्शितपक्षतावच्छेदकावच्छिन्नपरत्वादितिभावः गं
धवत्वान्वयेति गंधवद्भेदान्वयस्येत्यर्थः अयोगादिति उद्देश्यत्वान्वविधेयत्वावच्छेदकयोरैक्येभेदान्वयबोधस्याव्युत्प
न्नत्वात् अन्यथाघटोघट इत्यादावप्यन्वयप्रसंगादितिभावःसाध्याभावेति साध्याभावव्यापकीभूतोगंधाभाववत्तद्भाववत्वेने
त्यर्थः तथाचाभिन्नरूपेणगंधादेरुद्देश्यत्वविधेयतावच्छेदकगर्भेतभावान्नान्वयबोधानुपपत्तिरितिभावः ननुहेत्वभा
वाभावत्वेनहेतुरूपस्याव्यापकत्वाभावात् कथं उपनयवाक्यात्तेन रूपेणपदेहेतुवाणमित्यतआह अतएवेति साध्याभाव

व्यापकतावच्छेदकहेत्वभावत्वाद्यवच्छिन्नाभावत्वेन हेत्वन्वयाद्यविरोधादेवेत्यर्थः नचनेयं पृथिवीतिनञ्द्वयेनाभावा
भावत्वेन हेतुबाधनादितिभावः यद्यपि पृथिवीत्वहेतुकस्थलेनाहार्योपनयप्रयोगो न क्रियते पृथिवीपदात्तत्स्वरूप
तएवउपस्थितस्य पृथिवीत्वरूपपदार्थतावच्छेदकस्य नञर्थाभावान्वयासंभवेन हेत्वभावाभावत्वेन हेतुत्वलाभात् नच
हेतुमद्भेदाभावोपि हेतुरेवान्योन्याभावाभावस्य प्रतियोगितावच्छेदकरूपत्वात् एवं हेतुतद्भेद एव व्यापकतायत्रनेतर
भेदस्तत्र पृथिवीत्वमित्युदाहरणेन बोध्यते इति पृथिवीभेदाभावत्वेन पृथिवीत्वबोधकतया हार्योपनयो क्रियत इति वाच्यं ए
वमपि पृथिवीत्वादितिहेतुवाक्योपस्थितपृथिवीत्वत्वविशिष्टहेतुकानुमितौ प्रयोजकतद्रूपविशिष्टवद्भेदत्वावच्छिन्ने
साध्याभावव्यापकतायामवाकांक्षितायां तस्या एव यत्र नेतरभेदस्तत्र पृथिवीत्ववदित्युदाहरणेनोपदर्शनीयतया तया
तद्रूपविशिष्टवद्भेदत्वावच्छिन्नाभावत्वेन हेतुमत्तायाएवउपनेयत्वात् आहार्योपनयासंगतेः अन्यथा पृथिवीइतरेभ्यो
भिद्यते गंधसमवायिकारणतावच्छेदकरूपवत्त्वादित्यादावपि पञ्चावयवप्रयोगार्थयोगापत्तेरिति तथापि तादात्म्ये
न पृथिवीहेतुकस्थलाभिप्रायकमिदं आदिपदात्तु चनेयं गंधवतीत्याद्याकारस्य नचनायं गंधवत्याद्याकारस्य वाउप
नयस्य परिग्रहः अत्र हेत्वभावादौ साध्याभावव्यापकत्वाभावेपि न क्षतिः प्राचीनमते उदाहरणादेव व्याप्तिलाभेन पक्ष
धर्मतामात्रस्योपनेयत्वात् अत एव प्राचामभिरुक्तसाध्याभावव्यापकीभूतादौ च व्यापकांतमुपलक्षणार्थं कं नचैवनेव पृथि
वीत्यादिकं प्राचीनानामते नयोसंगतः नञर्थाभावस्य प्रतियोगित्वयोग्यपदार्थम गौणे वा शाब्दानुभवे भानात् अन्यो
न्याभावबोधे समानविभक्तिकप्रतियोगिपदानुयोगिवाचकपदसमभिव्याहारस्य संसर्गाभावबोधे च सप्रमातानुयोगिवा
चकपदसमभिव्याहारस्यापेक्षितत्वात् प्रकृते चानुयोगिवाचकपदाभावेन पृथिवीभेदगंधाभावाभावादिबोधासंभ
वादिति नवीनानुमते तु इतरव्यापकीभूताभावप्रतियोगिगंधकत्वाचेयमित्याद्याकारकोपनयएवादरणीयः तत्र च हेतुः

ग॰ प्र॰

29

पक्षतावच्छेदकत्वेदर्शितन्यूनत्वमिति दोषोद्धारप्रवेशालोचनत्वमते समाधानमाह यदि वेति इत्युच्यते इत्यंतेनिगमेणा-
न्वयः तद्विशिष्टइति तद्धर्मधर्मितावच्छेदकीकृतत्वरूपेणाविशेषितं तद्धर्मावच्छिन्नाभेदान्वयबोधस्यैव न्यूनत्वविरुद्ध-
त्वादित्यविरुद्धत्वादित्यर्थः नानुपपत्तिरिति प्रकृते तदुद्देश्यपक्षतावच्छेदकाघटकव्याप्तेर्विधेयतावच्छेदकघटकतयाभाना-
दितिभावः तथाच गंधवतीत्येन तेभ्योभिद्यते गंधादित्यादिन्यायस्यापि निष्प्रत्यूहतया लिंगविषयकता दृश्यन्यायो-
नतीतप्रतिज्ञायामव्याप्तिर्दुर्वारैवेति भावः ननु पक्षताविशेषणतायां लिंगविषयत्वं न न्यूनत्वे विवक्षणीयमतो नो-
क्ताव्याप्तिः उक्तस्थले पक्षविशेषणतयैव लिंगविषयिता सत्त्वेन विशिष्टाभावसत्त्वात् इत्यत आह पक्षताविशेषणत्वे-
ति अयं वह्निसामग्रीमान् वह्निरित्यादावपीति अव्यापकमित्यग्रिमेणान्वयः अथ पक्षताविशेषणत्वे पक्षनिरूपितवि-
शेषणतात्मकलिंगविषयतायाः परंपरया पक्षतानिरूपितत्वात् गंधवती तेभ्योभिद्यत इत्यादावपि मत्वार्थसंबंधविशे-
षणीभूतगंधविषयतायाः गंधसमानकालीनत्वप्रवती पृथिवी इतरेभ्योभिद्यत इत्यादौ तद्विषयतायाश्च साक्षात्पक्ष-
निरूपितविशेषणतात्मकत्वेन साक्षात्परंपरासाधारणनिरूपितत्वस्यैव निवेशनीयत्वादिति चेन्न पक्षताविशेषणा-
त्वं यथाश्रुतार्थकं न तावन्निगमनानां नित्याव्याप्तिः नचनिगमने अयं पदान्तरप्रसंगे उक्तयथाश्रुतपक्षतावच्छेदकानवच्छिन्नशाब्द-
विशेष्यकान्यत्वस्य पत्तत्वरोधेनैव वा पक्षतावच्छेदकावच्छिन्न मुख्यविशेष्यकत्वस्य विषयकोनार्थस्य विवक्षणीयत-
या नातिव्याप्तिरिति वाच्यं एवमपि अनुपपंगपदेन च्यातिव्याप्तेर्दुर्वारत्वात् अतः पक्षतावच्छेदकप्रकारतानिरूपकवि-
शेष्यतानिरूपितप्रकारतान्यत्वमेव तदर्थो वाच्यः पक्षतावच्छेदकप्रकारतातः पातिती सर्वप्रकारताताहशविशेष्य-
त्वनिरूपिता इयांस्तु विशेषः क्वाचित्साक्षात्क्वाचित्परंपरया न चेति विधेयकोटिप्रविष्टपदार्थीयप्रकारताचान धर्मिता-
वच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपिता विधेयनिरूपितविशेष्यतायाधर्मितावच्छेदकावच्छिन्नतयाधर्मितावच्छे-

दकप्रकारतानिरूपितविशेष्यतायास्तु त्वस्य स्वधर्मितानवच्छेदकत्वेन तदनवच्छिन्नतया विधेयताद्धर्मितावच्छेद
कप्रकारतानिरूपकविशेष्यतयोर्भेदादिति निगमनादिजन्यबोधे पविधेयकोटिप्रविष्टलिंगविषयतानपक्षतावच्छे
दकप्रकारतानिरूपकविशेष्यतानिरूपिततानिरूपितविशेषणतात्मिकेति न निगमनाद्यनिव्याप्तिः एवं च वह्निसामग्रीमानुव
न्हेरित्यादावव्याप्तिः प्रसज्यत एवेति पक्षेन एवं तो वह्निमान् धूमादित्यादिप्रसिद्धन्यायान्तर्गतोपनये तिव्याप्तिप्रसंजकत्वे
नैनतद्विवक्षणशंकाया यथामारोहति नचायं दोषो न व्यापकं चोपनयस्येत्यनेन स्वयमेव वक्तनयदंतिनाऽऽपपत्तिरिति वाच्यं
उपनयं चारणार्थकेन तादृशलिंगविषयकत्वविशेषणस्य स्वयं प्रागुपात्ततया उपनयमात्रस्यैव तादृशविवक्षायाम
तिव्याप्तिस्तदोषशंकाया असंदर्भविशेषस्य जागरूकत्वादित्यपि समाहितं नचैवमपि व्यापकं चोपनयस्येति ग्रंथासंगतिः
तादृशग्रंथस्य धूमवान् वह्निमान् धूमादित्यादिन्यायान्तर्गतोपनयविशेषपरत्वात् तत्र हेतोरेव यज्ज्ञानतावच्छेदकतया पक्ष
तावच्छेदकावच्छिन्नांशे यद्विशेषणत्वं तस्यापि पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वात् एवं व्यापक
त्वनिरूपकत्वतायामपि स्वात्मकपक्षतावच्छेदकप्रकारतानिरूपकाधिकरणनिष्ठविशेष्यतानिरूपितप्रकारतात्मकत
यातिव्याप्तिसंगतेः यत्तु पक्षतावच्छेदकहेतुकव्यतिरेक्युपनयपर्यंतपरतया तादृशग्रंथसंगमनं श्रुत्वत्युपनये
तज्जन्यबोधे व्याप्तिघटकतया लिंगविषयत्वसत्त्वेनातिव्याप्तिर्न संभवतीत्यभिमानेन केषांचिन्मतं तत्तुहेतेनाश्रद्धेयम्
तद्विशेषणत्वेन साध्याविशेषणत्वेन चेति पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारताभिन्नत्वे
सतिसाध्यतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारताभिन्नयल्लिंगविषयत्वं तच्छून्यत्वमित्यर्थः साध्य
विशेषणतयोपनयस्य यथाश्रुतार्थकत्वे निगमने परंपरया साध्यविशेषणतयैव लिंगमानादनिव्याप्त्यापत्तेः नचैवम
पि ज्ञानविषयवान् धूमादित्यादिन्यायान्तर्गतनिगमने रनिव्याप्तिस्तादवस्थ्यमेव ज्ञानविषयत्वरूपसाध्यतावच्छेदकप्रकार

ग॰
प्र॰
30

तानिरूपकविशेष्यतानिरूपितत्वस्य हेतुप्रकारतायां सत्त्वादिति वाच्यं शुद्धसाध्यतावच्छेदकप्रकारतानिरूपकवि
शेष्यताया एव विवक्षणीयत्वात् ननु एतद्धर्म्मलिंगाविषयकत्वविवक्षणे दीधितिकृन्मत्यादौ नाव्याप्त्यवकाशः दीधिद्
व्यमिति बोधस्य दीधितिग्रन्थैकविषयकस्य दीधितिसमवेतस्वाविषयकत्वसंभवादतः स्यालोतरमाह प्रमेयत्वमिति न
नु प्रमेयत्वं तत्तद्विषयभेदादिभिन्नं एवं च घटनिष्ठप्रमेयत्वविषयकस्य प्रमेयत्वमभिधेयमिति बोधस्य प्रमेयत्वरू
पपक्षनिष्ठप्रमेयत्वाविषयकस्य संभवात्साध्याव्याप्तिरतः स्यालोतरमनुसरति गोत्वाभाववदिति ननु पक्षतावच्छेदक
विशिष्टपक्षविषयतानंतःपातिलिंगविषयत्वाशून्यत्वनिवेशेनोपदर्शितहेतुपक्षकप्रतिज्ञायामसंभवाद्दः तदंतः
पातित्वं च पक्षतावच्छेदकविशिष्टेति पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यतानिरूपितायां साध्यतावच्छेदकावच्छि
न्नसाध्यप्रकारतानिरूपितवैशिष्ट्यविषयतानन्तर्बहिर्भूतलिंगविषयताशून्यत्वमित्यर्थः अथ तन्तर्बहिर्भूतत्वं साक्षा
त्परंपरासाधारणं यन्निरूपकत्वं तदभावः पक्षतावच्छेदकप्रकारताया उक्तयत्वात्तदनिरूपकत्वात्कथंचिन्नि
रूपकत्वोपपादनेपि यत्र संयोगेन वह्नेः साध्यता वह्निसंयोगत्वेन हेतुता तत्र प्रतिज्ञायामव्याप्तिः हेतुभूतवैशिष्ट्यवि
षयतायाः स्वनिरूपकत्वविरहात् एवं साक्षात्परंपरसाधारणानुगतनिरूप्यनिरूपकाभावोपि दुर्वचः परंपरानि
रूपितत्वस्य तन्निरूपितनिरूपितत्वानात्वाद्यात्मकत्वाद्यात्मकत्वात् एतेन तादृशवैशिष्ट्यविषयतानिरूपकविषय
त्वानिरूपितत्वं तादृशाविषयताबहिर्भूतत्वं तद्वैशिष्ट्यविषयतासाधारणं तान्निरूपकप्रकारताविशेष्यतानिरूपित
त्वमादाय तन्निरूपकविशेष्यताप्रकारतासाधारणं चेत्त्वक्राव्यपिनतिस्ताद्दृति चेन्न तथाविधवैशिष्ट्यविषयताशा
लिनिष्ठ्ययत्वासमव्यापकप्रतिबंधकतानवच्छेदकत्वामेव तन्तर्बहिर्भूतत्वं निगमनजन्यबोधीयहेतुविषयता च यादृ
शप्रतिबंधकतावच्छेदककोटौ निवेशितेन तादृशी कापि प्रतिबंधकता न तथाविधनिष्ठ्ययत्व व्यापिका हेतुविषयकाता

दृशवैशिष्ट्यविषयताशालिज्ञानासाधारण्यात् अन्तस्तत्पर्याप्तविषयतायास्तद्बहिर्भावात्तत्त्वोपपत्तिरित्यननुगमप्रसंगोपि न निग
मनातिव्याप्तिः तादृशानिरूपितत्वव्यापकत्वमात्रस्य प्रतिबंधकताविशेषणत्वे धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यत्र
हेत्ववयवेऽतिव्याप्तिः तादृशं हेतुनिष्ठाया हेतुत्वधूमीयत्वेनेति संशयप्रतिबंधकतावच्छेदकतादृशबोधविषयतायाति
तज्ज्ञविषयतावहिर्भूतत्वात्तद्घटितेन तत्तादृशानिरूपितत्वव्याप्यत्वामपि प्रतिबंधकताविशेषणे नच प्रत्ततावच्छेदकाव
च्छिन्नवृत्त्यविशेष्यताकाचनिवेशस्यावश्यकतया नैतादृशातिव्याप्तिसंभवनेनिव्यर्थव्याप्यत्वनिवेशनमितिवाच्यं त
थाप्यननुगमप्रसंगप्रत्ते धूमाद्वह्निमतः सधर्मापर्वतो वह्निमान्धूमादित्यादित्यालीयनिगमने हेतुत्वं प्रमेयाद्वाच्यत्ववत्प्रमेया
दित्यादित्यालोपहेत्ववयवे चातिव्याप्तेर्दुर्वारत्वात् तन्निवेशस्यावश्यकत्वादिति नच तद्धर्मितावच्छेदकाविनिष्टप्रकार
त्वेन प्रतिबंधकतावच्छेदकमपि तु तन्निष्टविशेष्यतावच्छेदकत्वमेव तथाच गंधवतीतरेभ्यो भिद्यते इत्यादि प्रतिज्ञाजन्य
बोधीयहेतुप्रकारतायास्तद्बहिर्भूतत्वाद्व्याप्तिरिति वाच्यं विशेष्यतावच्छेदकताया एव प्रकारतात्वोपगमेन तत्तादृश
बोधेन तदन्यप्रकारतानभ्युपगमात् एवं सति प्रसक्तस्य भूतले घटवदित्यादिज्ञानस्य भूतलत्वांशे तद्धर्मितावच्छेदक
त्वास्य प्रकारांतरेण संभवात् अस्तु वा विशेष्यतावच्छेदकताव्याविषयताप्रकारताप्रकारतानोरन्यैव नथापि न द्वितिः
तादृशाविषयतावहिर्भूतविषयताशून्यत्वं ज्ञानविशेषणं अपेक्ष्यतादृशावहिर्भूतविषयतानवच्छिन्नजन्यतानिरूपि
तजनकतायावाक्यविशेषतात्वोपगमेन विशेष्यतावच्छेदकताभिन्नगंधादिविषयतायाः प्रतिज्ञाजन्यबोधे सत्वेपि तस्
स्याः प्रतिज्ञाजन्यतावच्छेदककोटिनिवेशप्रयोजनाभावेन तदनुमितिसमानविषयकत्वनिवेशेनस्य पूर्वोक्तस्य वैयर्थ्य
प्रसंग इति तादृशालिंगविषयत्वाशून्यत्वानिवेशेन अवेद्याभावस्य घटकतया नालिंगांशे वैयर्थ्यं उक्तरीत्या बहिर्भूतत्व
निवर्चनाया सविछेषात्कल्पांतरमाश्रयते वस्तुतः सत्वातिलिंगत्वमिति व्याप्तिरित्यर्थः तत्वत्रानतुगतयोरन्वयव्याप्तिरे

ग० प्र०

31

कव्याप्योस्तद्घटकव्यापकत्वयोर्वाएकतरमात्रस्यविषयतायाउपादानेऽनवबोधकोपनपादावतिव्याप्तिरित्याशंकया
तादृशव्याप्तिघटकताद्वयविषयत्वयोरनुगतरूपेणाभावनिवेशयतितथाचेतिप्रकृतहेतुतावच्छेदकावच्छिन्नस्यानिग
मकत्वाल्विनव्याप्तिविषयकत्वमित्यत्रव्याप्तिपदंव्यापकत्वविषयतानिष्ठसाध्यतावच्छेदकादिविषयत्वावच्छेदकावच्छि
न्नसाध्यकानुमितित्वावच्छिन्नजनकतावच्छेदकत्वपत्यधर्मत्वाविषयकोदाहरणजनव्यबोधीयकाव्यापकत्वादिविषयता
याअनुमितिजनकतावच्छेदककोटिप्रविष्टतयातत्रातिव्याप्तेः नचहेतुव्यापकत्वादिविषयतात्वेनैवतद्विषयतानाजनक
तावच्छेदककोटौनिवेशादनुमित्यजनकस्यापितादृशज्ञानस्यविषयतानांतादृशरूपाक्रान्तानांतथात्वमतएवेतिवा
च्यं तादृशविषयत्वानांतेनपदविशेषणतापन्नहेतुविशेषणतायत्रसामानाधिकरण्यविशेषणतापन्नसाध्यादि
विषयतानिरूपितव्यापकत्वविषयतायाएवकारणतावच्छेदकघटकत्वात्तादृशपात्तदवच्छेदकत्वाभावात् यद्रू
पावच्छिन्नविषयताजनकतावच्छेदिकातद्रूपावच्छिन्नविषयताशून्यत्वनिवेशेचसाध्यतावच्छेदकावच्छिन्नविषयता
याअप्यनुमितिजनकतावच्छेदककोटिप्रविष्टतयातादृशशून्यत्वस्यप्रतिज्ञानवच्छिन्नव्यापकत्वंसाध्यस्यापदासा
वाच्चघटकं यत्रतत्स्यालीयप्रतिज्ञायाअसंग्रहः यत्त्वतत्त्वनिवेशादनुगमानवकाशस्त्विति चेन्न पदतावच्छेदकावच्छिन्न
ज्ञानविशेष्यतानिरूपितविषयतानिरूपितायाविषयतानन्निरूपितविषयतानिरूपितविषयतायांविशेषणविधया
प्रकृतानुमितिजनकतावच्छेदकतावच्छेदकतायाःपर्याप्त्यधिकरणधर्मावत्त्वेनहेतुव्यापकताविशिष्टसाध्यविषय
त्वसाध्याभावव्यापकत्वविशिष्टहेत्वभावविषयत्वेऽनुगमप्रसञ्जनदभावस्यनिवेशनेनानुपपत्त्यभावात् प्रकृतानुमिति
जनकतावच्छेदिकायाअन्वयपरामर्शोहेतुव्यापकतावच्छिन्नसाध्यविषयतायाः पदतावच्छेदकावच्छिन्नविशेष्य
तानिरूपितहेतुविषयतानिरूपितापेक्षत्वविषयतानिरूपिताधिकरणविषयतानिरूपितत्ववत् व्यतिरेकिपरामर्शो

यत्साध्याभावस्य व्यापकतावच्छिन्नहेत्वभावविषयताया अपि तादृशविशेष्यतानिरूपितसंसर्गोपविषयतानिरूपितहे
त्वविषयतानिरूपितप्रतियोगितात्वविषयतानिरूपितत्वेन साध्याभावव्यापकताविशिष्टहेत्वभावविषयतात्वस्यापिहे
तुव्यापकताविशिष्टसाध्यविषयतात्वव्यतिरेकाविषयत्वविशेषणविधयानुमितिजनकतावच्छेदकतावच्छेदकता
पर्याप्त्यधिकरणत्वात् यद्यपि यथा परं पक्षव्यापकत्वविशेष्यताया अनिरूपिता उदाहरणजन्यबोधीयहेतुव्यापकतावि
शिष्टसाध्यादिविषयताघटितत्वेन तदीयसाध्यादिविषयताविशेषणताया व्यापकत्वविषयतानिरूपितत्वस्यानुमिति
जनकतावच्छेदकप्रवेशो न संभवति जनकतावच्छेदकविषयतावृत्तेरेव धर्मस्य तादृशविषयताविशेषणतया जनक
तावच्छेदकतावच्छेदकत्वसंभवादिति निरुक्तपक्षविषयतापंचमविषयतांशे विशेषणतयावच्छेदकत्वापर्याप्त्यधि
करणं यत्साधनादिव्यापकत्वविषयतानिरूपितत्वसहितसाध्यादिविषयत्वात्वेनात्रोदाहरणजन्यबोधीयसाध्यादिविष
यतासाधारणं तथा चोदाहरणे तन्निष्ठानिरुक्तीरेवं तथापि निरुक्तजनकतावच्छेदकत्वावच्छेदकतापर्याप्त्यधिकरणध
र्मावच्छिन्नविषयतावच्छिन्नाया अप्रतिबंधकतानवच्छेदकविषयतात्वेनोदाहरणजन्यबोधीयहेतुव्यापकसाध्यादिविष
यतायाः संग्रहो बोध्यः अनुमितिजनकतावच्छेदकपरामर्शीयसाध्यादिविषयताया हेतुव्यापकतादिविषयतानिरू
रूपितसाध्यादिविषयतात्वेन साध्यहेतुव्यापकं न वेत्यादिसंशयप्रतिबंधकतावच्छेदकत्वात् तादृशप्रतिबंधकताद
शाद्रूप्येणोदाहरणज``बोधीयसाध्यादिविषयताया अप्यवच्छेदकत्वात् आद्यविशेष्यतानिवेशात् गोत्वाभावः प्रमेयत्व
व्यापकवाच्यत्ववत् सास्नाभाववान् गोत्वाभावादित्यत्र तादृशविशिष्टसाध्यकप्रकृतानुमितिजनकपरामर्शीयस्वा
त्मकपक्षविशेषणतामत्र गोत्वाभावविषयतानिरूपितप्रमेयत्वविषयतानिरूपिताधिकरणविषयतानिरूपिता सास्नाभा
वविषयतानिरूपितवाच्यत्वविषयतांशे विशेषणविधयावच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मवत्त्वप्रमे

ग॰
प्र॰

यत्वव्यापकत्वाख्यविषयतायाः प्रतिज्ञाजन्यबोधे सत्त्वेपि न क्षतिः न च साध्याभावव्यापकहेत्वभावप्रतियोगिमानिति परा-
मर्शीयपक्षविशेष्यतानिरूपिता हेतुविषयतानिरूपितप्रतियोगित्वविषयतानिरूपिताभावविषयतानिरूपितव्यापक-
त्वविषयताया अपि निरुक्तविषयत्वात् तादृशविषयत्वविशेषणेन यावदवच्छेदकीभूतं साध्याभावव्यापकत्वविषयता-
त्वमपीति वस्त्वभावव्यापकमेयत्ववान् पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिरिति वाच्यं किंचिद्व्यापकत्वविषय-
तांशे विशेषणेन यावदवच्छेदकत्वास्यनिवेशनीयत्वात् वस्तुतस्तु चतुर्थविषयतायामभाववृत्तिप्रकारताभिन्नत्वस्य नि-
वेशनीयत्वान्न कोपि दोषः व्यापकत्वादिविषयतायास्तु न तथात्वात् व्यतिरेकपरामर्शीयपंचमविषयताया एवाभाव-
प्रकारतात्वात् अन्वयव्यतिरेकव्याप्तिघटकव्यापकताद्वयविषयतायोर्विशिष्टाभावद्वयनिवेशपरो नायं ग्रन्थः तथा-
सति प्रकृतहेतुतावच्छेदकेत्याद्यनुगतताशङ्का नोभयोरुक्तौ नैव वैयर्थ्यापातात् विशिष्यापि तदुभयावगाहित्वस्य तत्त्वे-
त्यादिना दर्शनीयतया प्रथमत एव विशिष्य तदुभयावगाहित्वार्थकत्वोपवर्णनौचित्यात् तच्चेति तादृशात्मकत्वो-
पयिकविषयत्वं चेत्यर्थः हेतावितिहेतुव्यापकत्वाविशिष्टसाध्यविषयित्वमित्यर्थः अतो नोक्तानुगमविरोधः हेतुभू-
ताभावप्रतियोगितावच्छेदकेति तादृशप्रतियोगितावच्छेदकं च धूमादिभावहेतुकस्थले धूमाभावत्वादिकं वह्न्यभावा-
दिकं वह्न्यभावादिहेतुकस्थले च वह्नित्वादिकं एतत्संग्रहभयेनैव हेत्वभावत्वावच्छिन्न इति नोक्तं तन्न यथा सति अयं निर्धू-
निर्वह्नित्वादित्यादौ यत्र धूमस्तत्र वह्निः धूमव्यापकवह्न्यभाववांश्चायमित्याद्याकारकयोरेवोदाहरणोपनययोः प्रयो-
गाद्वह्नित्वाद्यवच्छिन्न एव साध्याभावव्यापकतायास्तत्र प्रतीतिर्न तु वह्न्यभावाद्यभावत्वावच्छिन्न इति तत्रातिव्याप्त्यभावा-
प्रतिपादनेन न्यूनतापत्तेः हेतुतावच्छेदकसाध्यतावच्छेदकानिवेशप्रयोजनमाह द्रव्यत्वेति ज्ञासंग्राहार्थेन प्रथमोपद-
र्शितप्रतिज्ञाविषयसंयोगत्वावच्छिन्ननिरूपितव्यापकताया अपि संयोगत्वेन गुणहेतुकद्रव्यत्वत्वाद्यवच्छिन्नानुमितेः ।

द्वितीयप्रतिज्ञाविषयगुणत्वावच्छिन्नव्यापकतायाः गुणत्वेन स्पर्शसाध्यकद्रूपत्वावच्छिन्नहेतुकानुमितेः प्रयोजकतया
ग्रवच्छेदकद्वयादाने तत्र तत्राव्याप्तेरिति भावः नन्वेवं लिंगत्वाविषयकत्वाविशेषणेनैवउदाहरणस्यापिवारणस्यापिवा
रणे एवौज्ञानुमितिसमानविषयकाविशेषणस्याव्याप्तिर्नसंगच्छत इति सत्यं तोत्तरविषयोत्तत्यागस्यैवावश्यकत्वेनान्य
नातिरिक्तपदमात्रपरित्यागपरस्थूलविशेषइत्यालोच्य तादृशस्थूलस्य च तथाविधसमुदायपरित्यागपरत्वमेवाहान्य
नेति नन्वेतत्कल्पेहेतुवारणायैव पक्षविशेष्यकत्वपर्यवसिततादृशविशेषणोपादानमावश्यकं न तु ज्ञानत्वबोधस्याव्याप
कत्वाविषयत्वेन लिंगत्वाविषयकत्वदानेनावारणादिति कथं समुदायपरित्याग इत्यत आह हेतुत्वमिति पंचम्यर्थप
त्वकइति तथाच पक्षगुणविशेष्यकत्वमापन्नतादृशहेतुजन्यबोधे वृत्तमिति न तद्वारणसंभव इति भावः पंचम्यन्तान्य
त्वस्यनिवेशे च ढोदंडात् पटो न दंडादित्यादि पंचम्यन्तप्रतिज्ञानां प्रसंग्रहमालोच्याकांक्ष्यंतरमाह हेत्वन्येति अवयवा
न्त्वादिति तथाच तात एव सकलहेतुवारणे उक्तसमुदायदलपरित्यागो न दूषणमावहतीति भावः नन्वज्ञापकत्वमेच
म्यर्थः सच प्रकृत्यर्थस्य विशेषणतयैव भासते न तु विशेष्यतया तथाच कथं पंचम्यर्थपदजन्यायांतर्गतहेतोः पदत्तु
त्य विशेष्यकाबोधजनकत्वमत आह संख्येति विभक्त्यर्थस्यैकत्वादेः प्रकृत्यर्थविशेषणतया बोधस्यानुभविकः तस्य वि
शेष्यत्वे च घटमित्यादितः एकत्ववकर्मत्व च घटोयमित्याकारकसर्वानुभवविरुद्धसमूहालंबनबोधापत्तेरतः संख्यातिविक्ते
ति विभक्त्यर्थविशेषणोत्यर्थस्य दृष्टसाधनत्वादेः प्रकृत्यर्थविशेषणतया भानात् प्रत्ययार्थसामान्ये पदार्थविशेष्यत्वेनैव त्यत्र
यत्किमाह यादिकार्थयोरिति समानविभक्तिकनामार्थयोः क्रियाविशेषणीभूतद्वितीयान्तनामार्थधात्वर्थयोश्चाभे
दान्वयबोधस्याभेदेनेति तयोरपि विभक्त्यर्थसंसर्गात्परस्परयाभेदान्वयबोधात्मत्वादिति प्रकृत्यन्तरे वेदूर
माणत्वादिति भूतलं च घट इत्यादावाधेयभावादिसंबंधेन च न भूतलाद्योस्तंडुलः पचतीत्यादौ च क्रियाकर्मादिभावेन ताद

ग॰
प्र॰
33

लपाकाद्यो ऽन्वयबोधानुदयादिति भावः तथा च प्रत्ययार्थस्य प्रातिपदिकार्थविशेषणत्वे विभक्त्यर्थस्यान्तराभानेन प्रातिप
दिकार्थस्य भूतलतंडुलादेर्घटनाकादौ आधाराधेयत्वाकर्मत्वादिसंबंधेन साक्षादेवान्वयबोधस्य भूतले घटः तंडुलं पचती
त्यादितः स्वीकरणीयतया तादृशव्युत्पत्तिविरोध इत्याशयः न च भूतलं घट इत्यादौ घटाधिकरणं भूतलमित्याद्याकारा
वान्वयबोधः उपपत्तेर्नानोपदर्शितव्युत्पत्तिविरोध इति वाच्यं तथा सत्यशाब्दबोधे अनुभवसिद्धस्य प्रथमान्तार्थमुख्यविशे
ष्यकत्वस्य भंगप्रसंगात् नञ्विभक्त्यर्थः संसर्गतयैवभासते नञ्विशेष्यतया तद्वदादावाधेयत्वादिसंबंधेन भूतलादिप्र
कारकबोधे च न समासादिविभक्तं च न भूतलादिवाचकपदसमभिव्याहारस्य नियामकत्वान्नोक्तातिप्रसंगः न चैवं भूतले
घटादिस्यादिभागमात्रस्यानुभावकत्वप्रसंगः इष्टत्वात् आख्यातविभक्त्यर्थाधिकरणत्वात्वाद्यापकत्वादिविशेषित
स्यैव प्रकृत्यर्थस्य तत्तल्लिंगविनिवेशाधेयत्वव्याप्यत्वादिसंबंधेनान्वय इत्यतो विभक्त्यर्थस्याविशेष्यत्वेनेदं मैत्रस्येत्यादौ मै
त्रादिविशेषितस्वत्वादिरूपस्याभावप्रतियोगिनो ऽवाक्यादनुपस्थित्या नञर्थानुबोधानुपपत्तिमाह चैत्रस्येदमि
ति मैत्रादेरेवाभावो नञा बोध्यते नञ्स्वत्वस्येत्याशंकां निराचिकीर्षुणा लङ तन्मयमेवैजीयघानोपि संयोगसमवायादिना
चैत्रादिभावसत्वेन स्वयं चैत्रस्येदमिति व्यवहारस्तत्र न चैत्रस्येदमित्यपि व्यवहारः स्यादिति सूचयितुं चैत्रस्येत्युक्तं न च स्व
त्वादिसंबंधेनैव प्रकृत्यर्थस्याभावो दर्शितस्थले नञा बोध्यते तथा च नोक्तातिप्रसंग इति वाच्यं व्युत्पत्तिनियामकतया स्वत्वा
देरभावप्रतियोगितावच्छेदकसंबंधत्वाभावात् नामार्थप्रतियोगिकाभावस्यानुयोगिनि सप्तमीं विना नञा बोधयितु
मशक्यत्वाच्च व्युत्पत्तिनियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वोपगमेपि स्वत्वादिसंबंधावच्छिन्नाभावस्य षष्ठ्याद्यर्थ
चैत्रादिपदासमभिव्याहृतनञा बोधनेनुयोगिनि सप्तम्याद्यनपेक्षणेपि वह्नेरिदं नेदं मैत्रस्येत्यादावगति तथा हि स्व
त्वस्याविशेष्यत्वे स्वनिरूपकनिष्ठभेदप्रतियोगिनिरूपितं यत्स्वत्वं तदभावबोधननिष्ठत्वे च प्रतीयते ऽप्रतियोगितां पक

पदार्थः सर्वत्र समभिव्याहृतपदार्थसंसर्गिनिष्ठभेदप्रतियोगित्वरूपस्य सजातीयरहितत्वस्य एकपदार्थत्वात् स्वत्वं
स्वार्थः तथाविधं च स्वत्वं एकमात्रनिरूपितं स्वत्वं तेन तदुभयनिरूपितेन तन्निरूपकस्यैकपदार्थस्य तन्निरूपकपदार्थान्तरनि
ष्ठभेदप्रतियोगितया तथाविधभेदाप्रतियोगप्रसिद्धेरिति नाहंशास्वत्वाभाव उभयधने बाधितः स्वत्वसंबंधेन एकप
दार्थस्याभावो यदि नञा बोध्यते तदा स्वत्वाभिन्ननिष्ठभेदाप्रतियोग्येकपदार्थो वाच्यः तत्र यदि स्वत्वस्याभावस्यान्वयोगित्वा
त् यदि धनान्तरमेकमात्रनिरूपिततदानस्य समभिव्याहृतपदार्थत्वाभावादेकपदस्य नाहंशार्थसंबंधिनिष्ठभेदा
प्रतियोगिबोधकत्वव्युत्पत्तिभंगः एकमात्रस्वत्वाभावे एकपदस्य नाहंशार्थसंबंधिनिष्ठभेदाप्रयोगिबोधकत्वव्युत्पत्ति
भंगः एकमात्रस्वत्ववत्त्वनानात्वस्वामिचैत्रमैत्रोभयधने नेदमेकस्येति व्यवहारानुपपत्तिश्चैतदभिप्रायेणैव द्वयोरिद
मित्याद्यसत् इदमात्रावधेयं नेदमेकस्येत्यतः स्वनिरूपकानिष्ठत्वस्वत्वाभाववत्त्वान्नाहंशप्रयोगप्रसंगः नाहंशास्वत्वा
सामान्यस्यैवैकाभावो न संभवति प्रतियोगितावच्छेदकस्य स्वत्वाद्यघटितत्वेनाननुगमात् अभावकूटस्य चासर्वज्ञ
दुर्ज्ञेयत्वादित्येकसंख्यावच्छिन्नापि एकपदार्थे स्तदन्वितस्वत्वस्य च उभयस्वत्वानिरूपितविशेषणताविशेषणस्वस्य स
मवेतत्वेनाहंशासमवायेन वा अभावः प्रतीयते तदा इत्थं प्रयोगानन्वयतश्च चोभयानिरूपितस्वत्वसंबंधेन प्रकृतार्थस्याभावबोधो
ऽपि भवति उभयानिरूपितत्वं च स्वनिरूपितत्वस्वभिन्नाविनिरूपितत्वोभयं संबंधेन किंचिद्विशिष्टं यत्तदन्यत्वमिति नन्त्र
त्वस्य विशेष्यत्वेऽपि नेदं मैत्रस्येत्यादितः कथं स्वत्वसंसर्गाभावबोधमात्रमेव नञा अन्वयोगिनि समभ्यपेक्षणादित्यत आ
ह चैत्रेण पचतीति नामार्थप्रतियोगिकाभावबोध एव अन्वयोगिनि समभ्यपेक्षणादिति भावः यथाश्रुतलिंगविषया
कत्वनिवेशं गंधवतीत्येभ्योऽभिधत्ते गंधादित्यादाव व्याप्तिप्रकारांतरेणावारयितुं मतमाह तद्विषयकेति प्रतिज्ञानाहे
तुविषयकज्ञानजनकत्वेऽपि प्रतिज्ञात्वस्य हेतुविषयकज्ञानजनकत्वानियतत्वात् नियतान्यघटनावच्छेदकानिहे

गाग
दा°
34

तत्त्वोपनयनयत्त्वविनिगमनत्वान्येवजनकत्वप्रतिज्ञात्वमिति नाव्याप्तिः हेतुबोधकप्रतिज्ञानिष्ठतत्तत्प्रतिज्ञात्वादेस्तादृश
ज्ञानजनकत्वनियतत्वाद्व्याप्तितादवस्थ्यमतोवपचातावच्छेदकेति अभावहेतुकव्यतिरेक्युदाहरणस्य लिंगाविषय-
यकज्ञानजनकस्यासंभवादुदाहरणत्वस्य तादृशज्ञानजनकत्वानियतत्वादुदाहरणातिव्याप्तिस्तदुदाहरणान्योति
प्रतिज्ञात्वादेर्हेतुसाध्यापदभेदेनाभिन्नत्वाद्गंधवतीतरेभ्यो भिद्यते गंधादित्यादाववव्याप्तिस्तदवयवस्यैव तादृशप्र-
तिज्ञानिष्ठस्य प्रतिज्ञात्वस्य हेतुविषयकज्ञानजनकत्वनियतावच्छेदकस्यैवाप्रसिद्धेः नानाहेतुकहेतुत्ववयवादि-
साधारणहेतुत्वादेरप्यतथात्वादित्यस्वरसस्सूचनाय केचिदितिजिज्ञासाफलोपधायकत्वस्याव्याप्तिमात्रं वावाक्या
जिज्ञासेति उदासीनेऽतिव्याप्तिवारणाय न्यायावयववत्त्वस्यावयवे निवेशनीयतया वाक्यभिन्नातिव्याप्यप्रसक्तेर्वा-
क्यपदोपादानमनर्थकमित्याशंकया वाक्यापदस्यैव न्यायावयवत्वार्थकतामाह वाक्यत्वमिति गंधवतीतरेभ्यो-
भिद्यादित्यादावव्याप्तिवारणाय लिंगाविषयकेतीति पूर्वोपदर्शितार्थकामितिसाध्यतावच्छेदकावच्छिन्नसाध्यविशि-
ष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयतावहिर्भूतलिंगविषयताशून्यार्थः अभावहेतुकेति वह्न्यभावादिहेतुकेत्य-
र्थः यो यो धूमवान्स वह्निमानित्याद्याकारकोदाहरणलिंगाविषयकत्वादितिभावः भावहेतुकस्य व्यतिरेकि-
णोप्युदाहरणस्य स्वहेत्वभाववत्त्वेनैव काव्यातिरेकबोधकतया न लिंगाविषयकत्वसंभवः एवमभावहेतुकस्याप्य-
न्वय्युदाहरणस्यानन्तथात्वसंभवइत्यभावहेतुकव्यतिरेकित्वानधावनं लिंगिसाध्यमितिलिंगमस्यास्तीति व्युत्प-
त्त्या लिंगिपदस्य लिंगतानिरूपकार्थकत्वादितिभावः वक्ष्यमाणोदाहरणे साध्यविषयकत्वसत्त्वादतिव्याप्ते-
राह तद्वद्विशेष्यकमिति तद्वद्विशेष्यकेति तन्निष्ठव्याप्तिविशेष्यकेतिः स्वहेतुत्वशून्यत्वे सति हेपवतन्देशत्वे उ-
दाहरणस्यानलिंगाविषयत्वासंभवइति तत्प्रकारकप्रमाविषयत्वशून्यत्वानुधावनं तच्चाभावप्रतियोगिक

तयानिक्तामिति इदंयंजलत्वस्यसंदेहदशायांजलान्यत्वस्यसंदिग्धतयातत्प्रकारकप्रतिविषयत्वमपिसं
दिग्धमिति तद्भिन्नत्वस्यहेतुत्वेतयोपन्यासोनसंभवतीति प्रथमसाध्येतदुपेक्षितेउत्पत्तिकालेजलस्यापिनिः
स्नेहतयाद्रव्यत्वसाध्यकजलान्यप्रकारकप्रमाविषयत्वशून्यत्वेहेतुकास्थलांतरमनुसरणे अत्रेदज्ञाय
तयाजलत्वसाध्योपेक्षायांतुजलाशून्यत्वप्रकारकप्रमाविषयत्वशून्यत्वमपिलाघवाज्जलत्वस्वरूपमेवे
तिजलत्वस्यसाध्यत्वेनोदाहरणजन्यबोधस्यासाध्यविषयकस्यलिंगाविषयत्वशून्यत्वजलत्वस्वरूपत्वद्वयंत
ज्जलान्यत्वप्रकारकप्रमाविषयस्तूदाहरणस्याप्यन्यत्वप्रतियोगितावच्छेदकतयालिंगविषयकत्वेनासंगतेः
एवंवह्न्याद्यविषयकत्वस्यलिंगाविषयकपदार्थत्वेउदाहरणस्यव्याप्तिबोधकतयातत्रलिंगविषयकत्वविशेष
णव्याप्तिर्नसंभवतीत्याशयेनतन्मतेस्थलांतरेषांत्रयाणांव्याप्तिविषयकत्वेनैववारणादितिभावः प्रकृतेतिहे
तुतावच्छेदकाहेतुत्वविषयतानांभेदान्निवेशेसाध्यस्यहेतुतावच्छेदकादिस्वरूपत्वेहेतुतावच्छेदकादिविषय
ताभिन्नसाध्यविषयत्वाप्रसिध्याव्याप्तिरिति विशिष्टविषयताबहिर्भावनिवेशः तादृशविषयताबहिर्भावः पूर्व
वन्निर्वाच्यनचसत्तादृशविषयताबहिर्भूतविषयतामात्रनिवेशेनैवहेतुवारणसंभवेसाध्यांशेवैयर्थ्यमितिवाच्यं
तादृशविषयतांतर्भूतसाध्यविषयताभिन्नत्वस्यैवात्रबहिर्भावेनेत्यंतेनविपत्ततयादर्शितहेतौतादृशसाध्यावि
षयताभिन्नहेतुत्वादिविषयतामादायातिप्रसंगस्यवारकतयातत्सार्थक्यात्भेदप्रतियोगिकोटौनिविष्टस्यसा
ध्यांशस्यचाविशेषभावघटकतयाप्यवैयर्थ्यात् यत्रचप्रकृतहेतुतावच्छेदकविशिष्टहेतुत्वविषयतांतर्भूतसाध्य
विषयतायाअप्रसिद्धिस्तत्रबहिर्भूतांतत्तूपादेयमेवप्राह्यैकस्यानपेक्षितत्वादितिनाव्याप्तिः तादृशविषयितांतर्भू
तत्वासाध्यांपत्वोभयाभावपदवावबहिर्भावेनेत्यंतार्थः हेतुतावच्छेदकहेतुत्वैनैवेत्यर्थः हेतुहेतुत्वाधोस्तादो

गदा.
ग्रं.
35

हेतुत्वानांनिवेशस्यप्रयोजनंक्रमशःप्रदर्शयामितितेनेतितत्त्वेनेतिहेतुत्वेनहेतुनैवेत्यर्थः हेतुहेतुत्वाधेयतादात्म्य
संबंधेनसाध्यत्वंबोध्यं हेतुत्वावच्छिन्नसाध्यकस्थलेहेतुत्वेनप्रमीयमानत्वरूपप्रकृतहेतावपिसाध्यतावच्छेदकाक्रांतत
याहेतुजन्यबोधस्यसाध्यविषयकत्वमक्षतमेवंसाध्यतावच्छेदकविशिष्टनिरूपितविषयतापर्याप्तस्याविवक्षितत्वा
दितिहेतुविषयताबहिर्भावनिवेशव्यावृत्तिसंगतिः नचहेतुविषयताबहिर्भावनिवेशोपेक्षयासाध्यतावच्छेदक-
विशिष्टविषयकत्वनिवेशनमेवलाघवेनोचितमितिवाच्यं विशिष्टविषयिताबहिर्भावेनिवेशनीयहेतुविषयता
बहिर्भावस्यत्वात्तन्त्रेणानिवेशनीयतयागौरवानवकाशात् हेत्वंशानिवेशपक्षेहेतुतावच्छेदकविषयित्वाहेतुत्व-
विषयितायोबहिर्भावस्यनिवेशनीयतयागौरवात् एवंप्रमेयत्वाद्यवच्छिन्नसाध्यकस्थलेपिहेत्वंशनिवेशप्रयोजन-
संभवादयंहेतुरित्युपलक्षणपरंबोध्यं लिंगविषयकेत्यस्यपूर्ववत्साध्यवद्विशेष्यकार्थकत्वोपगमेवह्निमानवह्नि
सामग्रीमत्वात् अयंहेतुरस्तत्वेनप्रमीयमानात्वादित्यनयोरतिप्रसंगवारणसंभवेपि इदंहेतुत्वमित्यादेपंचम्यर्थ
स्यतादात्म्यसंबंधेनसाध्यवत्तयासाध्यप्रकारतानिरूपितविशेष्यतार्थकत्वेपिस्वरूपसंबंधेनहेतुत्वसाध्यकस्थले-
निरूपितात्वंसंबंधेनज्ञानत्वावच्छिन्नसाध्यकजनकतात्वावच्छिन्नपक्षकस्थलेचहेतावतिव्याप्तिवारणसंभव-
तीतिगुरुतरारंभः लिंगविषयतायोपूर्वोपदर्शितविषयिताबहिर्भावनिवेशनंलिंगपदस्यधर्मपरतांविनैवलिंगबो-
धकप्रतिज्ञाविशेषव्याप्तिलिंगपक्षविषयपक्षयोःसाध्यवद्विशेष्यपरताविनैवदर्शितव्याप्तिरेवचोदाहरणा तिव्या-
प्तिं प्रकारांतरेणवारयतांमतमुपन्यस्यदूषयतिलिंगेतितिनिगमनस्योदाहरणस्यचवारणायनियतोनद्वयमेव एवं-
तावच्छेदकविशेषणंप्रतिज्ञात्वोदाहरणत्वयोरपिलिंगलिंगिविषयकज्ञानजनकत्वसामानाधिकरण्यतयाप्रसंभ-
वातिप्रसंगापत्तेः सामानाधिकरण्यमपेक्ष्योभयत्रनियतत्वप्रविशेनं उदाहरणाविशेषमादायातिप्रसंगवारणा-

यावच्छेदकान्तं आदिपदात्पंचमीविभक्तिमत्वानियतलिंगविषयकज्ञानजनकत्वनियतावयववतावच्छेदकरूप
वत्वादिपरिग्रहः रूपांतरेति यद्यपि निरुक्तरूपस्यापरिचयादनंतरपदमनर्थकं तथाप्यात्मास्तु प्रमेयेनतयाविध
रूपांतरं परिचयोपेक्षणीयः तच्च रूपमन्नमित्यन्यूनानतिरिक्तविषयकशाब्दबोधजनकवाक्यत्वादिकमेव तथा
च तस्यैव तन्नाटकस्य लक्षणत्वसंभवाद्व्यर्थविशेषणता न च विशिष्टस्याघटकत्वान्न व्यर्थविशेषणतेति वाच्यं प्रति
ज्ञात्वहेतुत्वादिसाधारणस्यावयववतावच्छेदकत्वस्य दुर्वचतया विशिष्यैव तन्निवेशानस्यावश्यकत्वादित्येतल्लाभ
यांतरपदं अत्र च साध्यादिभेदेनाभिन्नं प्रतिज्ञात्वं यद्यवच्छेदकत्वेन निवेश्यते तदा तस्य प्रकृतसाध्यविषयकत्वनियत
त्वासंभवादप्रसिद्धिः यदि च साध्यादिभेदेनाभिन्नां तत्र तदा यादृशसाध्यपक्षके प्रतिज्ञायां प्रकृतलिंगबोधकत्वे निय
ततत्राव्याप्तिरित्यपि दूषणं बोध्यं निगमनवारणायेति प्रतिज्ञोदाहरणोपनयविशेषणां विवक्षणीयहेतुविभ
क्तिमत्वविशेषणेन वारणासंभवान्न तदुक्तं ननु साध्याविषयकबोधजनकत्वनिवेवक्तिमात्रव्यक्तिसामग्रीन
त्वादित्यायत्नहेतावव्याप्तिरत आह साध्याविषयकत्वं चेति बहिर्भावेनेति विवक्षणीयमिति शेषः साध्यांशोपादा
नेहेतुविभक्तिमत्वदलसार्थक्याय पक्षत्कल्पेतादृशसाध्याविषयकत्वप्रतियोगिकोटौ साध्यांशप्रगादायदलो
तवोपादाने प्रक्षालननाडीत्यादित्यादिन्यायेन संदर्भविरुद्धमतः कल्पांतरमाश्रीयते पूर्वेति तस्माद्वह्निमानि
त्यादिनिगमनेन व्यर्थांशे पुनः साध्यस्याविशेषणतयाऽव्याप्तिरतः साक्षात्परंपरासाधारणेति तथा च तत्रा
पि साध्यस्य परंपरया पक्षविशेषणत्वान्न दोषः हेतुत्वं प्रमेयं प्रमेयादित्यादौ प्रमेयत्वादिसाध्यके हेत्ववयवेव्या
प्तिर्हेतुतावच्छेदकीभूतसाध्यस्य परंपरया पक्षविशेषणत्वात् अतः पूर्वोपद अतः पूर्वोपदर्शितेति प्रकृतसा
ध्यपक्षकप्रतिज्ञान्यबोधे यादृशं यादृशं पदांशे साध्यस्याविशेषणत्वं तादृशेत्यर्थः नच साध्यतावच्छेदकासं

गदा.
ग्रं.
36

बंधावच्छिन्नसाध्यतापक्षतानिरूपितपक्षांशे भेदादिसंबंधेन विशेषणतापन्नसंबंधादिनिरूपिते च ताहृशविशेषण-
तात्मकसाध्यविशेषणताशून्यत्वं तदुदितार्थः अयं वह्निमान् वह्निमद्वृत्तिधर्मशून्यत्वादित्यादौ हेतावव्याप्तिवा-
रणाय प्रकृतेति पक्षतावच्छेदकावच्छिन्नार्थकं नचैवमनुषंगपक्षे निगमनजन्यबोधे साध्यस्य पक्षतावच्छेदकाव-
च्छिन्नाविशेषणत्वात् अतिव्याप्तितादवस्थ्यमनुषंगपक्षे पक्षमुख्यविशेष्यतानिरूपितप्रकारतापन्नत्व-
रूपं पक्षविशेषणतापन्नत्वं यदि निवेश्यते तेन तदा पक्षतावच्छेदकावच्छिन्नत्वाविवक्षणेपि तस्मादितरेभ्यो भिद्य-
तइत्यादिनिगमनादावतिव्याप्तेरवाक्यपरीहारतया एतत्कल्पस्यानुषंगपक्षाभिप्रायकत्वात् अयं धूमाभाव-
वान् वह्न्यभावादित्यादौ यो धूमवान् स वह्निमान् इत्यादेर्व्यतिरेक्युदाहरणस्य यथाश्रुतहेतुविभक्तिमत्त्वनिवेशे
नापि वारणसंभवात् विवक्षणीयस्य प्रकृतसाध्यान्वयबोधनतात्पर्योपस्थितिजनकहेतुविभक्तिमत्त्वस्य व्यावृ-
त्तिस्थलमाह इदमिति उदाहरणस्य साध्याविषयकत्वरक्षणायाभावसाध्यकानुधावनहेतुविभक्तिपदस्य ज्ञाप-
कत्वरूपहेतुत्वबोधकविभक्त्यर्थकत्वे प्रथमोदाहरणे नातिव्याप्तिः तत्र जनधात्वर्थान्वयि प्रयोजनस्यैव पंच-
म्यर्थत्वात् अतः स्थलांतरमाह अयमिति व्यतिरेक्युदाहरणस्येति पटश्चाज्ञाततंतुसंयोगाजन्यद्रव्यत्वाभाव-
वत् यो धूमालोकवान्स आर्द्रेंधनवानित्याकारकस्येति साध्याविषयकत्वरक्षायै व्यतिरेकिपर्यंतानुधाव-
नयत्रयमन्वय्युदाहरणस्य साध्याविषयकत्वेपि पक्षतावच्छेदकविशिष्टे साध्याविशेषणकत्वादतिव्याप्तिस्तदव-
स्थैव द्वितीयकल्पे तथापि प्रथमकल्पेव्याप्तिर्घटनाद्याभावासाधककव्यतिरेक्यनुसरणं ताहृशोदाहरणस्य सा-
ध्यान्वितस्वार्थबोधकपदघटितत्वनिवेशने नैव वारणसंभवात् ताहृशविभक्तिपर्यंतस्य व्यावृत्तिस्थलमाह एतत्प-
क्षकेति साध्यान्वितेति निगमनोपस्थाप्यसाध्यान्वितेत्यर्थः विशेषणतया

साध्यान्वितात्वस्याविवक्षणादिति भावः नच उपनये व्याप्तिघटकतया साध्यविषयकत्वसत्त्वान्नाति
व्याप्तिः प्रसज्यते अनुषंगपदेन निगमनोपस्थाप्यसाध्येन समभिव्याहृतपदार्थस्य हेतुत्वस्यानन्वयाद्व्याहृतविदा
नस्यानुषंगपदाभिप्रायकतत्तयाऽनुषंगपदेन च निरुक्तविशिष्टविषयत्वबहिर्भूतसाध्यविषयिताशू।
न्यत्वस्यैव साध्याविषयकत्वपदार्थतया पक्षविशेषणतया साध्याविषयताबहिर्भूतसाध्यविषयिताशून्य
त्वस्यैव साध्याविषयकत्वपदार्थतया पक्षविशेषणतया साध्याविषयकत्वस्याप्रयोजकत्वादिति वाच्यं ।
उपनयपदस्य हेतुतत्त्वव्यापकीभूताभावप्रतियोगिमद्वृत्तिमित्याद्याकारकाभावसाध्यकव्यतिरेक्युपनय।
परत्वात् प्रकृतसाध्यान्वितस्वार्थबोधप्रयोजकाकांक्षादिमद्धेतुविभक्तिमत्त्वमित्यर्थः उपदर्शितस्याले
धूमज्ञानज्ञाप्यलोकाभावादिरूपसाध्यांशे पंचम्यर्थानन्वयान्नातिव्याप्तिरिति भावः नन्वेवं हेतुपदमन
र्थकं साध्यान्वितस्वार्थबोधकविभक्तिशालिनो हेतुत्वातिरिक्तावयवस्यासाध्यविषयतानियमेनातिप्रसंगा
नवकाशात् न च पक्षविशेषणतया साध्याविषयकत्वपदेन ज्ञानादिसाध्यके यद्वृत्तिमज्जानातीत्युदाहृ।
णे ज्ञानादिरूपसाध्यान्वितस्वार्थबोधकाख्यातविभक्तिशालिनि विशेषणविभक्तेरभेदार्थकत्वमते प्रमे।
यत्वादिपक्षकप्रमेयत्वादिसाध्यकोपनये पक्षीभूतसाध्यान्विताभेदबोधकप्रथमाविभक्तिशालिनि वा
तिव्याप्तिवारणाय हेतुपदोपादानमावश्यकमिति वाच्यं पक्षविशेषणतया साध्याविषयकत्वनिवेशपक्षे।
हेतुपदोपादानेऽपि यो यो धूमवान् स वह्निमान् यथा धूमाद्वह्निमन्महानसमिति सदृष्टान्तोदाहरणातिव्याप्ते
स्तद्वारणाय प्रकृतपक्षविशेषणतापन्नसाध्यान्वितार्थबोधकत्वस्यावश्यं निवेशनीयतया नादृष्टान्तोदाहर
णोपनययोस्तथाविधसाध्यान्वितस्वार्थबोधकविभक्तिमत्त्वविरहेणातिप्रसंगानवकाशादित्यत आह । २

गदा॰
स्र॰
37

हेत्वितीति इदमनुपक्षणां पक्षविशेषणतया साध्याविषयकत्वनिवेशे कल्पे विभक्तिमत्त्वमपि नोपादेयं त
त्तस्यानुषंगपक्षपरतया तत्पदे उपनयस्य निगमने नैकवाक्यताविरहेण साध्यान्वितस्वार्थबोधजनकपद
घटितत्वाभावात् दर्शितविभक्तिपदव्यावृत्तेस्त्वनुषंगपक्ष एव संगतेस्तत्कल्पे व्यावृत्त्यभावादिति केचि
त् वस्तुतोऽनुषंगपक्षेऽपि उपनयस्य स्वैव पक्षबोधकेदंपदस्य निगमनघटकीभूतस्य साध्यान्वितार्थबोध
कतया तादृशबोधे च प्रयोजनान्तरविरहेण स्वजन्यत्वानिवेशादुपनये विभक्तिपदव्यावृत्तिः संभवतीत्यव
धेय ननु प्रथमसाध्याविषयकत्वनिर्वचनपक्षे पर्वतः पर्वतभिन्नत्वप्रकारकज्ञानाभावात् यः पर्व
तभिन्नत्वेन ज्ञायते स वनाभिन्नत्वेन ज्ञायते यथा पर्वतभिन्नत्वप्रकारकज्ञानाभावादुत्पन्नं ज्ञानमित्या
दौ विशेष्यतासंबंधावच्छिन्नप्रतियोगिकाभावसाध्यहेतुकव्यतिरेक्युदाहरणेति व्याप्तिस्तत्र हेतुताव
च्छेदकविशिष्टहेतुत्वविषयितान्तर्भूततया एव साध्यविषयतायाः सत्त्वात्साध्यीभूततादृशाभावान्वित
स्वार्थबोधकपंचमीविभक्तिमत्त्वाच्च प्रथमकल्पे साध्ये पक्षविशेषणतापन्नत्वानिवेशात् दृष्टांतोप
स्थाप्यस्य दृशसाध्यस्य पक्षानन्वितत्वस्याकिंचित्करत्वात् इत्यत आह यदि चेति सिद्धाद्यविषया
न्याय प्रयोगस्य सविवादतया यदि चेत्संज्ञान्तस्य चेत्यन इत्यनेनान्वयः सामवायसंबंधावच्छिन्नाभा
वस्य साध्यत्वे ज्ञानस्य समवायेन ज्ञानरूपप्रतियोग्यनधिकरणतया न व्यतिरेकदृष्टान्तत्वसंभव इति विशे
ष्यतयेत्युक्तम् अत एव च महानसत्वादिप्रकारकज्ञानव्यतिरेकदृष्टान्तत्वसंभव इति विशेष्यतयेत्युक्तम् अत
एव च महानसत्वादिप्रकारकज्ञाने उपेक्षितः विशेष्यतयापि ज्ञानस्य तादृशज्ञानवत्त्वाभावात् साध्यस्य हे
तुतायामेव हेतुत्वविशेषणतापन्नतथाविधसाध्यविषयितायाविशिष्टहेतुविषयितान्तर्भावः भवतीति

तस्मादयं ज्ञानाभावादुत्पन्नमिति स्वसंसर्गाग्रहविषयाविशिष्टहेतुविषयिता ताहृशज्ञानाभावस्याप
र्वतत्वप्रकारकेज्ञानोत्पादकत्वं बोधं व्याप्तिरेकिपर्य्यंतानुधावनविशिष्टविषयिताबहिर्भूतसाध्य
विषयित्वाभावनिर्वाहाय प्रकृतसाध्यविशेषणतयान्वितोयः स्वार्थस्तद्बोधकत्वं च दर्शितहेतुत्वाप
त्तकोपनयस्येदस्य नास्तीति तद्विवक्षणे विभक्तिपदवैयर्थ्यमिति विशेष्यसाधारणमेवान्वितत्वं
निवेशनीयमित्युक्तोदाहरणजन्यबोधेन पंचम्यर्थस्य साध्यविशेष्यत्वेप्यतिप्रसंगापवेत्यभिप्रायः अ
वयवांतरेति स्वभिन्नावयवघटकपदजन्योपस्थितिसकारेण स्वाघटकपदाजन्योपस्थितिसहकार
रेणवा तयार्थान्वितस्वार्थबोधकविभक्तिमत्वमित्यर्थः तेन ताहृशसाध्यास्य प्रतिज्ञाघवयवस्या
पहोपस्थापितत्वेपि नातिव्याप्तिः नचैवमनुषंगपक्षे साध्याविषयकत्वविशेषणमनर्थकं निगमनस्य
तत्पक्षे उपनयैकवाक्यताविरहेणावयवांतरोपस्थितार्थान्वितार्थबोधकविभक्तिमत्वाभावात् व्या
वृत्त्यसंगतेरितिवाच्यं चैत्रं पचति पाककृतिसामग्रीमत्वादित्यादौ पाककृतिसाध्यकप्रतिज्ञायां हेत्ववर
यवस्यापि चम्युपस्थाप्यहेतुत्वान्वितस्वार्थबोधकत्वात्तविभक्तिमत्यामतिव्याप्तिवारणाय साध्याविष
यकत्वोपादानस्यावश्यकत्वात् प्रथमरीत्या साध्याविषयकत्वनिर्वचनस्यानुषंगपक्षेनानुषंग
पक्षे संभवादननुषंगपक्षे पक्षेपविवक्षा अनुषंगपक्षे तदुदाहरणान्यत्वविशेषणेन नपदमुक्तोदाहरणं
वारणीयमित्यपि वदंति साध्यघटितार्थबोधकोक्ताहेतावव्याप्तिर्हेतुविभक्तिमदुक्तोदाहरणेवातिव्याप्ति
प्रकारांतरेणवारयंतो मतमाह केचित्विति निगमनहेतुविभक्तिनैपत्यानत्रातिव्याप्तिवारणायेतिनि
यतं तद्धेतुत्वस्यापि साध्यबोधकोक्ताहेतुहृत्तिनयास्संभवदिति असामानाधिकरण्यमुपेत्यानियततया

गदा॰
ग्र॰
38

तथावंगमनं उदाहरणोपनययोः साध्याविषयकबोधजनकयोरपि संभवात् उदाहरणोपनयसामान्यवार॰
णाय नियतं तर्हि हेतुविभक्तिमद्दर्शितोदाहरणत्वमादाय तत्प्रसंगवारणाय सामानाधिकरण्यमुपेत्य नि
यतात्वनिवेशनेन विभक्तिमत्त्वमत्र पादेय हेतुत्वप्रतिपादकपदवत्त्वेनैव तत्त्वनिवेशेनैवानतिप्रसंगात् हेतु
त्वप्रतिपादकपदत्वेनैव तस्यार्थप्रतिपादकविभक्तिमत्त्वेनैव तत्त्वयोर्वैकल्पिकमुपादानं वा तत्र द्वितीयक॰
ल्पाविशेषणाविभक्तेर्निरर्थकत्वमताभिप्रायेण उदाहरणाविशेषणमादाय उक्तोदाहरणे तत्प्रसंगवारणा
याऽवयवत्वावच्छेदकोति तद्वित्यमिति चिंताबीजं पूर्ववत् यथाश्रुतद्वितीयलक्षणार्थस्य निगमनसाधा॰
रणतयाऽन्यथाव्याचष्टे विभक्त्यर्थेति विभक्तिजन्यहेतुतोपस्थितिद्वारा हेतुत्वप्रकारकविशेष्यकशा॰
ब्दधीजनकन्यायावयवत्वमित्यर्थः तेन हेतुत्वे विभक्त्यर्थत्वविशेषणस्याव्यावर्तकत्वेऽपि न दोषः॰
निगमनवारणायेति उक्तार्थस्य विशेष्यत्वादिति भावः विशेष्येतीति हेतुत्वविशेष्यत्वस्य तत्रापि सत्त्वेन
साध्यविशेष्यतापर्यंतनिवेशनेन तत्रातिव्याप्तिरिति भावः ननु घटो दंडादित्यादिप्रतिज्ञाघटितपक्षकनि
रूपकतासंसर्गकदंडादिनिष्ठहेतुतासाधकन्यायांतर्गततस्माद्दंडादित्याद्याकारकनिगमनेवननुपं॰
गपत्ते विभक्त्यर्थहेतुत्वविशेष्यकबोधजनके तत्राव्याप्तिरित्यत आह घटो दंडादिति ज्ञापकत्वरूपहे
तुत्वस्यैव प्रकृते निवेशनीयतया जनकत्वासाधकप्रथमस्थलेनानतिव्याप्तिप्रसंग इत्यतो वह्निपक्षक
धूमनिष्ठज्ञापकतासाधकस्थलांतरानुसरणं तदुक्तेरिति तादात्म्यातिरिक्तहेत्वनियामकसंबंधेन
व्यापकत्वाप्रकत्वाभ्युपगमादिति भावः तादात्म्येन स्वस्य व्यापकत्वमत्वादाह तदात्मनेति ज्ञा॰
पकतायाः पर्वतोवह्निमानितिमनेनैचमुपर्यंनेनयाज्ञाप्यत्वासाधकताहृष्टा प्रतिज्ञासंभवत्येव तथा चासंभववार॰

णायलक्षणस्यहेतुत्वपदेनोपिनाहरणस्यहेतुत्वेस्वरूपार्थस्यैवलक्षणीयतत्त्रयाजन्यनिगमनेतिव्याप्तिताद-
वस्थमित्याशंक्याह संप्रदायविरोधाच्चेति न्यायांतर्गतस्यधूमादिवाक्यस्योदाहरणप्रयोजकजिज्ञासोप-
धायकताविरहेति तात्पर्यरूपयोग्यतामात्रायातिव्याप्तिप्रसज्यन्यायावयवत्वस्यलेस्वार्थेकोविकीर्णजनकताप
दस्यस्वरूपेयोग्यतापरत्वंस्फुटयति क्वाचिदिति अभ्युपेत्यफलोपधाननिवेशोपिन्यायावयवत्वनिवेशनमा
वश्यकमित्याह उदाहरणत्वेचेतिवैयर्थ्यात् प्रयोजनांतराभावात् तथाचयत्रोदाहरणांतमेवप्रयुक्तं ।
तत्राप्युदाहरणप्रयोजकजिज्ञासाफलोपधानसंभवेनातिव्याप्तिवारणायन्यायावयवत्वनिवेशनेजनक-
पदस्यफलोपधानेपरत्वेप्यावश्यकमितिभावः चतुर्थलक्षणेप्रसिद्धप्रतिज्ञानिगमनयोःसाध्यविषयकत्व
विशेषणव्यावृत्तिंनचरतेपंचम्यंतत्वाभावादितिपंचम्यंततद्विशेषितद्व्यावृत्तिमाह अयंनदंडामिति अयं-
दण्डीतिज्ञायः संप्रदायविरुद्धत्वंप्रागभिहितमिति हेतुतावच्छेदकविशिष्टेत्यादिनेव्यतिरेक्युपनयेत्य-
र्थः उदाहरणस्यपंचम्यंतस्यापिसंभवात्तद्वारणायोदाहरणान्यत्वस्यनिवेशनीयतयाततएवोदाहरणवार-
णासंभवादुपनयपर्यंतान्वधावनेधूमाद्यालोकाभावादिसाध्यकेधूमाद्यालोकव्यापकाभावप्रतियोगिमानय
मित्युपनयेपरलिव्याप्तिवारकत्तयंततपदस्यार्थकंबोध्यं उपनयस्यकस्याचिन्नाहणार्थकाहेतुपपिपंचम्यंत-
तापत्तेःपर्वतोवह्निमान्वह्निप्रमातइत्यादिहेतुत्वावयवस्यातमिलंतस्योहेतुपंचम्यंततातविरहाद्व्याप्तिरित्य-
तआह आद्यचेतिहेतुपंचम्यंतत्वंचेत्यर्थः अथैवद्वागसेति स्वघटकार्थवद्वागपूर्वत्वाभाववद्धेतुत्वबो
धादिघटितत्वमिवतदंततत्वमिहविवक्षितमितिभावः अथवत्वंआकांक्षानिर्वाहकत्वंतस्मिलंविनापितत्पू-
र्वपंचम्येवप्रकृतान्वयबोधोपयिकाकांक्षानिर्वाहात्ततस्मिलादेराकांक्षानिर्वाहकत्वंनतुकिंचिदर्थवत्त्वं

गदा॰
अ॰
39

तसिलादेर्वाचकत्वेपितद्घटकप्रत्येकवर्णानांवाचकत्वात् एकादशकोशेनसमत्वात्सवर्णानांवाचकताबोध-
नात उक्तस्थलेपंचमीपदेस्याघटकंतत्वमपिसंभवतीत्यभिप्रायेणयथाश्रुतस्यैवसाधुतांसमर्थयतिपंचम्यादेरि-
ति आदिपदाभ्यांसप्तम्यादेस्त्रलादेश्चपरिग्रहः नानुपपत्तीति तथासतितसिलएवहेतुत्वप्रतिपादकत्वात्
पंचमीत्वाच्चेतिः तसिलादेः पंचम्यनादेशतापक्षेपिनतदंतहेतावव्याप्तिरितिभावः ननुहेतुत्वप्रतिपादक-
पदस्यांतत्वाविवक्षणेदर्शितव्यतिरेकव्यभिचारैरतिव्याप्तितादवस्थ्यमित्यतआह एवंवदिति प्रकृतसाध्यान्वि-
तस्वार्थबोधकतादृशपदशालित्वरूपमित्यर्थः एवंचप्रथमलक्षणेतादृशस्वार्थबोधकविभक्तिशालि-
त्वरूपमित्यर्थः एवंचप्रथमलक्षणेतादृशस्वार्थबोधकविभक्तिशालित्वेसाध्याविषयकधीजनकत्वेनि-
रुक्तविशिष्टविषयिताबहिर्भूतसाध्याविषयिताशून्यधीजनकत्वरूपंनिविष्टं अत्रचतादृशहेतुत्वप्रतिपा-
दकपदशालित्वेसाध्याविषयकज्ञानजनकत्वंवनिवेश्यमाणमन्यविधंप्रविष्टमितिभेदाहृत्यवधेयं पर्वतोव-
ह्निमानित्यादिन्यायांतर्गतेप्रतिज्ञादेर्निर्वाच्यसाध्याविषयकज्ञानजनकताशालिनोवारणायहेतुत्वप्रतिपाद-
कपदोपादानंवह्नेर्द्रव्यत्ववान्वह्निमान्हेतुत्वंप्रमेयमित्यादिप्रतिज्ञादावतिव्याप्तिवारणायविशेषणान-
यासाध्यान्वितत्वनिवेशनेपिसंदर्ववह्निमत्त्वधर्मापर्वतोवह्निमानित्यादावतिव्याप्तिवारणायतदापूपकत्वं-
नचैवमप्यालोकाद्वह्निमतःसधर्मापर्वतोवह्निमान्धूमादित्यादवतिव्याप्तिर्दुर्वारैव तत्रापिविवक्षणीय-
प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविशिष्टसाध्यविषयकज्ञानाजनकत्वस्यालक्षतत्वादि-
तिवाच्यंहेतुत्वप्रतिपादकेतस्यप्रकृतहेतुतावच्छेदकावच्छिन्नाहेतुविशिष्टहेतुत्वंप्रतिपादकार्थकत्वा-
त् यथाश्रुतेसाध्याविषयकज्ञानकत्वेप्ययंवह्निमान् वह्निसमग्रीमत्वादित्यादिन्यायस्थलेहेत्ववयवे

व्यापकं पूर्वं निरुक्तानन्निवेशे च साध्यान्वितत्वसार्थबोधकहेतुत्वप्रतिपादकपदशालित्वविशेषणो हे-
तुत्वप्रतिपादकेत्यस्य वैयर्थ्यं प्रतिज्ञाया निरुक्तसाध्याविषयकज्ञानजनकत्वाभावेनैवावारणात् अतः
साध्याविषयकज्ञानजनकत्वमन्यथा निर्वह्निः साध्येति एवं च पर्वतो वह्निमानित्यादिप्रतिज्ञायाः साध्यविष-
यकधीजनकत्वेपि इतरनैरपेक्ष्येण हेतुत्वविशिष्टसाध्यविषयकज्ञानाजनकतया साध्यांविषयकेत्यादि-
नावारणात् न हेतुत्वप्रतिपादकपदविशेषणमर्थवद्भवति हेत्ववयवस्यापि प्रतिज्ञासहकारेण हेतुत्ववि-
शिष्टसाध्यविषयकज्ञानजनकतया सम्भवद्वारणाय इतरनैरपेक्ष्येणेति स्वाघटकपदासहकारेणेत्यर्थ-
कं अजनकेत्यस्य प्रतियोगिविशेषणं तथा च स्वेतरावयवाजन्यहेतुत्वविशिष्टसाध्यविषयकज्ञानजन-
कं यत्तदन्यत्वमिति समुदायार्थः एतच्च जनकपदस्य जनकतावच्छेदकधर्मपर्याप्त्याश्रयसमुदायपरत्वा-
लाभाय हेत्ववयवस्य प्रतिज्ञासहकारेण तादृशबोधजनकत्वेपि तादृशधर्मापर्याप्त्याश्रयसमुदायभेदस्या-
क्षततया इतरनैरपेक्ष्याप्रवेशेपि लक्षणासमन्वयात् अयं धूमाद्वह्निमानितोऽन्यत्रावर्तमानधर्मादित्यादिहेतो-
धूमनिष्ठहेतुताविशिष्टसाध्यज्ञानजनकस्यासंग्रहाय प्रकृतेति प्रकृतहेतुतावच्छेदकावच्छिन्नविशिष्टेत्य-
र्थकं प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वमितराविशेषणं तदवगाहिन एव ज्ञानस्योक्तनि-
रपेक्ष्यहेत्ववाक्येन जनकतानादृशहेतुत्वाप्रकारकाज्ञानसामान्यजनकत्वस्यैव सकलहेत्ववयवसाधार-
णात् साध्यांशोपादानमनर्थकमिति तत्परित्यजति साध्यं चेति अत्र साध्यान्वितसार्थबोधकत्वनिवेशेपि
हेतुत्वघटकोपनये साध्यान्वितार्थबोधे स्वजन्यत्वनिवेशे नुषंगपदेन साध्यान्वितपक्षबोधस्योपनयाज-
न्यतया तद्वारणेपि नत्रषंगपदेन निगमनोपस्थापितसाध्यान्वितत्वबोधकेदंपदशालिन्यतिव्याप्तिः नच हेतु

गदा.
व्य.
40

तावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपादकपदघटितत्वनिवेशान्नतत्रातिव्याप्तिरिति वाच्यं गोत्वा
भावविशिष्टहेतुत्वे साध्याभाववद्वृत्त्यभावादित्यादिन्यायोक्तरीत्योपनयेतथाव्याप्तिव्याप्तेरवाकत्वात् अ
नुषंगपक्षेपि उक्तन्यायोक्तरीत्या प्रतिज्ञायामतिव्याप्तेश्च विशेषणेन यत्साध्यान्वितस्वार्थबोधकत्वं निवेश्य
तद्वारणे साध्यांशवैयर्थ्यं अनुषंगपक्षे पुनर्यस्येदंपदार्थस्य उक्तावपि विशेषणताविरहात् तदंतपर्या
पितेन प्रकृतहेतुना साध्याद्विशेषितहेतुत्वप्रतिपादकपदघटितत्वनिवेशेनोक्ताविशिष्टहेतुत्वपक्षतत्प्र
तिज्ञोपनययोर्वारणेऽपि प्रकृतहेतुत्वविशिष्टविषयकज्ञानजनकत्वनिवेशेनैवोपपत्तौ नजव्याप्त्या सत्प्रत
रूपेत्येणत्वभिधानस्य वा किंचित्करत्वमित्यस्वरसः पंचम्यालालाज्ञापकत्वं व्यवस्थाप्य तद्वत्वेन निगम
त्रि० नेऽतिव्याप्तिं प्रसंजयन् पंचम्यंतपदसार्थकस्येति हेतुत्वाद्यवच्छि हेतुत्वं जनकत्वं ज्ञाप्तादिना ज्ञापकत्वपर
रिग्रहः जनकत्वोपादाने दृष्टांततया आदिपदग्राह्ये हेतुत्वे ज्ञापकत्वमेव तर्हि उक्तजन्यज्ञानवत्त्वरूपे साध्य
माह वृत्तादिति इत्यादौ इत्यादिवाक्यस्थपंचमीप्रतिपाद्येविनिगमनाविरहेनिराकारोतिलाघवेनेति वृ
त्तादिनिष्ठावधित्वाख्यनिरूपकतासंबंधेन विभागस्यान्वयसंभवेपि नवृत्तादित्यादौ वृत्तादिनिष्ठावधितायाश्च
श्रयतासंबंधावच्छिन्नाभावस्य वृत्त्याद्यवधिकविभागेपि सत्त्वेनातिप्रसंगभियाबोधोनासंभवाद्वान्वनिया
मकानिरूपकत्वसंबंधस्य चाभावप्रतियोगितानवच्छेदकत्वाद्विभागनिष्ठवृत्त्यादिनिरूपितमवधिमत्त्वमेवपं
चम्याप्रतिपाद्यमिति नव्यमतानुसारेणाह अवधिमत्त्वेवेति नन्ववधिमत्त्वमवधितानिरूपकत्वमेव तत्र
वृत्तादेरवधित्वायामेवान्वयस्योपगंतव्यतयापकदेशान्वयः निरूपकत्वेवतत्त ज्ञानजनकत्वाविषयत्वा
मिति ज्ञापकत्वापेक्षयागौरवं चेत्यत आह इथ्यनिष्टमिति संबंधविशेषः अवधिमन्निष्ठावधिनिरूपितः

संबंधविशेषः अवधिमत्त्वमेव स्वरूपसंबंधविशेषः तन्निरूपकत्वमेवावधिमत्त्वमिति वैपरीत्यस्यापि सं
भवेन विनिगमनाविरहादिति भावः अन्यदेतदिति अनतिरिक्तत्वेपि अवधित्वादेरनुगमकधर्मस्यानु
गतप्रतीत्यनुरोधेनावश्यकत्वात्तस्य प्रवृत्तिनिमित्तत्वेन लाघवादिति भावः नन्ववधित्वादावेव पंचम्याः
शक्तौ ज्ञापकत्वादाववधित्वादिसंबंधस्वरूपस्याग्रहे पंचम्या ज्ञापकत्वबोधकत्वग्रहासंभवात्तत्प्रत्यायने
च्छया पंचमीप्रयोगो न स्यादित्यत आह तदिति ज्ञापकत्वादाववधित्वादिसंबंधाग्रहे चेत्यर्थः व्यवहारः
ज्ञापकत्वादिपरपंचमीप्रयोगः शक्तिभ्रमात् ज्ञापकत्वादौ शक्तिभ्रमात् अपादानत्वावच्छेदकविभागत्वज्ञा
त्यवच्छिन्ने शक्तिवादिनां मतमुपन्यस्यति निरूढत्वादिति अपैतीति अपैत्यर्थः परागमः स्पंदमात्रे न तु विभागाव
च्छिन्नस्पंदः न हि त्यजिल्यबर्थधात्वर्थतावच्छेदकविभागाश्रयतया पादानस्य कर्मतापसंगात् तदुपपत्तेर
संयोगावच्छिन्नस्पंदः वृक्षात् भूमिमपयातीति वृक्षात् भूमिमपैतीति प्रयोगसंगात् पततीत्यत्राधः संयोगावच्छि
न्नस्पंदः स्पंदः स्पंदत्वं वा तरजात्यवच्छिन्नो वेत्यर्थः नन्वेवं जनकत्वे चेति अथ यथा स्पंदः स्वनिष्ठविभागा
नुकूलक्रियायाः स्वनिष्ठविभागजनकत्वेपि स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वविरहान्नोक्तातिप्रसंगः इ
ति चेन्न भेदप्रतियोगितावच्छेदकत्वे लाक्षणिकत्वेवोपपन्नो तदंतर्भावेण शक्तेरकल्पनात् तात्पर्यविषया
त्वसावयवलक्षणयोरपि अपगपदत्वयोपगमाल्लत्वार्थभेदप्रतियोगितावच्छेदकत्वविनिर्मोकेन पंचम्या वि
भागबोधकत्वव्युत्पन्ने नैव विभागमात्रे तात्पर्येण वृक्षात्स्पतत्यतीति प्रयोगप्रसंगः अथवा केवलविभागे पूर्वं
प्रयोगाभावादेवाप्रयोगः वस्तुतो भेदप्रतियोगितावच्छेदकत्वस्य पंचम्यर्थत्वेपि दृष्टत्वात् पर्णा यततीत्यत्र
पत्रात् पत्रं पततीति प्रयोगो दुर्वारः यत्रेतरनिष्ठभेदमादायतनः प्रयोगो न व्यवस्थापयत्र निष्ठभेदप्रतियोगितावच्छे

गदा.
ग्रं.
41

दकत्वस्यपंचम्यर्थत्वेपिवृत्तात्पर्यायततीत्यत्रपत्रात्पंयंपतीतिप्रयोगोद्धर्वारः यत्रांतरानिष्टभेदमादायततः
प्रत्योतव्यस्ययत्रनिष्टभेदप्रतियोगितावच्छेदकत्वेसतियत्रनिष्टविभागजनकत्वस्ययत्रक्रियान्वयोबाध्य
इतिनोक्तातिप्रसंगः ततयत्रनिष्टक्रियावच्छिन्नप्रतियोगिताकभेदाश्रययत्रांतरनिष्टविभागजनकताया
स्तत्यत्रक्रियायामसत्वेननतस्याउभयसंबंधेनयत्रांतरान्वितभेदान्वयायोग्यत्वादितिवाच्यं यत्रांतरनिष्ठ
तत् क्रियावच्छिन्नभेदस्यवृत्तेपिसत्वेननद्वेदाश्रयवृत्तिनिष्टविभागजनकतायास्तत्क्रियायांसत्वेनय॰
त्रांतरनिष्टभेदस्योक्तोभयस्यसंबंधेनतत्क्रियान्वययोग्यतायाश्चदुर्घटत्वात् अधिकरणभेदेनाभावभेदाभा
ववान् अथयत्रादित्यत्रआधेयतासंबंधेनयत्राविशिष्टस्यैवचस्वाश्रयनिष्टविभागजनकत्वघटितोभय॰
संबंधेनान्वयविशिष्टस्याधिकरणमेवविशिष्टनिरूपितपंचमीसंबंधवदकंयत्राधेयत्वविशिष्टस्यवाधेय॰
तासंबंधेनयत्रविशिष्टस्याप्यधिकरणंविशेषणीभातयत्रमेवनतद्वृत्तः अतोनोक्तोभयसंबंधेनपत्रवि
शिष्टभेदस्यतत्क्रियान्वययोग्यताभेदप्रतियोगितावच्छेदकत्वदलवैयर्थ्यंस्वपदेनयत्रांतरविशिष्टभे
दस्यैवोपादेयत्वात् तदुपादानेतदाश्रययत्रांतरनिष्टविभागजनकत्वस्यतत्क्रियायोग्यघटितमशक्य
त्वादितिचेन्नहि विभागपदबृंहितस्यैवत्स्यैवाधेयतासंबंधेनप्रकृतयत्रविशिष्टस्याश्रयनिष्टभेदप्रति
योगितावच्छेदकत्वसतिहितज्जनकतासंबंधेनक्रियायामन्वयउपेयतांतावतापुक्तस्थलेपत्त्यात यत्रेय॰
तीप्रयोगप्रसंगस्यवारणासंभवात् आधेयतयायतपत्रविशिष्टविभागजनकत्वंयत्क्रियायास्ताहृशा॰
विशिष्टाश्रयत्वात् यत्रनिष्टभेदप्रतियोगितावच्छेदकत्वस्यतत्क्रियायामभावादित्यलमधिकेन आ॰
त्रजनकत्वमेवार्थोवाच्यइतिकालापवमित्यस्वरसः अतइतिनिगमनस्यापारस्मादितिपंचम्यालाता॰

णिकत्वान्निगमनवारणायेति शेषः पंचम्यंतेनोक्तित्वं तथा च मोपदस्य पंचम्यंतत्वाभावान्नातिव्याप्तिरिति
भावः नन्वेवमपि पंचम्यंततत्पदस्येताह धूमादिपदवह्न्यादिज्ञानेलाक्षणिकत्वात्तद्घटितैव निग
मनातिव्याप्तिरित्यतआह तस्मादित्यत्रेति तत्पदेनलक्षणोक्तिन धूमादिज्ञाने शक्तिविरहइत्यर्थः तेन
तत्पदस्य च धूमादिनात तज्ज्ञानस्यसंबंधसत्वाद्वह्निज्ञानस्यत्यकालेप्यवसंबंधग्रहात् प्रसंतरस्ये
वतत्पदस्यापिताह शाब्दबोधकताया अग्रशावकायपलायत्वाच्च तत्पदेन लक्षणाया लक्ष्याबोधकत्वस्य
चवायवद्र्वदत्वेपि मतत्तिः लक्षणेच लाक्षणिकत्वं शक्यार्थतात्पर्यविषयादित्यमतो निगमवे तत् पद
स्यतात्पर्याविषयीभूतधूमज्ञानलक्षणिकत्वेपि नातिव्याप्तिरित्यवधेयं शक्यैवेति तत्पदस्य वह्निबु
द्धिस्यावाचकत्वात् भयादिज्ञानेनातत्पर्येण च प्रक्रान्तेतत् प्रयोगेण ज्ञानस्य वह्निबुद्धिस्यातायाश्रवणपक
त्वात् विशिष्टहेतुज्ञानस्याप्रक्रांतत्वोपित्सतिविरहादितिभावः नन्वेवंतत्पदेनयत्रहेतुनिर्देशस्तत्रपं
चम्यंतलाक्षणिकपदाभावाद्व्याप्तिरित्यतआह पर्वतइति वह्निमान्तस्मादित्यत्रहेतुभूतधूमादेरप्र
क्रांतत्वाद्धेतोः प्रक्रांतत्वस्यावयवाङ्गसामग्रीमानिति अत्रवह्निरूपहेतोः प्रक्रांतत्वेनतत्पदेनस्फुटतया
तत्पदमर्थादितिभावः संप्रदायानन्नरोधिनांतथाप्रयोगोद्वांराणावेत्यत्रालक्षणरवरणावदंतात्पर्
नेनसूचितः प्रतिज्ञाख्यसाध्यवाचपदस्यज्ञानलाक्षणिकत्वात्प्रतिज्ञायामपि पंचम्यंतपदव्यावृत्तिः सं
वंतीतिमतमपन्यस्यदूषयति यत्त्विति अत्रवा निगमनस्यावह्न्यादिपदस्यवह्न्यादिज्ञानलाक्षणिकतया
तस्मादितिपंचम्याजनकत्वंजन्यत्वं चार्थः तथा च पंचमीमादायननिगमनेव्यावृत्तिसंगतिः अबाधि
तादेरिवजनकतादेरपिस्वरूपतयाविनिगमकाभावेनतस्यापिवाच्यत्वेनपंचम्याअलाक्षणिकत्वा

गदा॰
मू॰

42

दितिवादिनोमतेदूषयति यदितिति एवंचाप्रेजन्यत्वेशङ्कांवारयितुंज्ञाप्यत्वेलक्षणोचेदुपसंहारः संगच्छते।
हेत्वर्थान्वयानुरोधाच्छिनिहेत्वनुशिष्टपंचम्याजन्यजनकभावएवार्थोनतुज्ञाप्यज्ञापकभावः हेतुनोका
रणेबीजमितिकोशाद्धेतुकारणपदयोः पर्यायतानास्तितः ज्ञापकत्वार्थकतायाहेतुपदस्यकोशादावद
र्शनात् तथाचप्रतिज्ञास्थवह्न्यादिपदस्यसाध्यार्थान्वयानुपपत्तिः स्यादितिभावः ज्ञानलक्षणावह्न्या
दिज्ञानलक्षणएतेचविषयतासंबंधएवमतुवर्थः ज्ञानविषयतापर्याप्तमेववावह्न्यादिपदार्थइति
भावः ज्ञापकत्वइतिप्रकृतमर्थेप्रवृत्तिकामत्वादीनांसत्वेताबाधिप्राचीनमेतेनज्ञाप्यत्वेवेतिनव्यमते
नेतत्रवह्न्यादिपदेलक्षणायालक्षणानिर्वाहकतात्पर्यमानाभावादिति जन्यजनकभावस्यपंचम्य।
र्थत्वेपितद्घटकतायाश्चावश्यकत्वान्नैवज्ञानेनतर्भावेणोपत्तानुभयत्रलाक्षणिकाश्चकृत्वादि।
तिभावः नचस्वःविभक्तेःरानुशासनिकत्वाद्विनालक्षणानुशासनंविनापितत्सूत्रार्थोविभक्तेःसा
धुत्वैकमत्वादिरूपलक्षणार्थेषष्ठ्याःयत्रानुशासनंवैयर्थ्यादिति कथमेतदितिवाच्यं हेतावितिसूत्रस्थहेतु
पदस्यकारणज्ञापकोभयपरतयातदनुव्याख्यानतोविभाषागुणेःस्त्रियामितिसूत्रेणज्ञापकत्वेपिपंचम्या
अनुशिष्टत्वात् यद्यपितत्रगुणपदंनवैशेषिकसिद्धगुणपरंगुणाभावात्तस्यावीत्यादौपंचम्याअनुपप
त्तेरितिपराभिमतपरंतत्पराश्रितत्वंचसाध्यवदधिकरणाश्रितत्वंतथासतिअनुमितेअस्थलेप्रगुणाभावोदेवस्वप्रयो
ज्यतद्गाभावाप्रयुक्तितयातत्प्रयोजकत्वात् पंचम्युपपत्तेः तथाचज्ञानकरणताकारमतेधूमा।
दिपदार्थज्ञानरूपहेतुः साध्यवतिनसमवायादिनावर्तते तथापिविषयतयैवनतद्वृत्तिरितितेनानुपपत्तिः
त्रिः एवंसतिधूमज्ञानाद्वह्निमानित्यादिप्रयोगःस्यादितितन्नदेष्यज्ञापकताबोधकपंचम्यंततोर्थवाच। ८१

कापदस्यतत्तदर्थज्ञानपर्यवसायितात्पर्य्याद्धूमज्ञानपदस्यधूमज्ञानज्ञानपर्यवसायितात्पर्य्यात् ज्ञानज्ञाप्यत्वस्यपंच
म्यर्थतामते च ज्ञानविषयधूमादिरूपहेतोः संयोगादिनैव साध्याद्याश्रितत्वान्नानुपपत्तिरिगंथोपि प्रतिज्ञास्थव
ह्न्यादिपदस्य मुख्यार्थपरत्वे मणिकृतां नैयापि स्वरसं संदर्शयति अत एवोक्तरत्याहृताविति तेजसत्वेन पुनरत्र संधीयमा
नस्य प्रतीचादिवाक्यसहकारेण मध्यस्थसंशयजनकस्य पूर्वोक्तसाध्यवद्धर्मिबोधकवादिवाक्यस्य प्रतिज्ञात्वमभ्यु
पगतं तत्र च वह्न्यादिपदं न तज्ज्ञानादिपरं तथा सति विषयसंशयापकत्वायोगात् विप्रतिपत्तिवाक्यात्कोद्भूयस्वा
तिद्वारा मनसः संशयो जन्यत इति सिद्धांतिभिरपि वह्निः पर्वतोऽभाव इत्यादितत्र्याकांक्षादिरहितात् शाब्दात्संश
योजन्यत इति सिद्धांतिभिरपि वह्निः पर्वतोऽभाव इत्यादितत्र्याकांक्षादिरहितात् शाब्दात्संशयानुदयेन धर्मिणि तत्र तदभा
वकोटेः प्रत्येकं शाब्दधीजनकसामग्रीभ्यामेव परस्परविविरोधेन शाब्दबोधमनुत्पाद्य मानसः संशयो जन्यत इत्य
भ्युपगमात् प्रतिवादिनिरूपणे पर्वते वह्निः साधनीय इत्याभिसंधेः प्रथमतो नियमात् शब्दादेव पर्वते निश्चयो भवि
ष्यतीत्यभिप्रायेणापि प्रथमं पर्वतो वह्निमानित्यादिप्रयोगात् पूर्वप्रयुक्तवह्निपदस्य सर्वत्र ज्ञानपरत्वासंभवाच्चेति
भावः वर्द्धमानोपाध्यायानामपि पंचम्याज्ञाप्यकार्यकत्वे संवादमाह अत एवेति यथासंभवमिति समभिव्याहृतहेत्वा
दिपदार्थजन्यनित्यरूपेष्वन्वययोग्यतानुसारेणेत्यर्थः नन्वाहुर्नैयायिकाप्रतिज्ञेति मणिकृतोऽभ्युपगमवादः नचतत्र
निर्भरः मध्यस्थस्य संशयात्परतोपि हेतुवाक्यसमभिव्याहृतसाध्यानिर्देशस्य सांप्रदायिकत्वात् हेतुत्वं यथासंभव
मित्युपाध्यायग्रंथेपि पंचमीप्रतिपाद्यं हेतुत्वं क्वचित्समभि समभिव्याहृतमुख्यार्थनिरूपितं क्वचिच्च लक्ष्यार्थततज्ज्ञान
निरूपितं कारणत्वमित्यर्थतयोपपद्यते यदप्युक्तमुभयपदेन लक्षणानौचित्यमिति तदपि शिथिलं ज्ञापकतायाः
पंचम्यर्थत्वे सूत्रस्थहेतुपदस्योभयपरतया वाक्यभेदापत्तेरनुशासनाविरोधेनोभयत्र लक्षणायाएवौचितत्वात् इ

गदा॰
श्र॰

५३

त्यतोक्तत्वंनरमाह अत एवेति जिज्ञासाप्रश्नः धूमवत्त्वादित्युत्तरं चेति प्रयुज्यत इति शेषः इष्टं भविष्णोति नहीति
ज्ञानप्रश्न इति प्रश्नस्थवह्निपदं वह्निज्ञानपरमित्यर्थः वह्नेरेव जिज्ञासितत्वादिति शेषः लक्षणया ज्ञानेनोत्तरये-
हिरिति लक्ष्यार्थज्ञानपरमुत्तरवाक्यमित्यर्थः अपि तु प्रश्नसमानविषयत्वानुरोधेन मुख्यार्थवह्निपरमेव तादृशो-
त्तरं प्रयुज्यतामिति शेषः तथा च तत्र वह्निरोऽज्ञात इति धूमादिति च प्रश्नोत्तरवाक्ययोर्यपंचम्योर्यन्तदर्थान्वयानुरोधेन-
ज्ञापकत्वं ज्ञाप्यत्वं वा पंचम्यर्थो वाच्य इति भावः नन्वत्र प्रथमप्रश्नानुरोधाद्वह्निपदस्य वह्निपरत्वं वन्नज्ञात इति
प्रश्नस्थपंचम्यर्थान्वयानुरोधात् तदुत्तरधूमादिति पंचम्यर्थान्वयानुरोधाच्च ज्ञानपरत्वमप्यविरोधात् एकादृशाका-
लक्ष्यार्थेनान्वयेपि वह्निं बोधयित्वा ज्ञानं बोधयिष्यतीत्यभिप्रायेणैव एकपदप्रयोगे बाधकाभावात् अत एवत-
स्याविधतात्पर्यः तद्बोधेन नानार्थस्थले प्याहृतिरित्यत आह नचेति परकीयभावे प्रश्नानुरोधादिति तादृश-
प्रश्नस्वीयतदुत्तरवाक्यद्वयस्थपंचम्यर्थान्वयानुरोधादित्यर्थः अजिज्ञासिताभिधानं प्रथमजिज्ञासाविषयज्ञा-
नप्रत्यायनेच्छया वह्निपदप्रयोगः परकीयत्वेन भावित्वान्न च प्रथमं ज्ञात इति प्रश्नस्याज्ञानात् परकीयवह्निज्ञा-
नहेतुजिज्ञासायाश्च ज्ञानेन वह्निज्ञानप्रत्यायनेच्छाया प्रथममसंभवादिति हेतुसूचनाय परकीयत्वभावित्वाभिधा-
ने नन्वत्र ज्ञातमित्यध्याहारात् ज्ञात इत्यादिपंचम्यर्थस्य ज्ञानेन्वयेन तद्वह्नेरित्यत आह नचेति प्रश्नस्थमप्यो-
त्तरवाक्ये ऽनुषंगस्यौचित्यमिति सिद्धत्वात् ज्ञात इत्यत्र ज्ञातमित्यध्याहारेणैव धूमादित्यत्रापि ज्ञानान्वयसंभवान्नाध्या-
हारांतरविरहेपि नक्षतिरित्यतः ज्ञातस्यैवाध्याहारः प्राकृतः मानाभावादिति पदार्थान्तरान्वयस्य वह्नौ तन्नाभिप्रेत-
त्वनिश्चयेपि बोधस्यानुभविकत्वात् सर्वथाश्रुतपदकल्पनासंभवादित्यर्थः इदंत्वधेयं यद्वह्निमानिति प्रयोक्तु-
र्वह्निपदे ज्ञानतात्पर्यं ज्ञात इति वाक्यजन्यज्ञानहेतुजिज्ञासाबोधनप्रयोजनं स्वाभिप्रायस्य बोधहेतुत्वात् ज्ञातइ-

तिष्टेथंष्वप्रकृतवतात्पर्यस्यैव तत्रोपयोगात् तथा च स्वजिज्ञासां बोधयितुकामकृतत्वमिति प्रयोक्तुः परमयानावह्निप
दविषयकलक्षणाया वह्निपदोपस्थापितं ज्ञानमादाय कृतत्वमिति पंचम्यर्थोन्वयबोधो भवतीत्यभिप्रायेणात्रैव प्रतिपक्ता
प्रभृण्वंकिज्ञानहेतुजिज्ञासाकृतत्वमिति शाब्दाद्युपजायमानस्योक्तवह्निपदसहितात् ज्ञानस्येति एवं रहं वह्निमदिति प्र
योक्तुः प्रथमं वह्निपदे ज्ञानतात्पर्यविरहेपि कृतत्वमिति प्रज्ञानंतरं प्रभृण्वं वह्निपदालक्षणयोपस्थितं ज्ञानमादायैव धू
मादित्यवाक्यं धूमज्ञाने वह्निज्ञापकतां बोधयतीत्यभिप्रायसंभवात् तज्ज्ञानेन धूमादिति पंचम्यर्थस्य ज्ञानान्वयो
भविष्यतीति किमत्रोपपन्नं न हि प्रयोक्तुः पुरुषस्यैकार्थतात्पर्यं प्रकृष्टानेवस्थान्यार्थतात्पर्यविरोधि प्रत्येतुं न्यतात्प
र्येण प्रयुक्तान्यपि पदान्याहाययान्यार्थपरत्वेन लोकस्य मौनिनां निबंधनात् न वा स्वीयं प्राथमिकमन्यतात्पर्यं तदा व्यभ
पवनात् पर्यंर्याविरहेणाद्विवोजाभावात् उच्यते च वह्न्यादिपदस्य वह्न्यादिप्रकारकज्ञानविषयत्वे लक्षणा साध्या
त्वंथिजन्यज्ञानविषयत्वस्य पंचम्यर्थत्वे गुणः सत्तावान् द्रव्यत्वादित्यादिप्रयोगस्य दुर्वारत्वापातात् द्रव्यत्वादिज्ञा
प्यसत्तादेर्गुणादावपि सत्त्वात् साध्यवाचकपदस्य लाक्षणिकत्वे पक्षान्वयिसाध्यतावच्छेदकविशिष्टसाध्यप्रकार
कज्ञानविषयत्वरूपसाध्यवाचकपदार्थे पंचम्यर्थलिंगज्ञानप्रयोज्यत्वान्वयात् द्रव्यत्वादिप्रकारकज्ञानप्रयो
ज्यसत्तादिप्रकारकज्ञानविषयत्वस्य गुणादौ बाधेन बाधितत्वात् अतिप्रसंगवारणसंभवात् न च ज्ञाप्यज्ञानविषयत्वरूप
पंचम्यर्थस्य साध्यविशिष्टपक्षेऽन्वयः स्वीक्रियते सत्तादिरूपसाध्यविशिष्टगुणादिरूपपक्षस्य च न द्रव्यत्वादिति
लिंगज्ञाप्यत्वेति नातिप्रसंगः वह्न्यादिमतः पर्वतादेर्द्रव्यत्वादिरूपसाध्यविशिष्टस्य पृथिवीत्वादिज्ञाप्यत्वेपि वह्न्या
दिविशिष्टस्य न तथात्वमिति विशेषणावच्छिन्नपक्षपंचम्यर्थज्ञाप्यत्वबोधकत्वान्न पर्वतो वह्निमान् पृथिवीत्वादि
त्यादिप्रयोगः विषयतायाः पर्याप्तिसंबंधेन विशिष्टेऽन्वयोपगमात् द्रव्यत्वादिरूपसाध्यत्वेन वह्न्यादिरूपपक्षताव

गदा॰
श्री॰

च्छेदकविशिष्टपर्वतादौ पृथिवीत्वादिज्ञाप्यत्वेपि न क्षतिरिति वाच्यं एवमपि द्रव्यत्ववान् पर्वतो वह्निमान् न पृथिवीत्वादि
त्यादौ नञर्थान्वयानुपपत्तेर्दुर्वारत्वात् पृथिवीत्वज्ञाप्यतापर्य्याप्त्यधिकरणद्रव्यत्वविशिष्टपर्वतादौ वह्न्यादिरूपविशे
षणं तदवच्छिन्नेपि तज्ज्ञाप्यताविरहासंभवात् अस्मन्मतेच वक्तृतात्पर्यज्ञाप्यत्वाधीननिर्विवह्न्यादिप्रकारकज्ञानविषयत्वे
पृथिवीत्वादिरूपलिंगज्ञानप्रयोज्यत्वस्यापंचम्यर्थस्याभावान्वयात् तदभावस्य तत्रावाधेनानुपपत्तिविरहात् एवं
साध्यज्ञाप्यत्वान्वयपक्षेपि उक्तप्रयोगानुपपत्तिर्दुर्वारा वह्न्यादेरपि मेयत्वाद्वह्न्यादेरपि मेयत्वादिना पृथिवीत्वादिज्ञाप्य
त्वात् यदि चाप्रयोज्यत्वे समभिव्याहृतपक्षविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नविधेयताकखंडशो लक्षणा
या पंचम्यर्थः अन्वयबलात् साध्ये पक्षांशे तद्रूपेण हेतुज्ञाप्यतालाभः नञा समभिव्याहारस्थले च लिंगज्ञानान्वितप्रयो
ज्यत्वरूपैकार्थस्य निरुक्तविधेयताद्रूपापरपंचम्यर्थभावेन नाप्रसक्तता दुरुच्यते तदा साध्यतापक्षतावच्छेदकादे
र्द्विधाभानादेः एवं साध्यान्वयिनी पक्षविशेष्यतानिगमनाविरहात् एकपदस्यार्थद्वये खंडशो लक्षणा पदद्वयस्यैव
वा प्रत्येकमर्थद्वये लक्षणेत्यत्र को विशेष इति प्रसंगतः पंचम्या जनकत्वज्ञापकत्वार्थकत्वं नञर्थान्वयस्थले नुपप
त्तिदर्शनेन तिरस्कुर्वन् जन्यत्वज्ञाप्यत्वार्थकत्वं व्यवस्थापयति दाहो दहनादित्यादिना गंधस्य ज्ञापकत्वे पक्षधर्मताविर
हेणापादकस्य तथात्वे व्याप्त्यंशे विरहेणेति मदर्शितार्थे उभयोपादानं नञर्थान्वयानुरोधादिति जनकत्वज्ञापकत्वयोः
पंचम्यर्थत्वे निरूपकतासंबंधावच्छिन्नाभावाप्रसिध्या आश्रयतासंबंधावच्छिन्नाभावप्रत्ययपरावदाहस्य पञ्चम्या स्वीका
र्य्यः तथा च तत्र जलं गंधानिष्ठजनकत्वयोरिव दहनरूपादिनिष्ठयोरपि तयोरभावसत्वेन दाहो न दहनात् जलं स्पर्शव
त्त्वरूपात् इत्यपि स्यात् इति भावः न च दाहादिविशेषितजनकत्वादेरेवाभावस्तत्रादिरूपप्रसक्तान्वयार्थे प्रतीयत इति वा
च्यं प्रथमोक्तार्थस्य पंचम्यर्थविशेष्यत्वे शाब्दान्वयानीनेर्दाहादिविशेषितजनकत्वादिरूपप्रतियोगिनः शाब्दानुपस्थित

स्यनञाभावबोधानासंभवात् पंचम्यर्थस्य प्रकृत्यन्यपदार्थे विशेषितस्यापि नञ् समभिव्याहारस्थले भानोपगमे
प्रत्यन्तिभेदाहो एवं सम्यग्वैव प्रकृत्यर्थे विभक्त्यर्थो विशेषणं तथा निरूपकतया समभिव्याहृतपदार्थान्तरमिति वाच्य
भवसिद्ध प्रथमान्तपदार्थे विशेष्यताभंगेनासंभवदुक्तिवं इंधनसंयोगाद्दहनादित्यादौ तल्ययप्रत्ययदहनादेर्दाहजन
कत्वादिविशेष्यत्ववत् इंधनादेरपि दाहसंबंधादिविशेष्यतया इंधनेदासंबंधे दहनोदाहजनकइत्यादिसमूहालंब
नबोधस्य स्वीकारेण वाक्यभेदाप्रसंगात् यत्रान्यसंयोगाद्दहनान्वेतदिंधनस्यात्तत्रैतादिंधनसंयोगानदहनादिति
प्रयोगाद्युपपत्तिश्चेति शेषेत्यवर्ततिजन्यतायाः पंचम्यर्थत्वेपि दाहोनपरमाणुपरिमाणादित्यादिप्रयोगानुपपत्तिः प
रिमांडल्यस्य कार्यसामान्ये जनकतया परमाणुपरिमाणादिजन्यत्वाप्रसिद्धेर्नञर्थप्रतियोगितायाअन्वयासंभवात् दा
हाद्यन्वयिनिजन्यत्वे प्रकृत्यार्थस्यनिरूपितत्वसंबंधेनाभावबोधोपगमेच सत्यनियामकसंबंधावच्छिन्नाभावाभ्युपग
मःलक्षणया प्रकृत्यर्थनिरूपितत्वस्याभावान्वयोपगमेपि गगनेनपरमाणुपरिमाणादित्यादौ गगनादौ जन्यत्वान्व
यायोग्यत्वादनुपपत्तिः पारिमांडल्यनिरूपितत्वाभाववज्जन्यत्वाभाववद्गगनमित्याकारयाद्विधानञर्थावगाहि
न्याःप्रतीतिरुपगमेच घटकादित्यपिस्यात् घटजनकाद्यनिरूपितजन्यत्वाभावस्य घटदाहावबाधात् दंडाद्यनिरूपि
तजन्यत्वाभावस्य पटादौ बाधेन दंडोनदंडादित्यादावप्यनुपपत्तेः पंचम्यर्थजन्यतासामान्ये लक्षणया प्रकृत्युपस्था
प्यपारिमांडल्यनिरूपितत्वगगनवृत्तित्वोभयत्वावच्छिन्नाभावस्य बोधोपगमेच जनकतायाः पंचम्यर्थत्वेपि ससा
मान्ये लक्षणया प्रकृत्युपस्थाप्यपारिमांडल्यावृत्तित्वगगननिरूपितत्वोभयत्वावच्छिन्नस्याभावबोधोपगमेनसा
मंजस्यंनच तत्र लक्षणायामावश्यकत्वेपि दाहोनजनकादित्यादौ लक्षणाविनैव बोधत्तो जन्यत्वस्य पंचम्यर्थत्व युक्ति
तमिति वाच्यं जलादेरपि कार्याजनकत्वभ्रमदशायां दाहोनपारिमांडल्यादित्यादाविवान्वयबोधयोरसत्र भवि

कर्त्तायां तत्तद्बोधेन तत्रापि जन्यतायां जल्पादिनिरूपितत्वाभावबोधस्यावश्यापेयत्वादिति अत एवं तत्त्वे प्रमाणविषया
णां नास्तीति वाक्यवत् दाहीन पारिमांडल्यादित्यादिवाक्यमप्रमाणमेव तद्वाक्यस्य प्रामाण्यानुरोधेन लक्षणया
पारिमांडल्यादित्यादिवाक्यमप्रमाणमेव तद्वाक्यस्य प्रामाण्यानुरोधेन लक्षणया पारिमांडल्यादिनिरूपितत्वाभा
वबोधस्य क्वाचित्कस्यापगमेपि दाहीन जल्पादित्यादिवाक्यतो लक्षणज्ञानशून्यस्याकाले च यो बोधस्य क्वाचित्कस्यापग
मेपि दाहीन जल्पादित्यादिवाक्यतो लक्षणज्ञानशून्यस्य काले च यो बोधस्यानुभाविकतया जगत्वाभवबोधकत्वा॰
नुपपावादस्यापगमं व्येति जन्यत्वे पंचम्यर्थ इति जन्यत्वानविषयत्वमिति जन्यत्वान्वयि प्रकृतत्वर्थज्ञानं भ्रमभिन्नं॰
ग्राह्यं अतोऽव्याप्तिपक्षधर्मतावगाहि भ्रमरूपस्कादत्वादिज्ञानस्य पर्वतादौ वह्न्याद्यनुमापकत्वेपि पर्वतो वह्निमान् स्क
दत्वादित्यादिप्रयोगस्यनापत्तिर्नवा पर्वतो वह्निमान् धूमात् स्कदत्वादित्यादिप्रयोगानुपपत्तिः यद्यपि यत्किंचिद्वि॰
षयभ्रमानात्वे भ्रमसाधारणं भ्रमसामान्यभिन्नत्वं च तदभाववति तत्प्रकारकत्वरूपभ्रमत्वस्य तत्प्रकारसंबंधविशेष॰
घटितत्वेनाननुगततया जगतीगतयावद्व्यक्तिभ्रमाणां तत्तद्व्यक्तिभ्रमत्वावच्छिन्नभेदकूटरूपमनिर्वचनीयं तथापि प्रकृत॰
साध्यहेतुपक्षकपरामर्शप्रकारीभूतायेयेन तत्प्रकारकभ्रमभिन्नत्वमेव विशेषणं देयं यद्यपि धूमादिमत्यपि पर्वतादौ
समवायादिसंबंधावच्छिन्नधूमाद्यभावसत्वात् पर्वतादौ धूमादिप्रमायाः संग्रहाय यत्संबंधेन हेतुप्रकारकज्ञानं॰
यत्र हेतुवाचकपदेन विवक्षितं च तत्संबंधावगाहितत्प्रकारकभ्रमान्यत्वं तत्र तत्संबंधेन तत्तद्भ्रमाप्रसिद्ध्या तदन्यत्वं दु
र्ग्रहं तथापि तज्ज्ञानात् हेश्या भ्रमान्यत्वाप्रतीतित्वेन स्वीक्रियते तेन न दोषः वस्तुतस्तत्त्वावच्छेद्ययोगिनिरूपविशेष्यतानिरूपितत्व॰
स्य प्रतियोगिनिरूपगतत्वत्वावच्छिन्नत्वेन तत् विनयसंबंधेन संबंधविशिष्टान्यप्रकारताशालित्वमेवानुगतभ्रमत्वे
ते स्तवचं अतीभ्रामविषयतयैव प्रमेयत्वं वाच्यत्वादिज्ञापकमिति भ्रमदशायां वाच्यं प्रमेयत्वादित्यादि प्रयोगस्यना

हेतुप्रयोगाधीनबोधस्य पंचम्यालाक्षणिकत्वमुपसंहरति एवंचेति एवंच पंचमात्रात्पक्षाद्यभावार्थकस्थिते
च हेतुमत्त्वे जन्यत्वे लक्षणैवेति जन्यत्वापेक्षया नस्य शरीरगौरवादिति भावः नचेति धूमादालोकवान् पर्वतो वह्नि
मानिति प्रतिज्ञाघटितजन्याये आलोकादेर्हेतुत्वे प्रकृतहेतुत्वार्थान्वितस्वार्थबोधकपंचमीनिवेशेनापि वारणासं
भवाद्धूमादिहेतुत्वाभिधाने अत्र च पंचम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्वविशेषणमात्रेणातिव्याप्तिवारणं सं
भवात् तादृशसाध्ये विवक्षणीयोपस्थापितत्वविशेषणव्यावृत्तये स्थलांतरे तिव्याप्तिं दर्शयति धूमाद्वह्निमानिति
अत्र वह्निमत्त्वेन पक्षस्यापि भानात् विवक्षणीयविशेषणे पक्षतावच्छेदकपर्याप्तनिवेशस्यावश्यकत्वे व्यावृत्तिः सा
ध्यतावच्छेदकावच्छिन्नत्वांशनिवेशनाय स्थलांतरे तिव्याप्तिं दर्शयति पर्वतो धूमवान् वह्निमानिति तत्रान्यनिगमने
तस्माद्धूमाद्वह्निमानित्याकारके अत्र पंचम्यर्थविशिष्टं वह्नित्वमेव साध्यतावच्छेदकमिति तद्वदवच्छिन्ने साध्ये पंच
म्यर्थानन्वयात् साध्यतावच्छेदकविशिष्टान्वितस्वार्थबोधकत्वनिवेशेनातिव्याप्तिः धूमाद्वह्निमत्त्वधर्मेत्यादौ प्रकृ
तपक्षतावच्छेदकावच्छिन्ने यस्य साध्यस्य द्वितीयवह्निमदजन्योपस्थितिवशादन्वयः प्रथमवह्निपदेऽदोषस्यापि
तेनैव प्रतिज्ञाघटकपंचम्यर्थस्यान्वयात् पक्षान्वितसाध्यान्वितस्वार्थबोधकत्वविशेषणेन वारणासंभवात् सा
ध्ये प्रकृतपक्षान्वितत्वं विहाय प्रकृतपक्षान्वितत्वं विहाय प्रकृतपक्षान्वितस्वार्थबोधकपस्थापितत्वं निवेशितं य
द्युभयवह्निपदेनैकस्यापि साध्यस्योपस्थाप्यत्वे अतो नैतावताप्युक्तातिव्याप्तिवारणासंभवः तथापि प्रकृतपक्षता
वच्छेदकविशिष्टसाध्योपविशेष्यतानिरूपितास्वार्थविषयताप्रयोजकं बोधकत्वं तादृशः पंचमीत्वमनिवेश्यप्रयोजना
भावात् उपनयोपस्थापितपक्षविशेषणतापन्नसाध्यान्वितार्थपंचम्यंततत्पदमादायानुपनयपदेऽपि निगमने
तिव्याप्तेर्वा वारणाल्लाक्षणिकपदप्रयोगेन अप्रसन्नामात्मा ज्ञानादित्यादौ ज्ञानपदं मुख्यार्थपरमेव पंचम्यर्थान्वय

गदा.
अ.
46

स्य तथैव संभवेन लक्षणाबीजीभूतान्वयानुपपत्तिविरहादिति अभिमानिनां उक्तलक्षणाव्याप्तिशंका सङ्गतेत्युपन्यस्यति
यत्त्विति स्वरूपज्ञानत्वावच्छिन्नेन सममपि चरमार्थान्वयसंभवेपि अनुमितिजनकविषयतया ज्ञानोपस्थितावेव ज्ञानस्वरूपहे-
तौ तद्विषयतानिर्वाहकव्याप्त्याकांक्षायां योग्यतानवाप्त्याश्चात्मा इत्युदाहरणादिप्रयोगसंभव इति ज्ञानविषयकज्ञानत्वा-
वच्छिन्ने तात्पर्याग्रहे अनुपपत्त्या लक्षणायाश्रवणकात्वमिति समाधत्ते तन्नेत्यादिना यद्विषयकज्ञानत्वावच्छिन्नस्य हेतुत्व
मनुमितिजनकत्वं तस्य व्याप्त्यादिजिज्ञासायां अन्वयवितिवेद्यतयार्थं तो वा तत्र प्रतीत्यनुमापकज्ञानविषयतायानि-
र्वाहकाकांक्षायामित्यर्थः उदाहरणादिप्रयोगः उदाहरणोपनयाभ्यां तत्र हेतौ व्याप्तिपक्षधर्मताप्रदर्शनं यद्यपि ज्ञान
विषयकज्ञानत्वावच्छिन्ने ज्ञानपदस्य तात्पर्येपि मुख्यार्थो ज्ञानत्वावच्छिन्नपरत्वमस्त्येवेति पूर्वोपदर्शितमु-
ख्यार्थतात्पर्यराहित्यरूपलक्षणीकत्वं नोपपद्यते तथापि प्रकृतावच्छेदकाविलक्षणास्वरूपावच्छिन्नपरत्वमेवल-
क्षणिकत्वमतो न दोषः ननु स्वरूपज्ञानत्वावच्छिन्ने अनुमापकत्वबोधिते तन्निर्वाहकव्याप्त्यादितद्विषयकत्वला-
भाय स्वरूपगत्या तादृशज्ञानविषयीभूतज्ञाने व्याप्त्यादिप्रदर्शनं संगतिरित्यत आह अन्यथेति जनकज्ञानविषयप्र-
तीते ज्ञाने वास्तवतादृशविषयता उपरक्तत्वव्याप्त्युपदर्शने स्वाभावादेव आत्मत्वानुमापकज्ञानविषयतायामा-
त्मा ज्ञानादित्यत्रयः स्वावीत्यस्मात्मेत्याद्युदाहरणादिप्रयोगप्रसंगादित्यर्थः तथाच स्वावादो व्याप्त्यादिप्रदर्शने
पि ज्ञानत्वनिर्वाहकव्याप्त्यादिमद्विषयकत्वपर्यवसानलाभात् तदाकांक्षायाअपहरणात् यथा स्वावादौ न तत्प्रदर्शनोपपद्य
त इति भावः उक्तप्रतिज्ञादावतिव्याप्तिवारणाय प्रकारान्तरेण लक्षणं परिष्कुर्वतां मतमाह केचित्त्विति पंचमत्वेति
कस्याश्चित् प्रतिज्ञायां व्यभिचारेणावयवतावच्छेदकप्रतिज्ञात्वे पलादिभेदेन भिन्नमपि न तादृशापदवत्त्वनियतमिति
नातिव्याप्तिः तादृशावयवतावच्छेदकं हेतुत्वं तु निर्वचं स्वचनदोवलक्षणमित्यन्यथापरिष्कुर्वते तादृशेति तादृश

पदं पंचम्यंतलाक्षणिकपदं प्रतिज्ञात्वादिकं च तादृशपदाघटितस्यापि प्रतिज्ञादेः सत्वेन तादृशपदवत्त्वव्यभि-
चारीति तद्भिन्नत्वाभावान्न प्रतिज्ञादावतिव्याप्तिः तादृशपदवत्त्वव्यभिचारिमेघत्वादिभिन्नत्वात् प्रसिद्ध्यावयवता-
वच्छेदकत्वस्यैकस्याभावात् प्रतिज्ञात्वादिकं विशिष्यापादाय तद्भिन्नत्वं निवेश्यं तथा च हेतुत्वव्याप्तेनायोपा-
तेन तादृशपदवत्त्वव्यभिचारित्वविशेषणमनर्थकं यदि च प्रतिज्ञात्वहेतुत्वादिसाधारणं प्रतिज्ञात्वादिपंचकान्य-
तमत्वमवयवतावच्छेदकं तदा तत्र हेत्वन्यतमत्वं तर्भाव्य तद्व्यावृत्तये विशेषणं तद्दाने च प्रत्यालेनाडीभिन्नत्वायेनाय-
क्तमित्यस्वरसः पंचम्यंतेत्यादि लक्षणकार्ते मतं धूमादिवाक्यस्य धूमादिपदस्य ज्ञानलक्षणे स्वातंत्र्येणाद्भू-
यते नव्यास्त्विति ज्ञानज्ञाप्यत्वलक्षणायेति ज्ञाप्यत्वलक्षणायामावश्यकत्वात् तत्र वक्तानोपास्याप्याधिकस्य
प्रवेशेनैव धूमादित्यस्य व्याप्यार्थपरत्वेपि धूमादिज्ञानज्ञाप्यत्वलाभसंभवेदित्यर्थः न प्रातिपदिकेन पंचमी प्रकृ-
ति धूमादिपदेन त्वेव ज्ञानस्य पंचम्यर्थैकदेशान्वयात् धूमादिपदार्थस्यान्वयायोगाद्धूमादिज्ञानलाभः न च
ज्ञाप्यत्वस्य पंचम्यर्थत्वेपि ज्ञानत्वस्य तदेकदेशकथं धूमादिपदार्थेन तत्र ज्ञानान्वय इति वाच्यं चैत्रस्य पुत्रः चैत्रा-
दन्य इत्यादौ संबंधिकपदार्थैकदेशजन्यत्वादौ पदार्थांतरस्यान्वयदर्शनात् निः प्रतियोगिकपदपदार्थैकदेशो इतराव-
यस्य व्युत्पन्नत्वात् न च स्वतंत्रोपस्थिते दत्रसान्वयजिज्ञासायते न तत्र विशेषणतयोपस्थितेश्वतपदयोर्नित्यत्वा-
दौ स्वतंत्रणोत्थापकोपस्थितये लक्षणारूपमन्वाकांक्षाविरहः पदपदार्थांतरस्य पदार्थैकदेशेनान्वयो बीजं सच सप्र-
तियोगिकविषयप्रतियोगिकैकदेशसाधारण इति वाच्यं एतावतरोधेन सप्रतियोगिकपदार्थविशेषणतयोपस्थि-
तेपि योगिजिज्ञासा जायत इति कल्पनात् न च ज्ञानादि सविषयकपदार्थे पितयोपस्थिते विषयजिज्ञासाजा-
यत इति यज्यते कल्पकाभावादित्याशंक्य सविषयकत्वादि इत्यंतेन पदार्थैकदेशे ज्ञानेपि विषयाकांक्षा।

व्यवस्थापयति आकांक्षावैचित्र्याच्चेति क्वचित्स्वतंत्रोपस्थितत्वप्रकारकाकांक्षा क्वचिद्विशेषणतयाप्युपस्थिते
कस्यचिदाकांक्षेति विषयस्वभावाधीनतयाकांक्षावैचित्र्यादित्यर्थः कर्तृज्ञानीवेति पदोत्पाद्यज्ञाद्यर्थ
कैकदेशोक्तौ यथाविषयत्वेनयाकादिक्रियान्वयितेत्यर्थः इदं च बोध्यं जिज्ञासाद्रूपाकांक्षायाः शाब्दधीहेतु
त्वे अजिज्ञासोरपि शाब्दबोधोदयानुपपत्तिः कृतानिराकृतं नथा चाकांक्षाविरहेण पदार्थैकदेशे पदार्थान्तरान
न्वये वीजं गौर्नित्य इत्यादौ गवादिपदार्थैकदेशगोत्वे नित्यादिपदार्थाभेदान्वयबोधप्रयोजिकायाः समानवि
भक्तिकत्वत्वसमभिव्याहाररूपाया आकांक्षाया असत्त्वात् अतः पदाधीनायाः स्वतंत्रतदुपस्थितेः प
दार्थान्तरस्य तत्रान्वयबोधे हेतुतावाच्या एवं च ज्ञानविशिष्टार्थकात्मादिपदघटितात्मानद्रव्यमित्यादिवा
क्यात् पदार्थैकदेशे ज्ञाने द्रव्याभेदान्वयबोधवारणाय दंडजन्यो न दंडजन्य इत्यादिवाक्यात् पदार्थैकदेशे दं
डजन्यत्वादौ दंडजन्यभेदान्वयबोधवारणाय च कल्पनीयज्ञानाद्यंशे तत्तदन्वयबोधे स्वतंत्रज्ञानाद्युपस्थितेः
हेतुत्वे कार्यतावच्छेदकतोटिप्रविष्टेतरविषयताया विषयित्वादिसंबंधावच्छिन्नप्रकारतान्यत्वं तद्विशेषण
देयं वस्तुतो ज्ञानादिविषयकशाब्दबोधे स्वतंत्रज्ञानाद्युपस्थितेर्हेतुत्वेपि पंचम्यादिजन्यज्ञानज्ञाप्यत्वोपस्थि
ति प्रकृतिजन्यधूमाद्युपस्थितियोगिताज्ञानघटितशाब्दसामग्र्याः पदार्थैकदेशे ज्ञानादौ विषयतादिसंबंधे
न धूमादिप्रकारकशाब्दबोधनने बाधकाभावः तादृशसामग्र्यां स्वतंत्रज्ञानाद्युपस्थितेरनंतर्भावात् तादृशो
पस्थितेर्ज्ञानादौ द्रव्याभेदाद्यन्वयबोधप्रयोजकसामग्र्यंतर्गतत्वेव निवेशात् न च वै स्वतंत्रज्ञानाद्युपस्थितेर्व्यभिचा
रेण हेतुत्वमेव न संभवतीति वाच्यं यतो यत्रैकरूपावच्छिन्नेपदोपस्थानवाकांक्षा गृहीतान्यरूपेण च गृहीतिर्ग्रहीतातत्रा
ति प्रसंगवारणाय तत्तद्रूपवद्विशेष्यत्वप्रकारेण गृहीतवृत्तिकपदजन्यतत्तद्रूपोपस्थितेर्हेतुतावाच्या तथा सति

तत्र इमे प्रकारेण कोत्यादिग्रहस्य तद्धर्मप्रकारेण गृहीतवृत्तिकपदाधीनोपस्थितेः परस्परसहकारेणैव फल
जनकत्वोपगमेनोक्तातिप्रसंगवारणसंभवात् तथा च नानुपूर्वीकपदजन्योपस्थिती नामेकविधशाब्दबोधे विभि
न्नरूपेण हेतुतया व्यभिचारश्चावश्यक इति तद्वारणाय नैव दर्शितव्यभिचारस्यापि वारणमिति एतेन जन्यत्वांशे
ऽप्येतत्त्वान्वयबोधे स्यात्तत्र जन्यत्वोपस्थितेः कार्यकारणभावे कार्यतावच्छेदककोटिप्रविष्टेन विषयतायां निरूपि
तत्वसंबंधावच्छिन्नप्रकारताभेदनिवेशनभयमिदं अन्यथाग्नौ पागवइत्यादौ तद्धितार्थोपत्यैकदेशे जन्यत्वेनि
रूपकत्वेन प्रकृतार्थान्वयानुपपत्तेः ज्ञानज्ञाप्यत्वस्य पंचम्यर्थत्वमते च स्वतंत्रज्ञानोपस्थितिजन्यतावच्छेदकज्ञान
विषयतानिरूपितत्वविषयतायां विषयप्रकारताभेदनिवेशनमधिकमिति प्रयतं तदनिवेशोपि दर्शितरीत्या सामं
जस्यात् वैयाकरणमतेत्यादौ तदधीनेन तद्धेतुत्वेनेन विहिततद्धितार्थस्याहेतुत्वेकदेशे ज्ञानेविषयतया प्रकृत्यर्थस्यान्वयो
पपत्तेः उक्तस्थले विषयप्रकारताभेदानिवेशस्य सर्वमतेऽप्यावश्यकत्वाच्चेति प्रकृते पंचम्यर्थस्य हेतुत्वयत्नं तत्र
माह यद्धर्मविशिष्टस्येति यद्धर्मविशिष्टः पंचमीप्रकृत्यर्थस्तदर्थः तद्धर्मावच्छिन्नस्यैव ज्ञाप्यत्वाद्युपदर्शनतद
तितज्ज्ञानज्ञाप्यत्वस्य पंचम्यर्थतामते तद्धर्मविशिष्टस्यैव पंचम्या जनकज्ञानविषयत्वबोधनादिति भावः अन्यथा
पंचम्या ज्ञानजनकत्वेन बोधिता प्रकृत्यर्थज्ञाने विषयत्वेन विशेषणतामवलंब्य विषयव्याप्त्युपदर्शनसंगमने यथा
र्थधूमज्ञानादिति प्रयोगे योतित्तत्रापि शब्दोपस्थितज्ञाने पंचम्यर्थज्ञाप्यत्वान्वयो न धूमादेर्ज्ञापकज्ञानविषय
त्वालाभेन धूमज्ञानादेर्ज्ञाप्यत्वपदर्शनं स्यात् तत्राप्यस्मन्मते च ज्ञानज्ञाप्यत्वस्यैव पंचम्यर्थतया धूमज्ञानस्यैव तत्र ज्ञाप
त्वं प्रतीयते न तु धूमज्ञानस्येति नातिप्रसंग इति न च पंचम्याः केवलज्ञाप्यत्वार्थकत्वमतेपि उक्तस्थले ज्ञानपद
स्य लक्षणार्थज्ञानविषयकज्ञानपरत्वतात्पर्यान्न धूमादिज्ञाने पंचम्यर्थज्ञापकतालाभ इति न धूमादौ ज्ञाप्यत्वो

श्रीः
४९।

गदा॰
ग्र॰
48

पदर्शनप्रसंगइतिवाच्यं अन्वयार्थपरत्वेबोधकाविरहेणतात्पर्येणापिप्रयोगासंभवात् नहियत्रपदांतरेणोप
लक्षणाशक्त्योपस्थापितोर्थस्तेनानबोध्यते तद्बोधोपयिकाकांक्षादिसत्वेसामग्रीबलेनतद्बोधस्यदुर्वारत्वात् अ
थतत्रपाक्यार्थबोधस्यापिसंभवेनतत्रापिकस्यचित्कदाचित्तात्पर्यसंभवात् तथापितत्रानादितात्पर्यविरहात्त
त्तात्पर्येणान्वयांतर्गतपदप्रयोगासंभवइतिचेत् माभूदन्वयार्थतात्पर्यज्ञानप्रयुक्तःदित्यर्थार्थः धूमज्ञाना
दित्यादिवाक्यसमभिव्याहृतस्यान्वयायत्वेन तथापिज्ञाप्यत्वमात्रस्यपंचम्यर्थत्वेन्वयांतर्गतपदान्वयार्थपरज्ञानप्रयु
क्तत्वार्थधूमज्ञानादितिवाक्यस्यधूमादौव्याप्याकांक्षाप्रयोजकधीजनकत्वंदुर्वारमेव तज्ज्ञानभवविरहे
नवज्ञानज्ञाप्यत्वेपंचम्यालक्षणापत्तेःपिवोबलज्ञाप्यत्वेस्वारसिकलक्षणयोपस्थितेधूमज्ञानेज्ञानज
नकतावोसंभवादुक्तातिप्रसंगोपूर्वोक्तत्वेनापत्तौप्रकृतेपीष्टापत्तिसंभवइतिवाच्यं स्वारसिकलक्षणया
पंचम्युपस्थापितविषयत्वादिरूपार्थान्तरद्वताहृशज्ञाप्यत्वेपिप्रकृतान्वयांशेप्रकांक्षायामयानुप
गमात् धूमज्ञानादित्यतोधूमज्ञानस्यज्ञापकत्वाबोधनादितिभावः यत्रधूमज्ञानादित्यतोलक्षणयोप
स्थापितधूमरूपविशिष्टज्ञानज्ञापकतामानेज्ञापकज्ञानविषयत्वंधूमज्ञानइवतद्विषयधूमेपिभासतइ
तिप्रकृतेलौकिकतामतोतत्रधूमेव्याप्याकांक्षयातदुपदर्शनप्रसंगोदुर्वारइत्याशयवर्णनेतदसत् तथापिस्व
मतेपितद्दोषस्यदुरुत्तरत्वात् पंचम्यर्थैकदेशेज्ञानेन्वयार्थधूमत्वावच्छिन्नविषयविशिष्टज्ञानान्वयेपिधूमेज्ञापक
ज्ञानविषयताबोधस्यदुर्वारत्वात् नचतथापिपंचमीप्रकृत्यर्थीनोपस्थितिविशेष्यत्वंयस्यतस्यैवव्याप्त्यादिकं
प्रदर्शनइतिनियमस्यस्वयमभ्युपगमान्नस्वमतेदर्शितप्रसंगइतिवाच्यं तत्रधूमादेर्ज्ञापकज्ञानविषयताबोधा
द्याकांक्षासंभवेनाहृशनियममननुसृत्यव्याप्याद्युपदर्शनस्यानपवादात् वस्तुतोलिंगज्ञानंप्रकृत्यर्थेपंचम

र्थे वांतर्भवतु भयस्या धूमज्ञानएव साध्यज्ञापकतावच्छेदकपर्याप्तावच्छेदकावच्छिन्नविषयतानिरूपितप्रकारताल
भ्यते सैवता स्वव्याप्यादिरिति वा ध्येयं अतो ननु तदाकांक्षेति धूमादित्यादिप्रयोगे धूमवत्तादाविव धूमज्ञानादिस्वरूपधूमादे
र्व्याप्यादेर्नोपदर्शनमिति मूलोक्तलक्षणापेक्षया लघूनि प्रतिज्ञाद्यवयवलक्षणानि स्वयमाह इतरान्वितेति प्रथ
मसत्यंतस्य हेतूपनयनिगमनसाधारणस्य उदाहरणव्यावर्तनं स्वयमेव दर्शयिष्यते प्रतिज्ञाहेत्वादित्यादिना इ
तरानिरितत्वं स्वभिन्नावयवार्थान्वितत्वं स्वभिन्नावयवघटकपदोपस्थापितार्थान्वितत्वं वा एवं च स्वेन एव सह
कारेण स्वांघटकपदसहकारेण वा बोधकत्वं समुदायार्थः तेनोदाहरणबोधस्य प्रविष्टसाध्यादेः प्रतिज्ञादिनान्व
बोधे इतरान्वितत्वेपि त्वनक्षतः द्वितीयसत्यंतानां तत्र मणिमन्याया वयवत्वमिति संबध्यते द्वितीयसत्यंतं च हेतूपनय
निगमनवारकं हेतुजन्येत स्मादित्येभ्यो भिद्यतइत्यादिनिगमनजन्यबोधे विभक्त्यर्थस्य विशेष्यतयाविवक्षणीयवि
भक्त्यंतपदार्थविशेष्यकत्वविरहात् वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमानित्याद्युपनयनिगमनजन्यबोधे वि
भक्त्यंतपदमध्येन्यभूतेदं पदमतनाद्येत्यपदार्थयोरेवविशेष्यतया अत्यभिन्नस्वीयपदार्थविशेष्यकत्वविरहात्
अत्यत्वे च स्वघटकपदेषु चरमत्वं उपनयादिस्थेदमादिपदानामपि न सामान्यमध्ये चरमत्वं तत्र त्र समण्यवाक्यघ
टकपदसत्वादित्यतः स्वघटकत्वं पदविशेषणं एवं च निगमघटकपदेषु चरमं तत्र अन्योपनयस्थेदं पदार्थविशेष्यकं बो
धमन्नुपनयसहकारेण जनको निगमने तादात्म्येन द्रव्यादिसाध्यकेरिदं द्रव्यं गुणकर्मान्यत्वे सति सत्वादित्यादौ स्वघ
टकविभक्त्यंतपदेषु यदत्यं सत्वादिपदं तदन्यविभक्त्यंतप्रतिज्ञास्थद्रव्यादिपदार्थविशेष्यकान्वयबोधजनको हेतावि
ति व्याप्तिवारणाय स्वीयत्वमंत्याभिन्नपदविशेषणं अत्र स्वत्वप्रकारेणालक्ष्यव्यक्तीनां निवेशो दननुगमइति प्रति
योगिनि स्वत्वेनिवेश्य लक्षणांतरमाह अंत्यपदवत्वइति अत्राप्युदाहरणवारकप्रथमसत्यंतमवगम्यते द्वितीयसत्यं

गदा॰
अ
49

नवैकल्पिकं सत्वं तद्वद्यं धूमादित्यादित्यादिहेतौ विभक्त्यंतात्पदाप्रसिद्ध्यापकपदमात्रघटिततत्पदसाधारणस्यांत्यत्वस
निर्वचनेप्यत्यभिन्नविभक्त्यंतस्वीयपदाप्रसिद्ध्या स्वपदेनांत्यस्यैवोपादेयतया स्वीयानंत्यतत्पदार्थविशेष्यकशाब्दबोधा
जनकं यज्जन्यतसत्वादतिव्याप्तिरतो त्यपदवत्वेसतीति अंत्यपदावत्वे च स्वघटकपदोत्तरपदाघटितत्वं यत्वं तत्स्वत्वे
नत्वस्वघटकपदोत्तरपदवत्वं लक्षीभूतप्रतिज्ञावाक्यांतर्गतस्वत्वेनोपादेयतयानुगमतादवस्थ्यात् अंत्यपदवत्तो हेतु
विशेषस्य उपनयनिगमनयोः तद्वतोः ह्यापानंत्यपदार्थविशेष्यकबोधाजनकयोस्तदन्यवाक्यान्त्यातिव्याप्तिः नचोपन
यघटकानंत्यपदार्थहेतुमदादिविशेष्यकबोधजनकतदेकदेशमतत्वेनादेस्तत्त्वहितसमुदायान्यकोपनया
दावसत्वात् तादृशबोधाजनकं स्वं नोपनयादिकमित्यतिव्याप्तिरितिवाच्यं तादृशबोधजनकत्वे याहशसमुदाया
वृत्तितादृशसमुदायवृत्तपदत्वभिन्नत्वनिवेशेनानतिप्रसंगात् उपनयाद्येकदेशावृत्तितादृशबोधजनकतायाश्चमाद्ये
तपदघटितसमुदायावृत्तितयातदंतपदासमुदायभिन्नत्वं च तद्भेदानुयोगितावच्छेदकावयवतावच्छेदकारूपवत्वे
अतः समुदायघटकप्रत्येकसत्वात्मभागेषु समुदायभेदसत्वेपि नातिप्रसंगात् ईदृशमेवरीतिस्वयं वांतरभेदघटि
तःलक्षणांतरेपि बोध्याः पृथिवीतरेभ्यो भिद्यतेइत्यादिनिगमने स्वघटकविभक्त्यंतपदस्यैव पदत्वधात्रपदेतर
व्याख्यातार्थविशेष्यकबोधजनकतयातिव्याप्तिः अतो भिन्नपदस्य विभक्त्यंततद्रूपतायविवरणीनवारयति पद
मितिनिगमनइतिनिगमनपदं निगमनविशेषपरं अंत्यपदपारीरवृत्ति मत्वद्रूपपदावाच्यनिवेशेन तु उपनयनिगम
नयोरेवापरं अंत्यपदपारीरवृत्ति न घटकमत एव पदयोरनेनतद्घटकविभक्तिमत्वेनान्यभिन्नत्वात् अतस्तत्रविभ
क्त्यंततदमेव निवेशमितिभावइति केचित् व्यावर्त्यते मन्नमन्नो वमंतयाहि स्थघटकविभक्त्यतयादमध्ये अंत्यमि
त्यस्य कोर्थः स्वघटकविभक्त्यंतपदप्रागभावासमानकालीनविभक्त्यंततपदमिति चेत् उपनयादिस्थेदंमदिपद

स्वविभक्तिरूपपदप्रागभावसमानकालीनतयातस्यां सत्त्वानिर्वाहाय प्रथमं विभक्त्यंतत्वं विशेषणमस्त्वेव ।
मविभक्त्यंतत्वे विशेषणमर्थकं तच्चोपवर्णमेवेति चेन्नहि । अन्नंतत्वं स्त्रीविभक्त्यंतपदप्रागभावसमानकालीनत्वं
पर्यवसितं भिन्नाभिन्नत्वनिवेशस्य वैयर्थ्यापत्तेः एवं च तस्याङ्गीक्रियत इत्यादिनिगमनस्याख्यातपदस्यानंसत्वमेव ना
स्तिकिमनेनेत्यपरे विभक्त्यंतत्वनिवेशनेनेति वस्तुतस्तत्रस्यानेतराणीत्यादौ निगमने विभक्त्यंते तत्र पदप्रागभावस
मानकालीननञ्समपदार्थविशेष्यकशाब्दबोधजनकेति व्याप्तिविलातलाणपदस्य विभक्त्यंतपदपरत्वावरिता
अथ नञ्पदस्यापि प्रातिपदिकत्वेन विभक्त्यंततया विभक्त्यंतत्वविशेषणेन द्वयोरेतानवत्तियत स्वविभक्तिप्रकृति
त्वेन स्वीक्रियते तदर्थेन विभक्त्यर्थेन च यातत्स्वरादुपधायार्थे वा नंसंधीयमान्नत्वमविभक्त्यर्थान्वयेन तादृशता
दृशान्वयोन्नत्वमेव विभक्तिस्वीकारस्यावश्यकत्वात् नञोऽलुवंतत्वेपि नवितिततत्पुरुषविधायकसूत्रसामर्थ्या
देवतेन सह समासो भविष्यतीति वाच्यं विभक्तेर्नियतार्थान्वितार्थबोधकत्वेपि निर्विभक्तिकप्रातिपदिकस्य
साधुतयासाधुत्वाय विभक्तेरावश्यकत्वात् नञोऽलुवंतत्वे ननञिति तत्पुरुषविधायकसूत्रसामर्थ्येन तेन ।
सह पदांतरस्यातत्पुरुषसामर्थ्येनेपि बहुव्रीह्यव्ययीभावयोरत्रोपपत्तेश्च एवं तत्वेपि समासाप्रविष्टप्रतियोगिप ।
दार्थान्वयप्रयोगेण नञोऽभावाबोधकतया तत्सापेक्षत्वेनासामर्थ्यान्न तेन सह द्वंद्व इति चेन्न सत्यं विभक्त्यंतत्वमवश्य
शाब्दबोधौपयिकविभक्तिप्रकृतित्वपर्यवसितो वाच्यो मानित्यादौ प्रतिज्ञास्य पर्वतादिपदोत्तरमविभक्तेरर्थविशेषणत्वप्रतीता
विरहेपि अभेदान्वयबोधाय प्रयोगस्यां कांक्षानिर्वाहकसमानविभक्तिकतासंपादकत्वेन शाब्दबोधोपयोगितानत्रनि
यतो नञ्त्वविभक्तेरिति नातिव्याप्तिः अथ यत्रादिशाब्देन यत्र प्रतिज्ञायां च घटभिन्नादिरूपपदनिर्देशस्तत्र न त्रादेर्निरुक्तावि
भक्त्यंतताविरहोपि विशेष्यीभूतविशिष्टपदबोधकाद्घटादिपदस्य ताद्रूप्याविभक्त्यंतत्वेन विवादितं रथ्यादिपदेत्र

गदा॰
श्र॰
50

प्रथमैकवचनाच्छ्रुतावपि द्विवचनादिश्रुतेर्दधिद्व्यमित्यादिप्रतिज्ञासंग्रहः इति तत्रापक्षवाचकस्वरादिपदघटित
प्रतिज्ञायामव्याप्तेर्निगमनवारणायेति इतरान्वितस्वार्थबोधकन्यायावयवत्वमात्रनिवेशेऽपनयार्थान्वितस्वा
र्थबोधकतया विगमनातिव्याप्तिः स्यात् तद्वारणायेत्यर्थः यद्यपीतरान्वितस्वार्थबोधकत्वं निगमनवत्प्रतिज्ञो
पनययोरपि तथापि विशेषणतयान्वितत्वनिवेशेनेन तद्वारणसंभवान्निगमनमात्रकथनं यद्यपि निगमनस्य तद्।
यार्थः पक्ष एवान्वेतीति साध्यान्वितस्वार्थबोधकत्वनिवेशेनापि प्रायशो निगमनवारणसंभवस्तथापि पक्षसा।
ध्यासम्प्रमेयत्वाभावादेरेव पक्षतानतत्र निगमनेऽतिव्याप्तिवारणाय पक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वि।
तत्वनिवेशनं पक्षान्वितत्वनिवेशनं पक्षान्वितस्वार्थबोधकत्वं पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितस्वा
र्थविषयताप्रयोजकत्वं यथाश्रुते उपनयस्यापक्षवाचके इदंपदस्य वह्निव्याप्याभेदेन पक्षसंसर्गो यः पक्षः तद्बो
धकत्वेन पाषाणमयः पर्वत इत्यादिवाक्यात् पाषाणमयत्वादिरूपेण पक्षतावच्छेदकावच्छिन्नसंसर्गतया।
प्रतीयमानो यः पक्षतावच्छेदकावच्छिन्नतद्बोधकत्वेन च तदुपस्थापितार्थान्वितस्वार्थबोधके निगमनेऽतिव्या
प्तेरवारणात् तादृशपदोपस्थापितार्थान्वितस्वार्थबोधकत्वं च तादृशपदप्रयोज्यविषयतानिरूपितस्वप्रयो
ज्यस्वार्थविषयताकत्वं यथाश्रुते निगमनार्थान्वयितत्पक्षतावच्छेदकावच्छिन्नस्य पर्वतो नीलपर्वत इत्या।
दिवाक्यस्य पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितविषयताप्रयोजकनीलपर्वतपदोपस्थाप्यत्वेन निगम।
नातिव्याप्तेर्दुर्वारत्वात् पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितायाविषयतातन्निरूपितविषयताप्रयोज
कत्वं फलितार्थः पक्षतावच्छेदकावच्छिन्नत्वानिवेशे व्याप्यवत्त्वावच्छिन्नायापक्षविषयतातन्निरूपितो।
पनयस्येदंपदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वमादाय निगमन एवातिव्याप्तिः स्यादिति।

तन्निवेशः अथ तन्निवेशेऽपि पक्षतावच्छेदकावच्छिन्नाया उपनयस्येदं प्रयोजकविषयतातन्निरूपितनिगमनार्थवि
षयतानिरूपितो या न पार्थविषयतैवेत्युपनेतिव्याप्तिः न च चरमविषयताप्रकारत्वरूपाविवक्षणीया यतो नाय
मतिप्रसंग इति वाच्यं एवं सति प्रमेयत्वमभिधाय प्रमेयत्वादित्यत्र पक्षतान्वितपंचम्यर्थे विशेष्यतयान्विते साध्य
रूपार्थमादाय प्रतिज्ञातिप्रसंगापत्तेः मेयत्वमभिधेयमित्याद्यग्रिमग्रन्थानुपपत्तेः एवं प्रमेयत्वमभिधेयं प्र
मेयत्वादित्यत्र प्रतिज्ञातिव्याप्तेः एकदेशार्थविषयताव्यावृत्तस्वार्थविषयतानिवेशेन वारणेऽपि तत्रत्यनिगम
नेऽभिधेयत्वव्याप्यप्रमेयत्ववाञ्चायमित्युपनयार्थप्रमेयत्वत्वरूपपक्षतावच्छेदकरूपहेतुतावच्छेदकावच्छि
न्नान्वितताद्रूप्यापक्षतावच्छेदकावच्छिन्नस्वार्थान्वयबोधकेति प्रसंगो दुर्वारः पक्षतावच्छेदकावच्छिन्नेत्यत्र वि
शेषणतयान्वितत्वनिवेशे प्रमेयत्वमित्याद्यग्रिमग्रन्थानुपपत्तेः पंचम्यर्थहेतुत्वस्याविशिष्टतयैव पक्षान्वयित्वे
न प्रतिज्ञातिव्याप्त्यापत्तेः विशेषणतया किंचिदन्वितत्वनिवेशेनैवोपपत्तेः एवं च पक्षनिवेशवैयर्थ्याया
त्तेश्च निगमनार्थस्य विशेषणतया किंचिदन्वितेन तत्रातिव्याप्तेस्तन्मानिवेशेनापि वारणसंभवात् शुद्धपक्षताव
च्छेदकावच्छिन्नान्वितत्वनिवेशप्रदर्शनातिप्रसंगस्यावारणासंभवात् उपनयार्थव्याप्यविशिष्टपक्षान्वयिनो
निगमनार्थस्य शुद्धपक्षतावच्छेदकावच्छिन्नान्वितार्थकपदोपस्थापितान्वितार्थकत्वविरहात् प्रमेयत्वमभि
धेयं प्रमेयत्वादित्यत्र व्याप्तिविशिष्टप्रमेयत्वात्मकपक्षतावच्छेदकावच्छिन्नपक्षस्य दृष्टसामर्थ्यान्वयेन तदन्वितार्थ
कोऽपि निगमने निरुक्तरूपविरहात् एतेन तत्साध्ययोरभेदस्थले निगमनार्थे घटकसाध्यरूपपक्षान्वितेदं पदार्था
न्वितार्थकतया निगमनातिव्याप्तेरपि नावकाशः यत्तद्रूपकविशेषणतया तादृशस्य यत्रापरविशेष्यता तत्र विशेष्य
त्वविशेषणतयात्मरूपविषयतयोर्भेदेन पक्षविषयतानिरूपितस्वार्थविषयतानिवेशो हेतुमात्रोपलक्षणतयानुपपत्तेः

पक्षविषयतानिरूपितस्वार्थविषयतानिवेशे हेतौ साध्यीयप्रकारतानिरूपितविषयताहेतुत्वप्रकारतायाः निरूप्य-
निरूपकभावविरहात् अतः पक्षविषयतानिरूपितविषयतावच्छिन्नविषयतानिरूपितस्वार्थविषयतैव निवे-
शनीया एवं चोक्तरीत्या पञ्चम्यां निव्याप्ते रनवकाशः पक्षविषयितानिरूपितनिगमनार्थनिष्ठप्रकारतानिरूपवि-
षयितापक्षविषयितानिरूपकतन्निष्ठविषयतायाश्च अभेदेनावच्छेद्यावच्छेदकभावविरहात् एवं क्रमेण पक्ष-
साध्ययोरभेदस्थले निगमनातिव्याप्तेरपि नावकाशः एवं हेतुपक्षयोरभेदस्थले निगमनातिव्याप्तिरप्यस-
म्भाविता हेतुप्रकारकज्ञानीयनिगमनार्थप्रकारतायाः स्वेदमर्थनिष्ठविशेष्यतानिरूपविषयतायाश्च अभेदेनाव-
च्छेद्यावच्छेदकभावविरहात् इति तत्र एकविशेषणतापन्नस्य यत्र विशेषणतानवच्छिन्नविशेष्यताप्रकारतयो-
रभेदबाधकविरहेणालाघवेन तस्यैवोपगमात् अवच्छेद्यावच्छेदकभावापन्नविषयताद्वयस्य यादृशैकावि-
शेष्यतापन्नस्य यत्रापरविशेष्यतास्थले प्रकारताविशेष्यतयोरभेदे दण्डि पुरुषवानिति बुद्धेः पुरुषादिनिष्ठ-
प्रकारतानिरूपितदण्डादिविशेष्यताशालित्वं तु वीरे मिति तस्याः पुरुषोनवा दण्डीत्यादिसंशयविरोधिताम-
सङ्गइति तन्न इदंः समूहालम्बनविषयतावैलक्षण्यापन्नयोरवच्छेदकभावस्यास्वीक्रियतइति मन्यते तदा
हेतुपक्षयोरभेदस्थले निगमनार्थधर्मितावच्छेदकाहेतुप्रकारतानिरूपितायाः निगमनार्थे प्रकारतानि-
रूपितायाश्च विशिष्टहेतुत्वावच्छिन्नायाः इदंपदार्थविशेष्यतायां पक्षे हेतौ हेतुधर्मितावच्छेदकतापत्तिरित्यवच्छे-
द्यावच्छेदकभावापन्नविषयताद्वयस्य स्वीकरणीयतया तत्र त्यानिगमनातिव्याप्तेर्दुर्वारत्वात् स्वार्थैकदेश-
स्यापि स्वार्थत्वाभिमानमूलां प्रतिज्ञाविशेषातिव्याप्तिशङ्कां स्वार्थपदस्य प्रतिपाद्यत्वपर्यायस्याधिकरणावि-
शिष्टार्थपरतापरिष्टयन निराकरोति प्रमेयत्वमितिन प्रतिज्ञार्थः साध्यविशिष्टपक्षरूपः पक्षदेशार्थमात्रः।

साध्यमात्रायद्यपिप्रमेयत्वमभिधेयं प्रमेयत्वादित्यादिन्यायांतनिगमनेहेतुभूतपक्षान्वितस्वार्थबोधकेदं
पदोपस्थापितपक्षान्वितस्वार्थबोधकत्वंनिगमनेऽस्तीतिविशेषणतयापक्षान्वितत्वंविवक्षणीयमि
तिकथितस्थलेपंचम्यर्थःपक्षेनविशेषणमित्यतोनोक्तप्रतिज्ञायामतिव्याप्तिसंभवः तथापिनिगमना
र्थैकदेशस्यलक्ष्यत्वात्तथागम्यतारूपार्थान्वितत्वयानिगमनेप्यतिप्रसंगवारणायस्वार्थपदस्यस्वप्रति
पाद्यविशिष्टार्थपरतायाआवश्यकत्वात्कथितस्थलेपंचम्यर्थान्वितास्वार्थबोधकत्वाभावेनाप्यतिव्या
प्तिवारणसंभवात्कथनंकेवलेनहेतुवाक्येनसपंचम्यर्थविशेष्यकावांतरवाक्यार्थबोधोजन्यतेतेनस्वप्र
तिज्ञास्यवह्न्यादिपरस्सहकारेणधूमज्ञानज्ञाप्योवह्निरित्याकारकस्वार्थविशिष्टबोधोजन्यतेतेनतःस
मुदितप्रतिज्ञासहकारेणपक्षेस्वार्थविशिष्टसाध्यवैशिष्ट्यबोधःप्रत्येकमेतादृशबोधत्रयजनकताव
च्छिन्नलक्षणत्रयमाह स्वार्थेति सविशिष्टविशिष्टेति स्वतात्पर्यविषयबोधीयविशेषणतावच्छेदक
स्वार्थबोधजनकन्यायावयवत्वमित्यर्थः तेननिगमनार्थान्वितोपनयार्थबोधस्यापिनिगमनार्थै
कदेशविशिष्टविशिष्टबोधतयानिगमनार्थबोधस्यतत्तज्जनकत्वेनयथाश्रुतलक्षणस्यनिगमनेतिव्या
प्तिरितिदूषणं प्रत्युक्तंविशेषणतावच्छेदकतायाअव्यावर्तकत्वात् स्वतात्पर्यविषयबोधीयत्वत
द्विशेषणविशिष्टबोधेति स्वतात्पर्यविषयबोधजनकतावच्छेदकस्वार्थप्रकारताशालिबोधजन
कन्यायावयवत्वमित्यर्थः तेननिगमनार्थविशिष्टोपनयार्थज्ञानस्यनिगमनार्थविषयकत्वेनता
दृशज्ञानस्यनुपयोगपत्वेपिननिगमनातिव्याप्तिः लक्षणत्रयेमवहेतोरगमयान्वयंवांतरात्
व्यावर्तयति एकवाक्यतायेत्यादिना इत्यस्योपस्थापितेतिस्वघटकपदोपस्थापितेत्यर्थः स्वार्थ

गदा०
श्र०

५८

त्वं स्वजन्यप्रतिपत्तिविशेष्यत्वमतो निगमनजन्यप्रतिपत्तिविशेष्यमनुमाप्यार्थे तत्र घटकपदोपस्थापित साध्य-
विशेषणकस्य निगमनस्य वारणाय उपस्थापितान्तं अत्र लक्षणे इतरार्थप्रकारकस्वार्थविषयताकत्वेन द्विती-
ये च स्वार्थांशे इतरप्रकारकत्वेन बोधस्य निवेशाद्भेदः अवयवार्थेति अवयवजन्यप्रतिपत्तिविशेष्यकस्वार्थप्र-
कारकबोधजनकावयवत्वमर्थः सर्वेषामेवावयवानां स्वार्थघटकविशेष्यांशे स्वार्थघटकार्थान्तरप्रका-
रकबोधजनकबोधजनकतया निव्याप्तिवारणाय स्वार्थप्रकारेति प्रतिज्ञार्थघटकसाध्यरूपविशेषणे हेत्व-
र्थस्यान्वयेपि विशेष्यपक्षेऽनन्वयात्प्रतिज्ञायां नोपनयलक्षणातिव्याप्तिर्न वा हेतौ निगमनलक्षणाति-
व्याप्तिः उपनयलक्षणे स्वार्थपदस्य निगमनलक्षणे चावयवार्थपदस्य विशेष्यपरत्वादित्यादि हेत्वर्थस्येत्या-
दिना उक्तप्रायमिति पूर्वं हेत्वर्थैकदेशपञ्चम्यर्थैकदेशमात्रान्वयित्वमुक्तं अत्र हेतुसमन्वयार्थस्य तथात्वमि-
ति विशेषात् प्रायमिति प्राहुर्निमः सामान्यवत्वे सति बाह्यकरणकप्रत्यक्षत्वादिति प्रयोगे हेतुघटकदलक-
दलयोः प्रत्येकव्यभिचारितया भेदेन नामार्थयोस्तयोरेकांशे परस्य विशेषणतयानन्वयेन च विशिष्टहेतुत्वा-
न्वयासम्भवेन विशेष्यविशेषणभावापन्नयोर्मिलितयोर्हेतुत्वान्वयोरेकांशे परस्य विशेषणतयानन्व-
येन च विशिष्टहेतुत्वान्वयासम्भवेन विशेष्यविशेषणभावादिति केषांचित् पूर्वपक्षसमाधानमुपन्यस्य नि-
मूले हेत्वर्थे सामान्यवत्वे इति सामान्यवत्वस्य बाह्यकरणकप्रत्यक्षत्वे विशेषणत्वासम्भवेपि सम्मतार्थं
सामान्यवत्त्वसामानाधिकरण्यस्य तत्र विशेषणतया तादृशविशेषणावच्छिन्नबाह्यकरणप्रत्यक्षत्वे विशेषणा-
त्वासम्भवान्न्यायार्थकतेत्याह तेनेति सामान्यवत्वस्य बाह्यकरणकाप्रत्यक्षत्वविशेषणो भवतु सामानाधि-
करण्यप्रतियोगितयोपस्थितत्वादित्यर्थः अथ सामानाधिकरण्ये सप्तम्याः अनुशासनात् कथमेतत्सतीत्यस्य

वाकोर्थ इति चेन्न यस्य चा भावलक्षणमिति सूत्रानुशिष्टया सप्तम्या गोषु दुह्यमानास्वागत इत्यादौ य
था गोदोहनादिसमानकालीनत्वमागमनादौ बोध्यते तथा प्रकृतेपि समानदेशत्वप्रत्यायनात् न च ना
दृशसप्तम्याः क्रियासमानकालीनत्ववत् क्रियासमानदेशत्वा स्वक्रियायां कदाचित्प्रत्यायनं संभवः ।
यस्य क्रियया प्रत्यक्षस्य क्रियालक्ष्यात्वे विशेष्यते यद्वाचकपदसमभिव्याहृतलट्तोपस्थापितक्रियासमा
नकालीनत्वादेरसंबंधेन क्रियान्तरविशेषणमिति यावत् तद्वाचकपदात्सप्तमीत्यर्थकत्वात् नादृ
शत्वस्य क्रियासमानकालीनत्वादौ क्रियान्तरविशेषणतयाविवक्षितेन तादृशसूत्रविवक्षितेन तादृशसूत्रेण
सप्तमीविधानान् सप्तमीप्रकृत्यर्थनिरूपितसामानाधिकरण्यादेः परमानार्थविशेषणतया विवक्षणे सप्त
म्यनुशासनात् तत्सामान्यवत्त्वसामानाधिकरण्यस्य प्रत्यक्षत्वेप्यतो लाभ इति वाच्यं यथा गोषु दुह्यमाना
स्वागत इत्यादौ गोपदोत्तरसप्तम्याः समभिव्याहृतक्रियागोदोहनरूपार्थः तत्र समभिव्याहृतलडं
तार्थविशेषितप्रकृत्यर्थस्य कर्मतानिरूपकत्वसंबंधेनान्वयः तस्याः समानकालीनत्वसंबंधेन क्रिया
न्तरेन्वय इति तत्र दुह्यमानगोकर्मकदोहनसमानकालीनत्वलाभः तथा प्रकृतेपि शत्प्रकृत्यर्था
तो राधारत्वादिरूपक्रियायां सामान्यवत्त्वस्य प्रकृत्यर्थस्य प्रतियोगितेनान्वयस्तिच घट इत्यादौ एतादृशनिष्ठा
धारत्वाप्रतीयोगी च घट इत्यादिप्रतीतेः तत्र चाधारत्वरूपक्रियायाः आधारतायाः प्रत्यक्षत्वे समानदेशत्वसंबंधे
नान्वय इति प्रत्यक्षत्वे सामानाधिकरण्यलाभसंभवात् भावलक्षणमिति भावशब्दस्य धर्ममात्रपरतया
प्रत्यक्षत्वास्य क्रियात्वविरहेपि सत इत्यध्याहारेण वा प्रत्यक्षत्वसत्वे सामान्यवत्त्वस्य समानदेशत्वलाभेन स्या
मंजस्यात् ऊत्रपरतया प्रत्यक्षत्वस्य क्रियात्वविरहेपि सत इत्याध्याहारेण वा प्रत्यक्षत्वसत्वे सामान्यवत्व

स्यसमानदेशत्वलाभेन सामंजस्यात् अत्र परतया प्रत्ययत्वस्य क्रियात्वविरहेऽपि मतद्वत्याध्याहारेण वा प्रत्ययत्
त्वसत्त्वे सामान्यवाच्यस्य समानदेशत्वलाभेन सामंजस्यात् अत्र चितसमानकालीनत्वे क्रियायाः संबंधात् अ
त्र चितसमानदेशत्वमित्यत्र किं नियामकमिति चेत् यत्र समभिव्याहृतयात्ययंस्यक्तातामानत्वे नात्वर्थे
तत्र च समानकालीनत्वं यत्र न च तद्विवक्षा तत्र समानदेशत्वं संबंधः इति नियमात् प्रकृते च वर्तमानत्वा
विवक्षितं न रुच्यायां समानदेशत्वलाभात् वर्तमानत्वाविवक्षायामपि विरोधिकालाविवक्षया लटः सा
धुत्वात् यत्र चातीतत्वामनागतत्वं वा कृताविवक्षितं तद्धास्त्वेवमध्यासितस्यादौ तत्र तद्वत्त्वं सर्वपद
त्वे संबंधाद्भूतिदोहनोत्तरत्वादिकमेव प्रतीयते न सामानकालीनत्वमित्यवधेयं ननु दाहरणे यत्पदं द्विरु
क्तिप्रयोजिकायां महानसत्वमहानसत्वमहानमान्यत्वादिना वह्निर्यावत्साधनाधिकरणप्रत्यापने च्छा
नुपवीप्सायाः किं प्रयोजनं अनुगमितिहेतुर्येन यत्पदवीप्सां विना यावद्धूमाधिकरणानुपस्थापनेन तत्पदेन
तावतामधिकरणानापरामर्शासंभवात् सकामसाधनाधिकरणे साध्यवत्त्वाप्रतीतेरनुमित्यनिर्वाहः
स्यादिति यत्पदात्तावदधिकरणबोधाय वीप्साप्रयोजनं भवेत् न च व्याप्तिप्रत्यापनेच्छाया वीप्सातः स्यात् अनु
त्रामिति यौपयिकबोध एव प्रयोजनमिति वाच्यं व्याप्तेः स्वयच्छाव्यार्थत्वविरहेण तत्प्रापनेच्छायामपि प्राव
तत्यत्ययस्यायोगात् मानसबोधे वक्तुरभिप्रायानुपयोगात् यदि च सदसमभिव्याहृतवह्न्यादिपदे
स्य धूमव्यापकतावच्छिन्नवह्न्यादिलाक्षणिकतया धूमादौ वह्निव्याप्तिलाभ इत्युच्यते तदा यत्पदद्वि
रुक्तिविनापि तल्लाभसंभवात् तद्विरुक्तिवैयर्थ्यमित्यापत्तेरन्याचो न समाधानमुपपन्नं स्यादिति अत्र चेति उदा
हरणस्य यत्पदे चेत्यर्थः व्यभिचारवारणाय ते तिवीप्सामुद्देश्य मानस व्याप्तिज्ञानविरोधिव्यभिचारेण प्रयो

जिका माहेत्यर्थः यावद्धेत्वधिकरणे साध्यवत्वनिश्चयमेतेन विपरीतनिश्चयात्मकेन साधनाधिकर
णे साध्याभाववत्वरूपव्यभिचारग्रहस्य प्रतिबंधकतेति भावः नन्वेवं वाच्यत्वादि साध्यस्य यत्रोपाया
नरात्केवलान्वयित्वे गृहीते अयमेतदभिन्नः एतद्धूमि यावद्धर्मवत्वादित्यत्र च हेतो एकमात्रवृत्तित्वे
गृहीते अयमेतदभिन्नः एतद्वृत्ति यावद्धर्मवत्वादित्यत्र च हेतौ तत्र हेतौ साध्यसामानाधिकरण्यग्रहा
देव मानसो व्याप्तिधीः संभवति प्रथमे अभावे साध्यीयत्वाग्रहणाद्द्वितीये साध्याभाववत्तया गृह्यमाणेऽधि
करणे व्यभिचारग्रहासंभवादित्युभयसिद्धव्याप्तिकासाधकतानुमाने यथा उदाहरणं न प्रसज्यते ।
तथा तत्र समानाधिकरण्यलाभायोदाहरणप्रयोगेऽपि द्वितीयेत्यादेन प्रसज्येतेत्यत्रेष्टापत्तिमाह एवेति
सर्वत्रैव हि तत्र तीयेत्यत्रेति त्वमत आह वीप्सायमपीति आपमापायः द्वितीयप्रयोगेऽपि सकलसाधनाधि
करणपरत्वाग्रहे व्यभिचारतादवस्थ्याद्व्यभिचारधियोऽनिवृत्तितन्मयवत्वग्रहापेक्षायां च प्रयोगप्राप्त्यभ्या
साधननिष्ठव्याप्तितात्पर्यमेव गम्यतां तत एव च लक्षणया व्याप्तिप्रतिबोधसंभवात् तत्र व्यभिचारशंका
याश्चाविरोधित्वात् यावत्साधनवृत्ति साध्यवत्वबोधाय द्विवचनमनर्थकमेव अत एव यत्रैव तत्रैवमिति
माचार्योदाहरणोपदर्शनमपि संगच्छते: अवयवप्राकट्ये व्याप्तेः शाब्दबोधः समानप्रकारतामप्युदस्थात्यवि
परीतधियो विनाशाद्धस्याल्पतया महानसत्वादिना सकलधूमाधिकरणे साध्यवत्वाबोधेऽपि धूमवत्वप्र
कारेण तत्र तत्रैव साध्याभावप्रकारकयाश्रान्तच्छेदेन मानसव्याप्तिग्रहासंभवात् एवमपि हि तत्र तत्रापि पन्त्य
देनैकरूपेण विभिन्नरूपेण सकलधूमाद्यधिकरणोपस्थितिसंभवात् तदर्थकतयापि तत्र सार्थकमः
धिरुद्धटः न च समष्ट्युपस्थितिरित्यादिप्रत्यन्निविरोधादेकसाध्यपदान्वयानेकाधिकरणबोधः संभवातीतिवा

गदा.
ग्र
54

च्ये सकृदुच्चरितस्य नानाशक्त्याबोधकतायामेवाभ्युपगमेः सर्वनाम्नश्च बुद्धिस्थतावच्छेदकत्वोपलक्षितधर्मा
वच्छिन्नत्वेन वा नानाधर्मिणामनुगमात् नानार्थेषु शक्तेरैक्येन व्युत्पत्त्यन्तरविरोधात् अन्यथा द्विरुक्ते स्थले एकपदस्यै
व पदद्वयत्वापादनेनास्थानितया पदभेदाविरहेणा द्विरुक्तादपि नानार्थबोधानुपपत्तेः कथंचिदर्थद्वयबोधनि-
र्वाहेऽपि भूयार्थबोधस्य निर्वाहयितुमशक्यत्वाच्चेति यथा द्विरुक्तस्थलस्यैव व्याप्त्येनिरुक्तलक्षणस्त
एव यत्पदमयोगेऽपि न वाक्ये त्वारसिकलक्षणाविरहेणा व्याप्तिबोधानिर्वाहः कार्त्स्न्येन व्याप्तिगोचरया
प्राह्बोधानुरोधेन चेदुदाहरणप्रयोगस्तदा तदुपनयवद्व्याप्यप्राहेनैवोदाहरणेऽपि व्याप्तिबोधनं प्रकल्प्यते
निखिलधूमाधिकरणे साध्यवत्त्वबोधनाय यो यो धूमवानित्युदाहरणादृश्ये च यत्पदस्य सकलधूमाधिकरण
परमार्थावस्थापकतया अद्विरुक्तयत्पदस्य तत्परत्वानियमेन तत्परत्वग्रहार्थं द्विरुक्तेरावश्यकता एवं नित्य
वीप्सयोरिति सहचरेणा द्विरुक्तिविधानस्यानित्यतया सकृत्तधूमादधिकरणपरत्वे यत्पदस्याद्विरुक्तस्य साध्य-
त्वमेव न स्यादित्यतो द्विरुक्तेरावश्यकतादृत्याशयेन यत्पदे द्विरुक्तिमभ्युपेत्य तत्पदे द्विरुक्तिं खण्डयति वीप्स-
त्वेनि द्विरुक्तिनियमोऽपि कदाचित् यत्पदस्यैव न तु तत्पदे इत्याशयः सर्वत्रैव

दृष्टांतेशशेस्ववह्निनिष्ठदाहजनकतायामवच्छेदकत्वेनदाहानुकूलतयापक्षेसाध्यवत्त्वनिर्वाहित्वा
हः तत्रसामान्यमुखव्याप्त्यादेरेवत्वेनतत्वा नतुगमेनव्याप्तिमूढस्यैवप्रकृतानुमानोपयोगितयावच्छे
दिंद्रियाग्रस्यतत्वस्यघटनजनकेघटनानुकूलगुरुत्ववतिचासत्वेपिगुरुत्वाद्यनुकूलातोद्रियधर्मरू
पसाध्यव्यापकतयाशरीरादोग्रस्वादिजनकत्वरूपसाधनाव्यापकतयाचस्पर्शादिघटितसाध्यक
व्याप्तिविघटकतायाउद्बोधनतयाग्रंथाविरोधनिर्वाहादेतद्ग्रन्थासंगतेः अन्यथावह्निस्थितिस्थापको
पगमपक्षेस्वसमानाधिकरणीत्यालक्षणपरिष्कारेयुगुरुत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वेनवह्नि
रिन्द्रियाग्रस्यतत्वस्योपाधित्वसमर्थनेनोपपद्यतेतेजस्विगुरुजत्वावच्छिन्नक्रियानुकूलस्थितिस्था
पकरूपसाध्यसत्वेननाहृश्यसाध्याव्यापकत्वात् वह्निकार्यदाहानुकूलोऽदृष्टचदाममंयोगेनसि
द्धिसाधनकारणायाहिष्टत्वंविशेषणेदाहानुकूलोऽस्पर्शेनासिद्धिसाध्यनकारणायातोद्रिये
ति उक्तरूपाभावात् साध्यसाधनसंबंधव्यापकत्वाभावात् नतुपक्षावृतित्वसतिपक्षधर्मावच्छि
न्नसाध्यव्यापकत्वमिति सम्प्रतिपन्नोन्नायकत्वेनदूषकत्वावादिनामुपाधिलक्षणमितिप्रायेणनदु
घसंगतिः व्यभिचारोन्नायकत्वेनदूषकतावादिनांचैतल्लक्षणंतन्मतेचदर्शितोपाधीनांमलक्ष्ये
त्वनग्राह दूषकत्वेतिदूषकताबीजस्यव्यभिचारोन्नायकत्वस्यसत्वेननतन्मतेव्यलक्ष्यत्वायोगात् १
यद्धर्मावच्छिन्नेति:वच्छिन्नत्वंविशिष्टत्वंमहानसत्वादिविशिष्टत्वादिव्यापकधूमजनकत्वादेः नहि
शिष्टधूमादिकंप्रत्यपिव्यापकत्वानातिप्रसंगः नत्वेवंरूपवान्पृथिवीत्वादित्यत्रतद्रूपवत्त्वादन्यत्व
मुपाधिस्यात् आधेयतासंबंधेनपक्षतद्घटोत्पत्तिक्षणाविशिष्टस्याश्रयतासंबंधेनपक्षतद्घटोत्पत्तिर

णविशिष्टस्याश्रयतासंबंधेनएतद्घटान्यतिवृत्तित्वविशिष्टस्यवारूपस्यएतद्घटेः संबन्धेनतद्वि
शिष्टरूपंप्रतिएतद्घटान्यत्वस्यव्यापकत्वात् नाद्यविशेषणविशिष्टस्यपृथिवीत्वस्यतद्घटेपि
संबन्धेनतद्विशिष्टमपिपृथिवीत्वंप्रतितस्याव्यापकत्वादिति प्रगल्भोक्तदूषणोद्धारायमिश्रसमाधान
मुपन्यस्यति अवच्छेदकत्वंचेति अवच्छेदकत्वंविशेषणत्वंसमानाधिकरण्येनेतिनयावत्समानाधि
करणसंबंधेनयद्धर्मविशिष्टसाध्यव्यापकत्वंतेनसंबंधेनतद्धर्मविशिष्टसाधनाव्यापकत्वमित्य
र्थः तावतानतदोषइतिस्फुटयति नचेतिनहीत्यर्थः एतद्घटान्यत्रिकालीनत्वसमानाधिकरण
विशिष्टरूपवतीतिसमानाधिकरणसंबंधेनएतद्घटान्यत्रिवृत्तित्वविशिष्टरूपवानित्यर्थः
नचउत्पत्तिवृत्तित्वविशिष्टस्यघटोत्पत्तिक्षणएवसत्वात् रूपस्यतदानीमसत्वात् सर्वेष्वेववि
शेषणविशेष्ययोरेककालेतयोर्भावसत्वाद्विशिष्टाभावइतिनेनतद्घटस्यविशिष्टरूपवत्वमितिवाच्यं एक
क्षणावच्छिन्नत्वाविशेषितसमानाधिकरणसंबंधेनएकविशिष्टापराधिकरणतायाभिन्नका
लावच्छेदेनविशेषणविशेष्योभयवत्वात्तिरस्कारात् विवेचनेयमिदमत्र: अथवासामानाधिक
रण्येनावच्छेदकत्वमित्यस्यसामानाधिकरण्यविशेषणेनयाधर्मोस्यावच्छेदकत्वंविवक्षणीयमि
त्यर्थः एवंचयद्धर्मसमानाधिकरण्यविशिष्टसाध्यव्यापकत्वंतद्धर्मसामानाधिकरण्यविशिष्टसाध
नव्यापकत्वमित्यर्थः इत्थंचसमानाधिकरणविशिष्टरूपवतीतिलिखनमपिययाश्रुतमेवसंग
च्छते तथाचयद्धर्मसमानाधिकरण्येनयत्रयद्धर्मोपलक्षितधर्मिवृत्तित्वमेवविवक्षितमित्येतद्घ
टान्यत्रिक्षणवृत्तित्वोपलक्षितधर्मिवृत्तित्वविशिष्टरूपवत्वमेतद्घटेप्यक्षतमितिनातद्विशिष्ट

पव्यापकत्वमेतद्घटान्यन्तरत्वेनातिव्याप्तिः तद्व्यापकमित्युक्तविशेषणविशिष्टरूपव्यापकमित्यर्थः
धर्मस्याननुगतत्वात्तत्ताद्रूप्यप्रवेशे पक्षस्याप्युपाधिस्यादिष्टनानाधर्मभेदेनुपाधित्वं विघटनमिति स्वय
मन्यत् सद्धेतुस्थलीयसाध्यसाधनाधिकरणव्यावृत्तलक्षणमाह स्वानधिकरणीभूतेति संस्कुपाधि
त्वेनाभिमतधर्मः सद्धेतौ व्यंजनवत्वाद्यनधिकरणसाधनाधिकरणवृत्तियद्धर्मावच्छिन्नसाध्यस्यानद्न
धिकरणतत्साधनाधिकरणे ऽवच्छेदकसत्वाद्यतत्वस्यतादृशधर्मावच्छिन्नसाध्यव्यापकतासंभवदिति ना
पन्यासाया निर्बीजत्वात् तदुद्भावकं उपाध्युद्भावकं पराभवतः निग्रहतः नन्वेवमुपाधिः किमुद्भाव्यमेवेत्या
कांक्षायामाह तस्मादिति तत्र शुद्धसाध्यव्यभिचारस्य किंचिन्तायो साधकाकांक्षायां तद्धेतुत्वेन शुद्धहेतौ वे
न शुद्धसाध्यव्यापकोपाधिव्यभिचार उद्भाव्य इत्युपपद्यते एवं शुद्धस्यापि व्यभिचारादेः संबंधता विर
हे प्राधान्येनोपाधिनोद्भाव्यत एवेति ध्वनितं अवच्छिन्नायकोपन्यासाया निर्बीजत्वात् तदुद्भावकं उपा
ध्युद्भावकं पराभवतः निग्रहतः नन्वेवमुपाधिः किमुद्भाव्यमेवेत्याकांक्षायामाह तस्मादिति त
त्र शुद्धसाध्यव्यभिचारित्वेन तयोः साधकाकांक्षायां तद्धेतुत्वेन शुद्धहेतुत्वेन शुद्धसाध्यव्यापकोपा
धिव्यभिचार उद्भाव इत्युपपद्यते एवं शुद्धस्यापि व्यभिचारादेः संबन्धताविरहे प्राधान्येनोपाधिनोद्भा
व्यत एवेति ध्वनितं अवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारस्य विशेषणांतरानवच्छिन्नस्य शुद्धसाध्य
व्यभिचारसाधकत्वेऽपि विशेषणांतरविशिष्टतया तदुद्भावनमपि प्रथमतः संभवतीत्याह विशेषणे
ति पक्षधर्मताबलात् शुद्धसाध्यव्यभिचारसिद्धिसंभवेऽपि विशेषणांतरानवच्छिन्नविशिष्टसाध्यव्या ॐ.
पकोपाधिव्यभिचारे शुद्धसाध्यघटकतया निश्चितपाकपाकजन्यत्वादौ साधनाव्यापकताव्यवच्छेद।

७०

कत्वसंशये सतीत्यर्थः साध्यव्यापकत्वव्यभिचारसंशयात् स्वस्मिन्नतद्व्यापकत्वस्य तस्मिन्साभाववद्वृत्ति
त्वेन तत्स्वविशिष्टविषयतया साधने साध्यव्यापकतावच्छेदकत्वसंशये सतीत्यर्थः साध्यव्यापकत्वव्यभिचार
संशयात् स्वस्मिन्नतद्व्यापकस्य तस्मिन्साभाववद्वृत्तित्वेन तत्स्वविशिष्टविषयतया साधने साध्यव्यापक
तावच्छेदकावच्छिन्नभाववद्वृत्तित्वसंशयपर्यवसानात् स्फुटमेवेति व्यापकत्वव्यभिचारव्याप्यत्वादिति
भावः साध्यव्यापकत्वसंदेहे हेत्विति साधनाव्यापकतावच्छेदकत्वनिश्चयविषयधर्मे साध्यव्यापक
तावच्छेदकत्वसंशये त्वित्यर्थः साधनाव्यापकव्याप्यत्वसंशयादिति व्यापकत्वव्याप्यतया तत्स्ववि
शिष्टविषयतया साध्यतावच्छेदकसाधनाव्यापकतावच्छेदकावच्छिन्नव्याप्यतावच्छेदकत्वरूपसाधनाव्या
पकत्वव्याप्यधर्मे संशयादित्यर्थः साध्ये साध्यतावच्छेदके साधनाव्यापकतावच्छेदकत्वरूपव्यभिचा
रस्य निश्चिततत्वेन संयोगाद्यंशे योगात्तत्र संशयाधीनसाध्याभावमभिप्रायेणेति उपाधिव्यतिरेकहेतुने
तिशेषः सत्प्रतिपक्षत्वसाध्याभावसाधने असाधारणफलस्यान्वयव्याप्त्यग्रहस्यादि विकल्पत्वेपिस
त्प्रतिपक्षप्रयोजकतया असाधारण्यदोषेण्यत्वनग्राह्य सत्प्रतिपक्षइति सत्प्रतिपक्षोव्यापकतयेत्यर्थः
अदोषत्वात् प्रमाणाभावेनान्यथासिद्धिमिति असाधारणविपर्ययस्य प्रसिद्धानुमानीयपर्वतेनत्वत्वादेस्ताद्रूप्य
प्रमाणाभावेन दूषकत्वात् उपाध्याभासत्वेनान्यथासिद्धत्वे व्यभिचारेणाव्यापकत्वव्याप्यतत्वकाशः नत्रा
पि व्यापकतानिश्चयस्य निपेतनत्वात्तथापि असाधारणविपर्ययेपतैयेवापार्थ्यभोनेति यथाश्रुताभि
प्रायेन सत्प्रतिपक्षोन्नायकत्वाभिप्रायेणेति प्रथमपुस्तके उपाधेराभासतावीजं सर्वसाधारणं निर्वक्ति तद
यमित्यादिना दूषणत्वमुपाधेरिति उपाधिउद्भावयतोऽभिमतमितिशेषः एवंसतिपक्षव्यापकविपर्य

गदा॰ ५३ 71

यस्य यत्साध्याभावत्वसंयुक्तं न तदपि न सार्वत्रिकमित्याह एवं चेति समानाधिकरण्येन समानाधिकरण्ये
मात्रेणाभासत्वमिति अदृष्टकत्वादिविशेष अदृष्टकत्वमेव वह्न्येकदेशमात्रनिष्ठेपि पक्षतावच्छे
दकसामानाधिकरण्यमात्रेण साध्याभावव्याप्यत्वज्ञानासंपादनेपि तादृशोपाधिव्यतिरेकस्य पक्षता
वच्छेदनेत्रमानतया तदवच्छेदेन साध्याभावव्याप्यवत्ताज्ञानासंपादकत्वादिकमिति भावः पक्षैक
देशांतरवृत्तिपक्षतावच्छेदकसमानाधिकरण्यमात्रेणेत्यर्थः उपाधित्वमेव न तु न दाभासत्वं दूषकत्वा
दितिशेषः तदेवदनन्तर्गीयत निपक्षदेशाद्वृत्तिना दृशासिद्धिविरोधित्वात् अवच्छेदकावच्छेदेनानुमित्या
विरोधितत्वात् अप्रसिद्धसाध्यविपर्ययदृश्यत्वात् कसिद्धपदस्यानुदानीं तदानीं वा ... मानत्वात् येक(
त्वाश्रमनिराकरणाय साध्यविन्नसाध्यव्यापकोपाधिव्यभिचारस्य विशेषणं [illegible] सक
ध्यव्यभिचारसाधकत्वेपि विशेषणांतर विशिष्टतयानुद्भावनमपि प्रथमतः संभवतीत्याह विशेष
णेति अविशिष्टेनापि विशिष्टसाध्यव्यापिकव्यभिचारेण विशिष्टसाध्यव्यभिचारसिद्ध्यनिष्पत्तयसं
तावलात् शुद्धसाध्यव्यभिचारसिद्धिसंभवेपि विशेषणांतरानवच्छिन्नविशिष्टसाध्यव्यापकोपाधि
व्यभिचारे शुद्धसाध्यव्यभिचारत्वावच्छिन्नस्य साधकतया उपाधेस्तत्तादृशावच्छिन्नसिद्धोपाधिकत्तादृशा
वच्छिन्ननिरूपितव्याप्तेस्तादृशोपाधिदेनावाकोतेदयात् तस्याश्च तादृशहेतोवाधेनोद्भावनासंभ
वात् सत्त्वं तविशेषितस्यैवोद्भावनत्वं तु उक्तं तादृशाविशेषणविशेषितेन तादृशोपाधिव्यभिचारेणैव
तथाविशिष्टविधेन साध्यव्यभिचारेणापि शुद्धसाध्यव्यभिचारसाधनसंभवात् तस्याश्चोद्भावनत्वमुक्तं
तादृशाविशेषणविशेषितेन तादृशोपाधिव्यभिचारेणैव तथाविधेन विशिष्टसाध्यविभिचारेणापि मं.

५६

शुद्धसाध्यव्यभिचारसाधनसंभवात्तस्याप्युद्भावनीयतामाह विशिष्टसाध्यस्यैवेति । यापि सत्वं तम
नुपधत्ते वाकारो व्यवस्थितविकल्पार्थः अत्र च विशेष्य इति उपलक्षणस्य विशेषणस्य व्यभिचारविशि
ष्टस्य विशिष्टसाध्यव्यभिचारस्य च दुष्टत्वे विशिष्टसाध्यव्यभिचार इत्यर्थः व्यभिचारव्याप्यत्व विशिष्टव्य
भिचारहेत्वाभासान्तर्भावान्नाह दृष्टस्योपाधिव्यभिचारस्य प्रथममुद्भावनेपिनाप्रसकालेतत्याह व
त्वेनेचेति व्याप्त्यादिग्रहप्रतिबन्धकमिति साक्षादित्यादिः तथा च तद्व्याप्यवत्वमपि हेत्वाभास इति भा
वः नत्पक्षेतरत्वे व्यापकताग्राहकतर्काभावेन साध्यव्यापकतानिश्चयाभावात्तस्य दूषकत्वमिति मूः
लोक्तं न संगच्छते नन्वशुद्धसाध्यव्यापकत्वानिश्चयस्यावच्छिन्नसाध्यव्यापकोपाधिसाधारणतयाद्दू
षकत्वाप्रयोजकत्वात् किं विशिष्टसाध्यव्यापकतायाः पक्षेतरत्वेपि निश्चयसंभवादित्याशंक्य
साध्यव्यापकत्वानिश्चयादिति व्याचष्टे उपाधितौपयिकेति उपाधितौपयिकस्य तस्यानिश्चयादित्य
र्थः उपाधितौपयिकं च साध्यव्यापकत्वं पूर्वेनिरुक्तं पक्षावच्छिन्नसाधनाव्यापकत्वेन तदवच्छिन्न
साध्यव्यापकत्वरूपं सहेतौ च पक्षेतरत्वेन तन्निश्चयसंभवस्तदसत्वादिति भावः ननु तत्र तर्हि व्या
पकतायाश्च सतेपि तर्कोभासात्तद्वतः सिद्धव्यभिचाराग्रहाद्वा तन्निश्चयः संभवत्येवेत्यत आह अनु
कूलतर्कादिनेति नाहृशेति उपाधितौपयिकेत्यर्थः बाधोन्नीतवत् वन्हिरनुष्ण इत्यादिस्थलीयव
न्हीतरत्वादिवन्निश्चितोपाधिः व्यभिचारनिश्चयाधायकतया अनुमानविरोधी अयं च बाधोन्नीत
पक्षेतरो नोपाधिः न दूषकः किंतु नस्तत्र दूषकताप्रयोजकं सव्याप्याव्याघातकत्वं सर्वोनुमानसाधा
रणं सर्वत्रैवानुमाने पक्षेतरत्वस्य साध्यव्यापकतानिश्चयसंभवेन दूषकताप्रसक्तेः स्वपदस्यानुमा ।

गदा॰
५४
72

नसामान्यपरतयाऽदूषणं सर्वानुमानसाधारण्यस्य स्वव्याघातकत्वरूपतानिश्चितव्याप्तिवद् इति प्रथम
तोहेतौ व्याप्तिनिश्चये सतीत्यर्थः तदभावान्पक्षेतरत्वे साध्यव्यापकत्वज्ञानेन प्रतिबंधात् साध्यव्या
पकतानिश्चयाघातकत्वसंभवात् स्वपदस्य स्वव्यभिचारे हेतुकव्यभिचारानुमानार्थकतयाऽन्यादृ
शं स्वव्याघातकत्वपदार्थं निराकरोति नापीति तद्व्यभिचारेणोपाधित्वसंभवः दूषकताप्रसक्तिः
तस्य पक्षेतरस्य व्यापकव्यभिचारिणि व्यापकतायाः ग्रहे न स्यात् स्वव्यभिचारिणि व्याप्येति व्यापकस्य व्या
पकतायाः ग्रहे तस्य साध्यस्य व्यभिचारावश्यंभावनिश्चयेनेत्यर्थः पक्षेतरो यदि साध्यव्यभिचारप्रतियो
व्याप्यव्यभिचारप्रतियोगी न स्यात् साध्यव्यापको न स्यात् पक्षेतरव्यभिचारो यदि साध्यव्यभिचारव्या
प्यो न स्यात् तद्व्यापकस्य व्यभिचारो न स्यादिति तर्केण पक्षेतरव्यभिचारस्य साध्यव्यभिचारव्याप्य
तया निश्चयेनेति यावत् तद्योगाद्व्यभिचारानुमाने साधनरूपपक्षेतरस्य दूषकत्वायोगात् हेतुत्वस्यो
पाधित्वं तद्व्याघातकत्वमित्यर्थं दूषयति अत एवेति यत एव पक्षेतरत्वस्यानुकूलतर्कादिना सा
ध्यव्यापकताग्रहस्तत्रोन्नयन्नातद्व्यभिचारेण साध्यव्यभिचारसिद्धेरनपवादत्वात् पक्षेतरस्य क्वापि
दूषकत्वसंभवेऽप्युपाधितयाः उद्भावनेवास्यानुपयतामतआह कथकेति अत्र कथकसंप्रदाय
मनुरुध्यानस्य न तदुद्भावने निर्वारमेवेत्यर्थः पर्वतावयववृत्त्यन्यत्वाद्वृत्त्यन्तस्य भेदविशेषण
स्य पक्षभिन्नमपि व्यावर्त्यमस्तीति मूलोक्तस्य पक्षमात्रव्यावर्त्यकविशेषणत्वादिति तदनुपाधित्वप्र
योजकहेतोरसंगतिमाशंक्य यद्यपीति नोपाधितायामुपयुज्यतेऽत उपाधेः संकोचनेन तद्घटितत्वेन
प्रविष्टसाधनाव्यापकत्वसंपादकतयोपाधिताया उपयुज्यते न स्वव्यापकत्वसंपादकताव तदपि

कारणाद्युपाधिव्याहृतिरेव न तु तदनधिकरणपर्वतो व्यावृत्तधूमादिव्याहृतिरिति भावः पक्षस्येवेति
व्याहृतिरूपोपाधितायाश्च पक्ष इत्यनेन पक्षस्य साध्यवत्त्वादिति भावः इति इत्यभिप्रायेणोक्तमिति मात्रप
पदेन उपाधितापूर्विकपरिभिन्नव्याहृतिप्रयोजकताया विशेषणव्यवच्छेद्यान्यत्वेन भिन्नतदेव पक्ष
रूपादिव्यावर्तकत्वेऽप्युक्तविशेषणोक्तव्याहृतिविशेषणप्रयोजकत्वाभावस्यानन्तरमथ्यामात्रार्थे
संगतेरिति भावः अनुपाधितायामदूषकतायां न बीजं न प्रयोजकं परिभाषितेनाह सा विशेष
णवत्वेऽपि साध्यव्यापकत्वादिग्रहे दूषकताया उ निवारत्वादिति भावः इष्टत्वं अनुपाधित्वबी
जनतया केचित्पक्षमात्रव्यावर्तकं विशेषणं यस्य पदेनेत्यस्य तद्व्यावर्तकत्वान्नत्वस्यत्वादिति वि
शेषणवत्वादिति नाह सार्थकवतिप्रत्ययबलान्मूलस्यार्थः पदेनेत्यत्र तावद्व्यापकताग्राह
कानुकूलतर्कसाहित्येन तथा च दीधितिकारोक्ताहृदूषकताबीजं एवं मूलस्य तात्पर्यमिति वदं
ति अतएवेति मूलस्याव्यवहितोक्तपदेनेत्यादौ उपाधित्वोपष्टंभपरत्वासंभवादनुपाधित्वप्र
योजकाभावप्रतियोगितयाभिमतेनानुकूलतर्केसंभवोपष्टंभपरमाह व्यापकताग्राहकेति प्रमा
णपदं प्रमाणसहकारितर्कपरं कारणतावगमेनेत्यत्र सम्मूलस्य उपाधितावच्छेदकावच्छिन्नस्य
कारणतानिश्चयेनेत्यभिमानेन आर्द्रेन्धनप्रभववह्नित्वेन धूमाकारणतया तेन रूपेण उपाधित्वा
नुपपत्त्याशंकते अथेति स्वतंत्रान्वयकव्यतिरेकाभ्यामिति आर्द्रेन्धनस्य वह्नेः सहधूमेनान्वयव्यति
रेकयोर्धूमान्वयव्यतिरेकप्रयोजकत्वदर्शनेनेत्यर्थः प्रकृतमिति यद्यपि आर्द्रेन्धनप्रभववह्नित्वेन
कारणत्वेऽपि नाहस्यान्वयव्यतिरेकोपपत्तिः न चैतेन रूपेण कारणत्वमार्द्रेन्धनप्रभववह्नेः सत्त्वेऽप्या

गदा
९५
73

ईंधनविरहे धूमविरहो नोपपद्यत इति वाच्यं कार्य्यतावच्छेदकविशिष्टस्याकस्मिकतायाः प्रकृते का
र्य्योपधानप्रयोजकत्वोपगमेनाऽकारणस्याप्यार्द्रेंधनस्य कारणानवच्छेदकतयानुभावेन धूमाभा
वोपपत्तेः तथापि आर्द्रेंधनप्रभववह्नित्वेन कारणत्वेऽन्वयोपधायकार्द्रेंधनत्वेनापि कारणत्वमवि
निगमनाविरहात्स्यात् एवमार्द्रेंधनप्रभवत्ववह्नित्वयोरेकविशिष्टत्वेनापरस्य जनकतावच्छे
दकत्वं वाच्यं विशिष्टस्यातिप्रसक्ततया जनकतावच्छेदकत्वासंभवात्तथा च तयोर्विशेष्यविशेषण
भावे विनिगमनाविरह इति प्रत्येकमेव कारणत्वमन्यथा घटादावपि चक्रविशिष्टदंडत्वादिना हेतु
ताप्रसंगात् नैवं आर्द्रेंधनस्य शुष्केंधनजन्यमात्रवह्नेस्सत्त्वे धूमोत्पत्तिप्रसंगादिति वाच्यं प्रत्येकरू
पेण स्वरूपयोग्यत्वेपि आर्द्रेंधनवह्न्योर्जन्यजनकभावसंबंधरूपप्रत्यासत्तेः फलोपधाने तंत्रतया
आर्द्रेंधनप्रभववह्नित्वस्यैव धूमोपदायकतावच्छेदकत्वात् अत एव दंडत्वचक्रत्वादिना पृथक् घट
दिकार्य्यस्वरूपयोग्यत्वेपि चक्रादिविशिष्टदंडत्वं घटाद्युपधायकतावच्छेदकं पृथक्कारणतावच्छेद
कासंबंधेनैकलक्षणावच्छिन्नसमानाधिकरणमेव कार्य्योपधाने प्रयोजकं न तु जन्यजनकभावा
दिरूपप्रत्यासत्तिरव्यापकत्वात् यत्तु कृतिसाध्यताज्ञानेष्टसाधनताज्ञानयोः पृथक् पृथक् प्रवृ
त्तिहेतुत्वेपि तयोरभेदस्य कार्योपधाने प्रयोजकतया कृतिसाध्यताविषयकेष्टसाधनताज्ञानत्व
फलोपधानरूपकारणतायामवच्छेदकमिति विधिवादे मिश्राणां मणिकारमतानुयायिनां
पि दृष्टानिष्टविषयकफलसाधनताज्ञानमिति साधनताज्ञानानां येषां यागपदत्वस्यानासंभव ए
कलक्षणावच्छिन्नसामानाधिकरण्यापेक्षायामेव तयोरभेदापेक्षा एवं समानमित्यभिप्रायेणासं गं.

63

गन्धेतः। न्यथाकारणयोस्तु चिरभेदरूपयोः स्तु विरुद्धजन्यजनकभावरूपयोः प्रत्यासत्तेः फलेऽपथानप्र
योजकत्वामभ्युपेत्यातिप्रसंगवारणं कृत्यसाध्यताविषयकनिश्चयत्वादिना प्रवृत्त्यादिहेतुत्वे तद्वि
षयकत्वस्य शक्यान्यत्वतानन्त्वादौ नो विशेषविशेषणभावेति निगमनाविरहे समानाकारणत्वप्रस
क्तात्तेनैतेन रूपेण पृथगेव कारणता तत्कारणतावच्छेदकावच्छिन्नानामभेदः कार्येऽपाथाने प्रयोज
कत्वस्यापि स्यादेवं चेद् दण्डचक्रसंयोगादेः कारणप्रत्यासत्तिविधया न च घटादौ पथानेऽपेक्षाप्रयोजकत्वस्तत
स्यान्वयव्यतिरेकाभ्यां तस्यापि घटादिकं प्रति कारणत्वेति चेत् सत्यं इन्धनारंभकपरमाणुष्ववह्निनोदना
त्संयोगात्क्रिया ततो विभागस्ततो द्व्यणुकारंभकसंयोगविनाशस्ततो द्व्यणुकनाशस्ततः पाकज
विलक्षणरूपवद्भिः परमाणुभिर्धूमस्य द्व्यणुकाद्युत्पत्त्यादिक्रमेण महाधूमस्योत्पद्यते समाना
धिकरणप्रत्यासत्त्या धूमहेतुरूपविशेषस्याग्निसंयोगेन जननेन च परमाणौ नोजलसंयोगरूपमार्द्र
त्वं सहकारि पृथक्तत्र द्रव्यसंयोगरूपं धूमहेतुभूतरूपविशेषस्य द्व्यणुकारंभकपरमाणुष्वेतेनन: संयोगेन ज
नने पूर्वं च वह्नित्वादिना कारणत्वे च वन्ह्यार्द्रेन्धनयोरुभयोः सत्त्वेऽप्यार्द्रेन्धनं विना धूमोत्पत्तेरनवकाशः
इन्धनारंभरहितानां रूपविशेषविशिष्टपरमाणूनामभावादिति किमार्द्रेन्धनप्रयुक्तवह्नित्वेन कार
णतयेति नैवं वह्नित्वादिनापि कारणत्वमनर्थकं सर्वद्रव्यविनाशरूपविशेषोत्पादकस्य वन्हेस्तेनैवा
न्यथासिद्धत्वात् स्वनाशेचार्द्रेन्धनस्यापि तथात्वात् अन्यथान्यापिस्वनाशाद्वाराप्रतिबंधकस्य हेतुता
प्रसंगादिति वाच्यं वह्निनार्द्रेन्धनं विना परमाणुषु रूपविशेषजननेऽपि वन्हीन्धनयोरसत्त्वे धूमानुत्पा
देनतद्धेतुतायाश्चावश्यकत्वात् न च रूपविशेषजन्यायविनिष्टवन्हेः परमाणावारंभकसंयोगात्

गदा॰
५५
75

हलादिक्रियाजन्यादावधूमोत्पत्तिनादृशक्रियाजन्यावयवविभागविनष्टेचनादृशक्रियायांभक्तसंयोगजननेआ
पतेएवंविचक्षणादिरतेणमयेधूमाः नहृचयवेष्ठसंयोगेष्ठकारणान्तरविरहात् कार्यद्रव्येनोत्पद्यतेऽ
वयवसंयोगोतांनचरमकारणत्वादित्येवाच्यं एवंसत्यवयवसंयोगसंपादकत्वात्तद्धेतुत्वस्यापत्या
व्यप्यत्वात् अच्छायाचएतादावपिदेउवेमादेरन्यथासिद्ध्याऽहेतुत्वापत्तेः नचैवंवन्हेर्हेतुत्वेऽपिइंधन
नस्यहेतुत्वमप्रामाणिकमितिवाच्यं इंधनाभावेवन्हेरनवस्थानेनतदवस्थानहानस्यापिहेतुता
याआवश्यकत्वात् जलसंयोगमात्रेइंधनत्वेरूपविशेषहानात्स्यापिहेतुतायाआवश्यकत्वात् ए
थगेवहेतुत्वेनादृइंदनकारणतायांनस्यावच्छेदकत्वेआर्द्रइंधनत्वादिनैवकारणत्वमित्यस्याप्येवंता
स्पयेयत्वआर्द्रइंधनप्रभववन्हेर्जातिविशेषस्वीकारेणहेतुतानानन्तुतादृशवन्हित्वेनेतितोऽपिविगम
नादृइतितदापिनसत् प्रामाणिकवन्हित्वजात्याकारणत्वेश्रद्धादिगतातिप्रसंगवारणसंभवेनाचोत
रजातेमरणभावादित्यलमधिकेनकारणतावगमेनेतिमूलस्यार्द्रइंधनप्रभववन्हित्वादिरूपोपाधि
नावच्छेदकत्वाभिमतरूपेणकारणतानिश्चयेनेतिनार्थः एवंतुयादृशयादृशकार्यकारणभावादौ
नोनतद्रूपावच्छिन्नस्यफलोत्पत्तिप्रयोजकत्वं नादृशकार्यकारणभावएवमेवतदित्याशयेनसमाधे
नेर्विचानरतिनन्वेवंआर्द्रइंधनप्रभववन्हित्वेयदिधूमव्यापकतानवच्छेदकंनस्यात् तदातत्कारणता
वच्छेदकंनस्यादितिव्यापकताग्राहकतर्कस्येष्टापत्यानावतारइतिकथयन्नद्रूहद्रूत्यतआह नहीति य
तः स्वरूपयोग्यतावच्छेदकतामात्रव्यापकतावच्छेदकत्वनिर्वाहायमितिनयेनार्द्रइंधनप्रभववन्हित्वादे
रन्यथासिद्धिविरूपकत्वेनस्वरूपयोग्यतानवच्छेदकत्वस्येष्टनयातदापत्तेरसंभवेनैवव्यापकता

दी॰
१०

८४

वच्छेदकत्वग्रहेण न स्यात् अपितु फलोन्मुखप्रयोजकतावच्छेदकत्वमपि तन्निर्वाह्यं तदभावापत्तेश्च
व्यापकतावच्छेदकत्वं स्वसंग्रहं यादृशान्यथासिद्ध्या आर्द्रेन्धनप्रभववह्नित्वादिकेन स्वरूपयोग्यता
वच्छेदके तादृशी यदि व्यापकतावच्छेदकत्वमपि विवक्ष्येत तदा तद्रूपसाधारणधूमाद्युत्पत्ताविसा
मान्यप्रयोजकतावच्छेदकत्वं व्यापकतावच्छेदकत्वनियतं न स्यादिति तदभावस्तदभावेन प्रसंज
येत् नदेव कारणतावच्छेदकत्वस्य व्यापकतावच्छेदकत्वे ऽन्यथासिद्धत्वप्रवेशस्याभावादित्याह
तादृशेति तथात्वात् व्यापकतावच्छेदकत्वात् न तु तथापि आर्द्रेन्धनप्रभववह्नित्वादिना वह्नेः
नोपाधितासंभवः वह्नित्वादेर्विच्छिन्नव्यभिचारस्य च धूमादिव्यभिचारव्याप्यतया आर्द्रेन्धनप्रभ
ववह्नित्वादिविशेषणस्यासिद्धिमात्रवारकतया वैयर्थ्येन तद्घटितरूपावच्छिन्नव्यभिचारस्य सा
ध्यव्यभिचारासाधकत्वादिति तत्राह तदवच्छिन्नाभावस्यैवेति विशिष्टवह्नित्वाद्यवच्छिन्नाभाव
स्येत्यर्थः अतिरिक्ततया शुद्धवह्नित्वाद्यवच्छिन्नाभावभिन्नतयाग्रहेति तेन शुद्धवह्नित्वावच्छिन्ना
भावाघटितेन विशिष्टवह्नित्वावच्छिन्नव्यभिचारेण आर्द्रेन्धनप्रभववह्नित्वेनापि धूमस्वरूपयोग्य
त्वं व्यवस्थापयतां मतमाह यत्रापि चेत्यादिना वदंतीत्यंतेन धूमोत्पादादित्यादिके आर्द्रेन्धनप्रभ
ववह्नित्वेन कारणत्वमित्यभिमते हेतुः आर्द्रेन्धनवह्नेः संयोगस्थले पृथक् कारणताम्नेपि धूमो
त्पादो निर्वहति कारणानां कारणतावच्छेदकसंबंधघटितसामानाधिकरण्यातिरिक्तपरस्परप्र
त्यासत्तेः कार्योत्पत्तावनपेक्षितत्वापि संयोगविशेषसंबंधेन धूमं प्रति तादात्म्यसंबंधेनार्द्रेन्धनस्य सं
योगसंबंधेन च वह्नेः कारणत्वे आर्द्रेन्धनतादात्म्यवति वह्निसंयोगस्य धूमोत्पत्तावपेक्षासंभवादित

उक्तं तत्संयोगे च वह्नाविति आर्द्रेंधने च वह्निसंयोगे सति तस्यापि दाहसंभवात् धूमोत्पत्तिविशिष्टस्य
तत्राह दाहप्रतिबंधकसत्त्व इति यत्र तूपलक्षणं दाहप्रतिबंधकासत्त्वेपि दाहोत्तरमेव धूमोत्पादात्त
त्रैव धूमोत्पत्त्यापत्तिरपि पृथक्कारणतामते इष्टैवाह दाहप्रतिबंधकसत्त्वे धूमोत्पत्तिलक्षणभा
वस्य धूमकारणत्वाकल्पनेनापि शक्यतेवारयितुमित्याशंकां निराकरोति लक्षणप्रतिबन्धकारण
भावस्याव्यभिचारक इत्यर्थः विशेषणेनार्द्रेंधनप्रभववह्नित्वेन प्रकृष्टेतिउभयासिद्धेरित्यर्थः दाहप्र
तिबंधकाभावानां मणिमंत्रादिविशेषाभावानां तत्कारणतेत्यर्थः अग्रे वित्यं कारणता वा इत्य
नमणिविशेषादीनामपि धूमसामान्यं प्रति नैव प्रतिबंधकतया सिद्धा इदं इति दर्शयति एकस्या
मिति प्रतिरुद्धायां दाहप्रतिबंधकमन्त्रादिसमवहितायां सत्यां न चैवमार्द्रेंधनव्यक्तावेव व्यभिचारेण
गात् सन्निहितार्द्रेंधनांतरानंतरभावानां तदिंधनप्रत्यासन्नमन्त्राद्यभावानां कारणत्वस्येति र
यत उपलक्षणं तथा हि जन्यधूमोऽप्रसिद्ध इत्यन्ये धूमे प्रतिबंधकाभावकारणत्वस्य सैककल्पनीयत
यासति प्रतिबंधके वह्न्यादिघटितसामान्यसामग्रीबलात् धूमोत्पत्तिवारणाय तत्तदिंधनाभाव
शेषसामग्रीत्वस्य कल्पनीयतयेत्यपि द्रष्टव्यं आर्द्रेंधनदाहस्य कारणतया प्रकारान्तरवारणे सम
वः एवं चेंधनस्य दाहहेतुतदारंभकत्वं तदारंभकरूपप्रतिबंधकसत्त्वेन धूमोत्पत्तिप्रयोजक
एवरूपविशेषाभावेन च धूमोत्पत्त्यापत्तिप्रयोजकरूपविशिष्टाभावेन च धूमोत्पत्त्यापत्तिरित्य
नुशयानः प्रकृष्टाप्रकृष्टार्द्रेंधनप्रभववह्न्यन्वयव्यतिरेकानुविधायितया तादृशधूमप्रतिनादृ
शदाहवह्निविशेषरूपेण हेतुतयाप्राप्तरूपकतया तद्विशेषयोरिति न्यायेन धूमसामान्यं प्रत्यपि ॐ

धनप्रभववह्नित्वेन कारणत्वमावश्यकमित्याह महती चेति आर्द्रेंधनस्य वह्निसामान्यस्य च प्रका
र्षेण धूमप्रकर्षप्रयोजकत्वाविशेषे तेन महार्द्रेंधनमहावह्न्योः तयोः सत्त्वात् तथात्वेन आर्द्रेंधनवह्न्योः पृथ
क्कारणत्वेपि नियोजेन्यजनकभावप्रत्यासत्ते धूमोत्पन्नावयवेदि तत्त्वेनार्द्रेंधनप्रभववह्निं विना धूमो
त्पत्त्यापत्तेः कथं विद्रावणसंभव इत्यतो ऽणीयसि तत्प्रभवे वह्नाविन्धनेन वर्तेतीयस्य वस्तुं विना
यत्नहीनं च धूमनिवृत्तेः प्रकर्षो महत्त्वविशेषः रूपविशेषवदारम्भकसंयोगवदवयवधूमस्त्वय
दितत्सामग्रीवशादेव धूमस्य तत्त्वनिर्वाहेण तस्य न धूमजनकतावच्छेदकत्वमन्यथा नील
घटत्वादेरपि नीलकापालजन्यतावच्छेदकत्वापत्तेः तु धूमस्यापरमाणुतत्पाकजरूपविशेष
धूमारम्भानुगुणसंयोगविशेषश्च व्यापकवह्नेरपेक्ष्यतानदन्वयव्यतिरेके महाधूमारम्भानुवयव्य
तिरेके महाधूमान्वयव्यतिरेक इति सर्वोक्तमाशयं प्रकाशयंस्तदुत्कर्षेणत्यादि मूलं धूमत्वाय व
च्छिन्नेप्रत्यार्द्रेंधनप्रभववह्नित्वादिना ऽकारणत्वेपि संगमयति तदुत्कर्षेणेतीति अथैवमपसे
पन्नेनोतरीयकमिति तेन रूपेणाहेतुत्वेपि प्रत्येककारणानां विवादव्याप्यकं तावच्छेदकताक
मित्यर्थः वायादेः प्रत्यक्षवारणायोद्भूतरूपस्यापि प्रत्यक्षे हेतुत्वं प्राचीनलोकवेति अपि त्वविष
यनिष्ठत्वेन हेतुतायामवच्छेदकत्वमेव न स्येति नयापि न प्रकृतहानिरित्याह अन्यथेनीति अन
न्यथासिद्धत्वं चाकारणत्वे तदवच्छेदकत्वे च विनाप्युपपद्यमानत्वं अन्वयव्यतिरेकाभ्यामुद्भूतरूप
वत्त्वयव्यतिरेकाधीनप्रत्यक्षविशेषाच व्यतिरेकाभ्यामुद्भूतरूपस्य समवायेन तद्धेतोरुद्भूतस्ये
ववातादात्म्येन कारणत्वेन तत्त्वेपुनरितिविषयस्य समवायतः प्रत्यक्षे विषयत्वेन तत्त्वेच्छितत्वेन हेतु

गदा. ९८ 76 नेतिवहिर्द्रव्यादिप्रत्यक्षेवहिर्द्रव्यादिरूपविषयस्यकारणत्वांतरंनिष्प्रमाणमेवकृतंउद्भूतरूपस्याव
च्छेदकत्वंनचचाक्षुषादेःप्रत्यनंतरमन्यथानुपपत्तिरेववहिर्द्रव्यप्रत्यक्षेउद्भूतरूपवत्त्वेनविषेहेतुतायांप्र
माणमितिवाच्यंउद्भूतरूपत्वेनलघ्वनोहेतुत्वेनैववतद्वारणसंभवेनान्यथानुपपत्त्यनवकाशात्तवक
तउद्भूतरूपत्वेनापिनहेतुतानाउद्भूतत्वस्यदुर्वचत्वात् नवतद्रूपत्वव्याप्यजातिविशेषः नीलत्वादि
जात्यासंकरात् नवनीलत्वादिव्याप्यंनानैवोद्भूतत्वंकारणतावच्छेदकानुगमेनव्यभिचारात् न
चनीलादिप्रत्यक्षेत्वेनीलत्वादिव्याप्योद्भूतत्वाद्यवच्छिन्नजन्यत्वानावच्छेदकमितिनव्यभिचारः नीला
दिरूपस्यविषयोपलक्षणत्वेन्यायमतेपाकजाचलादिप्रत्यक्षेव्यभिचारात्तद्विशेषणत्वेनिर्विका
ल्पकासंग्रहात् स्वविषयेनीलादिसत्वविशिष्टविषयत्वसंबंधेनप्रत्यक्षत्वावच्छिन्नस्यनीला
दिजन्यत्वेप्रज्ञानिर्विकल्पाकसंबंधाग्रहेपिनीलादिभिन्नकालीनतदाश्रयप्रत्यक्षविषयस्य
ऽःस्वसंग्रहत्वात् नापिलौकिकप्रत्यक्षविषयत्वप्रद्भूतत्वेगुणेदेलौकिकप्रत्यक्षविषयत्वायोसंनि
कृष्टाश्रयनिष्ठलौकिकप्रत्यक्षविषयतायाःप्रत्येकत्वादन्योन्याश्रयेणाश्रयप्रत्यक्षतायांतस्याः प्र
योजकत्वासंभवात् प्रत्युद्भूतंजातिनीलत्वादिव्याप्यानानैववतद्वच्छिन्नभेदकूटमेवउद्भूतत्वमिति
वेतर्हितेनरूपेणरूपस्यहेतुत्वेतावदेशनांमिथोविशेषणविशेष्यभावेविनिगमनाविरहेनका
रणतानाधावाहुल्यस्यविच्छेदोगौरवस्यावप्रसंगाद्रूपत्वेननतत्त्वावच्छिन्नात्यंताभावत्वेनचपृथक्कारण
त्वकल्पनमेवोचितं नावतोद्भूतरूपस्यवहिर्द्रव्यप्रत्यक्षव्यापकत्वमव्याहतमेवयादिवाद्भूतंच मे स
प्रत्यक्षत्वव्याप्यंभास्वरत्वविरुद्धमेव रसनेन्द्रियादिरूपस्यप्रत्यक्षतयाप्राणेन्द्रियादावपिप्रत्यक्षरूप

स्यैव कल्पनादित्युक्तेन नत्सापितद्रवत्वछिन्नाभावस्य पृथक्कारणत्वमेवोचितं अन्यथा तद्रवत्वछिन्न
मेदरूपत्वयोर्विशेषणभावे विशेष्याभिषणतावच्छेदकभावे वा विनिगमनाविरहेणकारणताद्व
यस्यावश्यकत्वात् वैच्छेदकगौरवाधिक्यात् इत्यादितदुपवर्णितप्रायमित्यर्थः उद्भूतरूपवत्पृथि
व्यादित्रयनिष्ठजातिविशेष एव बहिरिन्द्रियप्रत्यक्षजनकतावच्छेदकतया स्वीक्रियते तदभावादेव न
वाय्वादीनां प्रत्यक्षत्वानवतादृशजातेः पृथिवीत्वादिना संकरभयेन घ्राणेन्द्रियादाववश्योपेयतया
तत्तत्त्वकारणतयोद्भूतरूपप्रतिबंधकतया स्वीक्रियते तदभावादेव न वाय्वादीनां प्रत्यक्षत्वानव
तादृशजातेः पृथिवीत्वादिना संकरभयेन घ्राणेन्द्रियादाववश्योपेयतया तत्तत्त्वकारणतयोद्भू
तरूपप्रतिबंधकतया आवश्यकत्वे रूपत्वेन हेतुत्वे एव निरूपप्रत्यक्षत्वकारणसंभवे किमुद्भूतजा
त्येति वाच्यं रूपत्वेन हेतुत्वे नानाजातीयरूपवदारब्धद्रव्ये तिक्तचित्ररूपस्य नीलपीतादीनां वा क
ल्पनीतयाऽगौरवात् एतन्मते च तत्र विजातीयसंवलनप्रतिबंधेन रूपोत्पादस्यैवोपगमात्
अथवा उद्भूतत्वावच्छेदकत्वमेव प्रत्यक्षजनकं तदुद्भूतानुद्भूतत्वे चैत्वेन तादृशजातेरावश्यकतया न स्पा
र्शनापत्तिरिति वाच्यं स्पार्शनप्रत्यक्षे उद्भूतस्पर्शविशेषप्रतिबंधकतास्वीकृत्य तस्यावारणीयत्वा
त् अस्तु वा स्पार्शनप्रत्यक्षप्रयोजकमपि प्रतिबंधकत्वं व्याहृतं वा लाघवप्रयोजकजातिवाच्यजात्यनन्त्या
याद्दिमते वायोर्विशेषगुणप्यतीन्द्रियतया न देवत्वस्यातिप्रयोजकजातेरभ्युपगमेन तद्वाण्य
तानिर्वाहात् इत्याहुः मूलेवैधर्म्यकादिति वैधर्म्यशास्त्रतादृशाकार्यादृष्टिविशेषणमजन्यत्वस्य न रूपा
मरूपप्रयोजकत्वावगमेनेत्यर्थः जातवानलेनाप्यवहृतशाकाद्यारंभके यवयवेऽष्मानुपलब्धेः

गदा॰
६९
77

गतरूपमद्रूपसजातीयद्रूपगुणान्तरमुत्पाद्यते तेषामवयवैरदृष्टविशेषवशेविलक्षणं तरसमीरणसंचारिते गर्भाशयं
प्रविश्यपरस्परसंयुक्तैः शरीरमारभ्यत इति तत्रावयवरूपमद्रूपान्तजातीयरूपमुत्पद्यते न च शरीर
गतरूपाकपाकजत्वस्यरूपाकपाकजत्वेन शरीरस्यवाहेतुतयानिष्प्रमाणकत्वेपिजाटरानलपाकार्थी
नद्रूपविशेषरूपाकार्यावयवस्यानलविशिष्टविजातीयाग्निसंयोगस्यवाहेतुतयापि शरीरे तरभस्मस्यविशे
षेनाहृष्टाद्रूपस्यजाटरानलेनजननियतमशक्यत्वात्काचावयवजन्यत्वस्याभिन्नत्वेन न च शरीरे रूपामवि
शेषत्वादप्रयोजकतायां वैधर्म्यवाधितायाः प्रावरूपकत्वेन न तदनुपपत्यानस्याभिन्नत्वानन्तु यरूपमत्व
व्यापकतानिरूपयानिर्देव्यवेतिवाच्यं घटोन्मज्जने तिनद्रुटोमरकाले तद्वदसत्वापत्त्यनर्थेः प्रागनि
रुद्धजन्यत्वविशिष्टविनाशित्वं पर्यन्ताभावाधिकृतित्वे सति भावत्वव्यभिचारिणीस्यात् ध्वंसवृत्तिस्याव
ध्वंसत्वव्यतिरेक्याकारभावत्वापायोविशिष्टसाध्यव्यापकतांग्राहयति विशेषणवत्त्वेन निश्चितेपरे
विशिष्टापादकस्यानेकस्यविशेषणशंकानिवर्तकत्वात् जन्यत्वविशिष्टविनाशित्वे प्रत्यन्ताभावाधि
वृत्तित्वविशेषणस्यनिश्चयाउक्ततर्कैः सतिजन्यत्वविशिष्टविनाशित्वेभावत्वस्यभिचारशंकानिवृत्तेः
नाहृष्यायतिपरिपंथित्वाद्विनाशित्वध्वंसवृत्तित्वेस्यव्याप्तिशंकायानिवृत्त्यर्थमयनतर्कः घटादि
ध्वंसेवदेरिकिंचित्कालवृत्तिध्वंसप्रतियोगिस्यान् स्यानधिकरणत्वकालः स्यात् तद्घटप्रागभावा
नधिकरणत्वयानिश्चितस्यकालस्यतद्घटध्वंसानधिकरणत्वेव्याप्तिशंकायां ध्वंसकालस्य तद्व
टप्रागभावानधिकरणत्वे सति तद्घटध्वंसानधिकरणकालःस्यात् तद्वदधिकरणंस्यादितितर्कोन्म ॐ॰
जनप्रसंगोविरोधिपरम्परयासाध्यव्यापकताग्राहकः उक्ततर्को मूलशैथिल्यस्यशंकानिरासाय सा

यसामान्यतोव्याप्तिग्रहःप्रतियोगिनोध्वंसेतितदीयकालादावित्याभावानधिकरणकालत्वस्यतद
धिकरणत्वव्याप्यत्वादित्यर्थः तदधिकरणत्वंकालिकसंबंधेन नैविशिष्टविषयकत्वानध्वंस
स्यध्वंसानधिकरणत्वेनाभ्युपगमेकालेविषयतयातत्तानवत्तित्वान्नोत्पज्जनप्रसंगेनेष्टापत्त्यव
सरः गगनादौव्यभिचारणायापादकेकालत्वप्रवेशः यत्रकालेयद्घटध्वंसस्तद्ध्वंसोपेताभ्युप
गतेतेनापितत्रकालेतद्घटध्वंसानधिकरणत्वेनोपगतमितिकथंघटज्ञापितविषयतयानुमानेः
सिद्धसाधनादितिशंकते नचेत्यादिना प्रागभावस्यप्रतियोगिध्वंसइवेति यथाप्रागभावप्र
तियोगिनोघटादेर्ध्वंसोपितत्प्रागभावप्रतियोगिकःस्वीक्रियतेइत्यर्थः अन्यथाप्रतियोगि
नोध्वंसोपितत्कालेप्रागभावेन्मज्जनप्रसंगात् प्रागभावप्रागभावाप्रसिद्ध्यानत्प्रागभावान
धिकरणत्वगर्भापादकाप्रसिद्धावपिकालादावित्याभावत्वेनोभयसंग्राहकापादकप्रसिद्धिस्सा
लभ्यादितिभावः तद्ध्वंसोपिप्रतियोगिध्वंसध्वंसोपिप्रतियोगिनोध्वंसः प्रतियोगिकउपेयते
इतिशेषः तथाचतद्ध्वंसध्वंसाधिकरणकालस्यापितत्प्रतियोगिकध्वंसाधिकरणकत्वमेव
तिभावः एवंकल्पनयावदानुमज्जनप्रसंगोद्धारेपिलाघवेनध्वंसस्याविनाशित्वसिद्धाभावत्व
स्यजन्यानित्यत्वव्यापकत्वंघटमेवेत्याह प्रामाणिकेति ध्वंसतत्कारणधाराकल्पनात् इति
ध्वंसप्रतियोगिकध्वंसपरंपरापालइदेसेततत्प्रतियोगिपरंपरायाप्रतियोगितानियामकाकार
णतानांचकल्पनामपेत्यर्थः इनेनतत्वं विनाशित्वंइंचिनत्वादितिलाघवेत्यादि अथविना
शिप्रतिजन्यभावत्वेनएककारणत्वस्यजन्यत्वेनभावत्वेनकारणताद्वयस्यकल्पनातोलाघ

गदा॰
१०
78

वाजन्यत्वरूपमाणप्रतियोगिनां कारणत्वकल्पनेन तदवच्छिन्नमात्रस्य च लाघवात् ध्वंसप्रतियोगि
तानियामकत्वसिद्धेः ध्वंसेपि तादृशसामान्यतः प्रामाणिकत्वात् ध्वंसप्रतियोगिकध्वंसधारायाः प्रा
माणिकत्वमेवेति त्वप्रामाणिकेत्यसंगतं प्रत्यवदंति प्रागभावप्रतियोगित्वरूपजन्यत्वापेक्षयाल
घीतिसजातिरूपसत्त्वेनैव प्रतियोगितासंबंधेन ध्वंसं प्रति तादात्म्यसंबंधेन हेतुताकल्पनेन तद
वच्छिन्नं च यदिता च सामग्रीनध्वंसे कालिकसंबंधेन सत्त्वं कारणतावच्छेदकं समवायेन तत्र वि
निगमनाविरहादपि समवायेन तदवच्छिन्नहेतुतायां निष्प्रत्यूहतया ध्वंसे सामग्रीविरहस्य
स्वपरत्वात् न च समवायेन संबंधेन सत्त्वावच्छिन्नस्य हेतुत्वे नित्यानां द्रव्यगुणानां नाशः स्या
दिति कालिकसंबंधेन सत्त्वावच्छिन्नजन्यमात्रस्य कालोपाधित्वाभावेन प्रागभावप्रतियोगित्वेन
हेतुतावाच्येति ध्वंसेपि नन्वसत्त्वेन तस्यापि नाशो भवेदिति वाच्यं प्रतियोगिमात्रस्य प्रतियोगिता
संबंधेन कार्योत्पादकसामग्रीत्वे जन्यत्वेन प्रतियोगिनो हेतुत्वेपि द्वितीयेन तृतीयस्तृतीयेवात्
णस्यापि नाशः स्यादिति द्रव्यादिनाशे विशेषसामग्र्येन रसस्य सामग्र्येन रसस्य सामग्र्येन रसस्यावश्य
कल्पनीयत्वात्तदभावादेव नित्यद्रव्यादेर्नानाशावारणसंभवे समवायेन सत्त्वायाश्रयेपि प्रति
योगिनिष्ठकारणतावच्छेदकत्वसंभवात् तथा हि आश्रयनाशनाश्यद्रव्यस्य नाशे समवा
यिकारणविजातीयसंयोगनाशो विशेषसामग्री आश्रयमात्रजन्यद्रव्यनाशे व्यभिचारणाय
आश्रयनाशनाश्यत्वकार्यतावच्छेदके नाशप्रतियोगिविशिष्टेन आश्रयनाशनाश्यत्वेवस्त
प्रतियोगिसमवेतत्वकालिकविशेषणताभयसंबंधेन नाशविशिष्टत्वं प्रागभावमात्रेनद्रव्या

से॰

नाश्यत्वमेव कार्यत्वावच्छेदकं तन्मते सर्वेषां समवायिकारणनाशादेव द्रव्यनाशात् कारणतावच्छेद
कप्रत्यासत्तिः स्वप्रतियोगिजन्यत्वं तेन च संबंधेन समवायिकारणनाशस्य गगनादेरभावान्न तन्नाशा
पत्तिः आश्रयनाशकालस्यापि गुणकर्मणोर्विशेषणमाश्रयनाशो हेतुः संयोगविभागकर्मादिनाशे
व्यभिचारवारणाय आश्रयनाशकालस्यापित्वं कार्यतावच्छेदककोटौ प्रतियोगिविशेषणं तदर्थश्च
स्वप्रतियोगिसमवेतत्वकालिकविशेषणतोभयसंबंधेन नाशविशिष्टत्वं आश्रयनाशस्य नाशत्वेनैव
हेतुता स्वप्रतियोगिसमवेतत्वं प्रत्यासत्तिः तादृशसंबंधेन नाशस्तु न नित्यगुणे तदाश्रयस्यापि नित्यत्वे
न नाशाप्रतियोगित्वात् आश्रयनाशनाश्यरूपरसगंधस्पर्शनाशे विजातीयतेजःसंयोगरूपः पाको
हेतुः कारणतावच्छेदकसंबंधः समानाधिकरण्येन न संबंधेन तस्य पार्थिवपरमाण्वेकत्वादिष्वसत्त्वे
पि रूपादिनाशे तादात्म्यसंबंधेन रूपत्वादिनापि हेतुत्वात्तेन संबंधेन तेषामेकत्वादिष्वसत्त्वात् न पाक
घटितसामग्रीबलाद्धि नाशायति रूपाद्यात्मकप्रतियोगिनां पाकसहकारित्वाउपगन्यमेजन्यत्वेन प्र
तियोगिनां हेतुत्वेपि पाकाद्रूपादिनाशसमये तत्समानाधिकरणविभागादिरूपजन्यगुणानां विनाश
प्रसंगात् आश्रयनाशनाश्यसंयोगादिनाशे स्वावच्छेदकावच्छिन्नत्वस्वव्यापकत्वोभयसंबंधेन विभागो
हेतुः तादृशसंबंधेन विभागो न नित्यगुणे न वा नत्र तत्सहकारिसंयोगरूपप्रतियोगिना तादात्म्यसंबंधेन प्रत्या
सत्तिः एवं विभागनाशे स्वजनकसंयोगनाशजनकत्वसंबंधेन संयोगो हेतुः कर्मनाशेपि जनकत्वसं
बंधेन संहेतुः पूर्वसंयोगनाशोत्तरसंयोगजनकत्वस्तु रत्नादिसाधारणमेव तत् तदाश्रयजन्यद्रव्यसाधा
रण्यात उत्तरसंयोगाद्युत्तमाभावावारणाय तन्नाशापि विभागकर्मरूपप्रतियोगिनोः सहकारिता याश्रावयव्यकत्वा

गदा. ७१ 79 स्तनपवेस्वरक्तानादिश्यामहेतिनस्थलीयसामग्र्याश्येवाङ्कुरजन्यत्वेन नाशोपक्तावङ्कुरनाशः स्वप्रतियोगिज
न्यत्वसंबंधेन हेतुनिमित्तेतेन संबंधेन नाशायत्वान्नातिप्रसंगः श्यामत्वनादिरूपं योग्यविशेषविशेषगुण
नाशं स्वपूर्वत्वस्वसमानाधिकरणोभयसंबंधेन विशेषगुणत्वेन हेतुनाशस्वपूर्वत्वं च कालिकसंबंधेन
स्वप्रागभावाधिकं करणत्वेन गौणिकत्वाद्दोषाश्यामादिरूपविशेषगुणस्य समानाधिकरणत्वेपि कालिक
संबंधेन न तत्प्रागभाववत्त्वमहाकाले च तत्सत्त्वेपि न सामानाधिकरण्यमिति तत्र हेतुलातन्नाशापत्तिः व
स्तुतस्तु नाशापितादात्म्येन तादृशप्रतियोगिनां सहकारित्वमावश्यकं अन्यथा संयोगादिनाशादावपि त
जन्यतावच्छेदकावच्छिन्नापत्तेः तथा च नित्यनाशलिंबादपि न हेतुत्वसामग्री विलंबः एतेनापेक्षाबुद्धे
रपि त्वनीयत्वेन विनाशस्यापि शरीरमणिना सह कृतत्वात् शाशादिनाशे च न तत्समानकालीनतदपदार्थेना
शापत्तिनाशत्वेन हेतुः कालिकसंबंधेन स्वप्रतियोगिप्रत्यासत्तिः नाशपत्वमेव जन्यत्वावच्छेदकं जन्यमा
त्रस्य कालोपाधितया सर्वत्रैव नाशप्रतियोगिनितादृशकारणसत्त्वेन व्यभिचारानवकाशात् तथा च
तादृशकारणबलान्महाकालस्य नाशापत्तिरिति परास्तं घटादेरपि मनकालपदार्थेना शस्योत्तरसंबं
धेनाद्वितीयक्षणे सत्त्वात् तृतीयक्षणे तन्नाशापत्तिवारणाय श्यामादीनां तादात्म्यसंबंधेन तत्सहकारि
तायाश्चावश्यकत्वात् तत एव नातिप्रसंगनिर्वाहात् न चैवं सत्त्वेन हेतुत्वमयान्नर्थकं सत्त्वाशून्यानां जा
त्यादीनां नाशस्योक्तविशेषसामग्र्यभावादेव वारणसंभवादिति वाच्यं तत्र स्वप्रतियोगिसमवेतत्वसंबं
धेन नाशहेतुभूताश्रयनाशस्य एकत्वपरिमाणादावि वजातावपि सत्तेन तादृशविशेषसामग्रीबलात् गं.
स्यानाशवारणाय सत्त्वेन प्रतियोगितां कारणत्वस्यावश्यकत्वात् एकत्वादिनाशे एकत्वादीनां विशे

धकारणतायां नावच्छेदकत्वात् नाशप्रतियोगिनां सर्वेषां स्वनाशे विशिष्य हेतुत्वेपि तद्विशेषयोर्विला
दिनिगमकबलात् सत्त्वेन तेषां सामान्यहेतुतायां वच्छेदकत्वाद् अन्यथा तद्विशेषसामग्रीविरहेद्रू
स्यजात्यादेः प्रतियोगितया नाशसामान्याजनकत्वादप्रयोजकत्वकल्पनायां गौरवापातात् अन्यथा
तत्तद्व्यक्तिस्थलीयविशेषसामग्र्यभावेन सर्वत्र सामान्यकार्य्योत्पत्तिप्रसंगवारणासंभवेन सामान्यका
रणमात्रोच्छेदप्रसंगात् अथ नाशकत्वावच्छिन्नं प्रति स्वप्रतियोगिसत्त्वसंबंधेन नाशत्वेन हेतुत्वे
ताहृशसामान्यकारणाभावादेव तज्जन्यादावाद्यनाशापत्तिरिति सामग्रीतो नाशापत्तिः यद्विशे
षयोर्विलयादिनियमस्याप्रयोजकत्वे इति चेन्न प्रागभावस्य कालोपाधित्वाभावेन तत्र कालिकसंबंधेन
प्रतियोगिसत्त्वाभावात्तत्राव्यभिचारणाय समानकालीनत्वं न देयं नाशस्य स्वप्रतियोगिवृत्तित्व
संबंधेनैव नाशत्वावच्छिन्नं प्रति हेतुतायाः वक्तव्यतया प्रागभावेपि ताहृशसंबंधेन तस्य सत्त्वान्न
व्यभिचार इति जातावपि ताहृशसंबंधेन तस्य सत्त्वात् सत्त्वेन हेतुतां विना तन्नाशापत्तिवारणासंभ
वात् यद्वा समवायिकारणनाशस्यैव द्रव्यनाशकतामते अवयवनाशात् समवायिकारणसंयो
गनाशोत्पत्तिक्षण एव द्रव्यनाशस्यापत्तिवारणाय उत्पत्तिक्षणकर्मणो द्रव्यान्यत्वेन कारणतां कल्पयित्वा
तदवच्छिन्नस्याश्रयतांशसहकारितां वाच्या तथा सति च कारणतावच्छेदकगौरवलाघवेन क्षणक
र्मणो द्रव्यवृत्तिजातिविशेषमङ्गीकृत्य तेन रूपेण तयोराश्रयनाशसहकारित्वं भवितेन ताहृशस
हकारिविरहादेव तज्जातिनाशापत्तिरिति व्याभाव्यते माऽस्तु ह्यसत्त्वेन हेतुत्वं ध्वंसध्वंसापादकसा
हकसामग्रीतः अर्भितद्धर्मेवचरमसंयोगानां विनाशोऽस्त्विति विशेषनाशस्य कालिकसंबंधेन हेतु

गदा॰
११
80

न्त्वात्स्वध्वंसेऽपि सत्त्वात् तद्धानाङ्गीकारे वारितेति चेन्न विजातीयसत्त्वावच्छिन्नस्यैव वातत्सहकारितोपग
मेऽतद्व्यापत्त्यभावात् चरमध्वंसातिरिक्तध्वंसस्य कालोपाधितया नियतत्रिकतया तत्कालिकसंबंधेन
दृष्टविशेषणानामसत्त्वाच्चरमध्वंसस्य तत्पदार्थेन नाशरूपकारणभावेन नाशायतेरयोगादिति दिक् ॥ ए
तद्विनि नययोर्मिथः कार्यकारणभावस्तयोरपि साध्यसाधनयोः प्रदर्शितत्वात् कार्यकारणयोरेवे
ति मूलार्थं कथयन् संगतिः तथाहि ष्पणामरूपेण पाकारंभकावयवसमवेतत्वरूपेण पाकजत्वेन
कारणं ग्रंथितत्तादृशावयवरूपमेव प्रत्यक्षविषयत्वरूपं प्रत्यक्षत्वमपि नोद्भूतरूपकार्यं ऽपि तु मत
विशेषप्रत्यक्षमेव तत्कार्यं परेत्र प्रदर्शितेषु धूमाद्यैधनप्रभवश्चयोरेव कार्यकारणभावः तादृश
वन्हेः तादृशवन्हित्वेनैव कारणत्वमिति निर्दिष्टत्वादिति अतः कार्यकारणयोरिति व्याचष्टे कार्यकारण
योरेवेति प्रमाणक्रोडीकृतत्वं प्रमाणविषयत्वेन तथा च एक कारणेनाविशिष्टविषयतः एतत्प्रमा
विषयताश्रययोरुभयोरेवेत्यर्थः तेन कार्यकारणभावविषयकसमूहालंबनप्रमाविषयत्वस्य
केवलान्वयित्वेऽपि न व्यवच्छेद्याप्रसिद्धिः तथा त्वं च कार्यकारणयोः कारणत्वकार्यत्वावच्छेदकयोः
कार्यकारणतावच्छेदकयोः कार्यतावच्छेदकयोः कार्यतावच्छेदकस्यापि कारणतावच्छेदका
व्यापकता प्रविष्टत्वेन निरुक्तप्रमाविषयतावत्त्वात् पाकारंभकावयवसमवेतस्य वावयवशृणामरू
पनिष्ठकार्यभूतशृणामरूपकारणतावच्छेदकसंबंधत्वात् प्रत्यक्षविषयत्वस्य च रूपस्य रूपवत्तावाका
र्यतावच्छेदकसंबंधत्वात् इति ध्येयं मूले च कारणभावग्राहकप्रमाणं परंपरया उपनीतमित्यर्थः श्रु र्म॰
चांदृश्यत्वपृथिवीत्वादीनां ग्रहणलनं कैनेति पृथिवीत्वं पादिद्रव्यत्व सन्न्यवृत्ति स्यादिति तर्कः पृथि

८०

वीत्वादेर्द्रव्यत्वादिव्यभिचारग्राहकः तत्र द्रव्यत्वशून्या पृथिवी जन्यगुणशून्या न भविष्यतीत्यादिव्यभिचारसं
काविरोधिनीं तां च जन्यगुणादिद्रव्यत्वव्यभिचारी स्यात् द्रव्यत्वावच्छिन्नसमवायिकारणजन्या न स्या
दित्यादितर्केण विरहात् तत्र चेत्प्रापतिशंकाविरोधितया जन्यसत्त्वद्रव्यत्वादिना कार्यकारणभावग्राह
कप्रमाणमुपयुज्यते प्रयतते केचनेत्यापत्तिसंभवः पृथिव्यादेः संयोगादिरूपगुणशून्यत्वे मूर्तत्वानुपपत्तेः
मूर्तत्वादेर्विभुसंयोगादिव्याप्यत्वादिति एवमन्यत्रापि कार्यकारणभावस्योपयोगित्वम् एवं कार्यकारण
भावग्राहोपजीवने प्राप्तिकं बोध्यं एतेन तस्यैव व्याघातकत्वेन न हेतुव्यभिचारसंशयाधायकत्वमिति नि
संदिग्धोपाधिरपि सद्धेतुनिर्मूलस्य यथास्थानाश्रमादिपपतेन चित्यादिना संदिग्धोपाधेस्तत्रवदिति व्यभिचा
रशंकाधायकत्वं दूषितं तः साध्यव्यापकत्वेन संदिग्धं साधनाव्यापकधर्मान्तरमिवेत्यर्थः व्यभिचारशंका
माधायत इति व्याप्यसंशयात्मकसाध्यधर्मिकसाधनाव्यापकव्याप्यत्वसंशयद्वारा साध्ये साधनाव्याप
कत्वशंकां विशेषणसंशयात्मकस्वधर्मिकसाध्यसाध्यव्यापकत्वसंशयाधीनसाधनधर्मिकसाध्यव्या
पकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वसंशयरूपव्याप्यत्वसंशयद्वारा साधनधर्मिकसाध्याभाववद्वृ
त्तित्वशंकां वा जनयतीत्यर्थः तादृशशंकाया जनने स्वव्याघातकत्वमूलीकबाधकमुद्रेति स्वव्या
घातकत्वं चेति निराकृतमेवेति नाऽनेन सर्वानुमानसाधारण्यमित्यादिनेति शेषः अत्र कश्चिदुपाधि
र्भविष्यतीति शंकेति विशेषणतदुपाधितावच्छेदकमनुल्लिख्य एतत्साध्यव्यापकः साधनाव्यापको न वा
एतत्साधनाव्यापक एतत्साध्यव्यापको न वेत्यर्थः शंकापिशाचीत्वात् दुरुच्छेदत्वात् ए
तेन तस्योपाधित्वशंकापीति शंकापिशाचीत्वान्न व्यभिचारशंकाधायकत्वमुपयुज्यते अत्र व्यभिचारशं

गदा. ७२ 81

कासामग्र्यास्थलांतरेऽलभ्यायाः सत्वेन तच्छंकायाउद्भवविरुद्धद्वयस्योद्भावनेनानेहेतव्यभिचारसंशयाधायक
त्वमित्यस्याउमितिविरोधिव्यभिचारशंकानाधायकत्वात् एकत्वाणेयेन प्रकारांतरेणाहूषकत्वशंकते त
दाहितापिचेतितस्योपात्तशंकाहितात्वेत्यर्थः पदेव्यभिचारशंकेवेतिपदेसाध्यसंदेहदशायामप्युमि
त्यनुत्पादप्रसंगांतभाविनव्यभिचारशंकायायानप्रत्यवेधिकेत्यर्थः नप्रतिबंधिकव्याप्तित्वानेनव्यभिचार
निश्चयएवेतिमतेनव्याप्तित्वानविघटनद्वाराव्यभिचारसंशयस्याउमितिविरोधित्वमतेव्याप्तित्वानप्रति
धकताया पदेविशेषनिर्यंत्रितत्वाभावेन तत्रापतीयव्यभिचारसंशयव्यावर्तनायोगात् सामान्यतः प
दात्वस्यकेवलान्वयित्वात् अन्यथाउक्तव्यभिचारशंकायाअपिप्रतिबंधकत्वनिरूपणाधीतिपदेतरत्वतत्स
मशीलानिदिशोपाधिविरहविशिष्टसहचारभंगायतिमात्रबलेनप्रद्युम्नागगनेपरिमाणवत्वद्व्याप्
त्वात् वदवदित्यनुमानानानांउच्छेदायतेरित्यर्थः तत्रपदेसाध्यसंदेहेनतदंतर्भावेनव्यभिचारशंकायाः
पदेतरत्वोपाधित्वशंकाहितव्यभिचारशंकायाअसंभवादितिभावः नचतत्रव्यभिचारणादकानिरू
पाधित्वसंगमप्रसंग एवव्यभिचारशंकानिवर्तकइतिनोक्तानुमानविलयप्रसंगइतिवाच्यं अनोपाधि
कत्वस्यइतिनिश्चयतयातत्रंगायतेऽरयोगात् वलीतेनउपाध्येनतग्रहसहितव्यभिचारग्रहमात्रसमवधा
नस्यैवविवक्षितत्वात्तयानत्प्रसंगनेअप्रथमपदेदूषयति संदिग्ध इतितृपवेतिसाध्यव्यापकतासंशयार
विषयत्वयथमेवेतत्यर्थः प्रतिबंधकत्वासंभवादिति नहिप्रयोजनादितिभियासामग्रीकार्यंनाजयती
तिन्यायादितिभावः द्वितीयपदंदूषयति व्यभिचारज्ञानत्वेनचेतिकारणविशेषजन्यत्वादिकमिति गं.
पदेतरत्वोपाधित्वसंशयायावदितिसामग्रीजन्यत्वादिकंतत्संशयाजन्यत्वादिकंचेत्यर्थः आदिपदात्स

८१

व्याप्यभावांशे संशयाधायकत्वपक्षीयव्यभिचारसंशयाधायकत्वपरिग्रहः नन्वद्रव्यत्वादौ पक्षतानभावेन व्यभिचार
संशयेऽपि तस्य परिमाणाद्यनुमापकतयात् इत्यत आह उपपत्तिरेवतद्ग्राह्यान्यत्वस्य प्रतिबंधकतावच्छे
दककोटिप्रवेशे मानमित्यत आह कथमन्यथेति अन्यथा साध्याभावांशे संशयरूपस्य व्यभिचारसं
शयस्य पक्षतानभावेन व्यभिचारसंशयस्य वा प्रतिबंधकत्वे साध्याभावांशे संशयात्वस्यैव निवेशोऽकर
वान्हिसंयोगमात्रपक्षानुमानादावपि प्राप्तिसिद्धापत्तिः संयोगांतरेऽपि कार्यो न तादृग्लक्षणत्वेः संदिग्ध
नया साध्याभावांशे निश्चयरूपव्यभिचारित्वानां संभवात् पक्षीयव्यभिचारसंशयान्यत्वनिवेशो न
तदापत्तिः पक्षभिन्नसंयोगांतरे व्यभिचारसंशयस्य प्रतिबंधकसंभवादित्याशयेनाह सर्वसंयो
गो वेति संयोगे संयोगत्वधर्मोऽतिरिक्तधर्मस्याभावात् प्रत्यक्षत्वमतिरिक्तत्वप्रतियोगिविशेषणेन तथा
मतिसाध्येवंतो द्वित्यतयात्तत्र विशिष्टभेदसत्वेन तत्सामानाधिकरण्याः संदिग्धत्वान्नवाधः पक्षातिरि
क्तरूपादौ व्यभिचारस्य तत्संशयस्य वा वारणाय संयोगत्वधर्मे त्रैकालिकसंबंधेन प्रसिद्धानो द्वित्यधर्म
वत्तयासिद्धसाधनवारणाय समवायीति इत्यनोऽनुमानात् नगुणादिसिद्धिरिति पक्षेनरत्वापत्तिरि
त्नेनश्रोपाधित्वात् इहेतो भवन्मते नासिद्धप्रतिबंधकता व्यभिचारत्वानाभावादिति भावः शंकतेनि
रुपाधित्वेपीति अप्रयोजकत्वात् हेतोर्गमकताप्रयोजकरूपशून्यत्वात् अप्रयोजकत्वे अप्रयोजक
त्वस्य तत्त्वयापि स्वीकारे इतरेषां द्रव्यत्वादिहेतुकपरिमाणादिसाधकानुमानानां तथात्वात् अप्र
योजकताया आवश्यकत्वात् तथा च तादृशानुमानानुपपत्तेः व्यभिचारत्वानप्रतिबंधकतायां वि   ॐ.
शेषणेन तत्प्रवेशस्यासंभव इति भावः उक्तपक्षसाधकानुमाने सिद्धांतिमतासिद्धप्रतिबंधकता

गदा०
१७
84

व्यभिचारशंकाविरहं स्पष्टयति अत्रैवेति उपपन्नातिरिक्त इति पन्नातिरिक्तो किं धर्मेन भावेनेत्यर्थः सं
योगातिरिक्ते सर्वैरेव समवायसंयोगधर्मातिरिक्तधर्मे समवायितानुपसाध्यस्यानिश्चितत्वादितिभा
वः एतेनरत्वादेरनुपाधित्वेपि सिद्धानिनागगणपरिमाणवत् द्रव्यत्वादित्यादिनुमानस्यनिरूपणा
यित्वाभिमानेनिरावरोतिकत्वायमितिकः उत्सितोव्याप्तोहेत्वमः दृष्टान्तरेति सूत्रकेत्यर्थः एतस
पक्षैकदेशा वृत्तिधर्मेति घनत्वनत्वघटान्यतरत्वादित्यर्थः सपक्षैकदेशावृत्तिधर्माणां घटत्वादीनां उपा
धित्वं संदिग्धोपाधित्वे पक्षे साध्यव्यापकत्वसंशयसङ्कीर्णत्वात् नन्वत्र व्यभिचारशंकायाः शंतेव
पकत्वे पर्वतो वह्निमान् धूमादित्यादावपि तत्संभवेन धूमादिनापि वह्न्यादिसिद्ध्यभावप्रसंग इत्य
तआह इत्यंवेति तत्र तत्र व्यभिचारादिग्रहे एव तथाम इति प्रकृतेहेतुसाध्ययोर्व्याप्तिग्राहकतर्कसत्त्वे
न धूमादौ वह्न्यादिव्याप्त्यादिनिश्चयात् तत्र न तस्य व्यभिचारसंशयः योगः तादृशव्याप्तिनिश्चयस्य तत्सं
पादप्रतिबंधकत्वात् इत्यवत्याम इत्यर्थः आहुरित्यनेनेतत्संप्रदायानभिरोधेन नइ ह्मावनेदुर्वार इति
स्वरसः सचितः अनुकूलतर्काभावउपाधितानोपजीव्य इति न दूषकत्वेवापपताउपाधेर्दूषक
त्वनिर्यत्किंचिकामिति पूर्वपक्षेत्योपाध्यावेवाद्येन्यादिना मूलकृता उपाधेर्दूषकत्वाव्यवस्थापनेन संग
च्छते व्यभिचारिणी साध्यतदभावसहचारयोरविरोधायोपाधेरवश्यसत्त्वाया दूषकत्वाव्यवस्थाप
कत्वादित्यत आह उपलक्षणमेतदिति यदुक्तं तस्यैव उपाधेर्दूषकत्वसाधकत्वपरमेतदित्यर्थः नतु
यथाश्रुते उपाधेरवश्यंभावस्यतत् दूषकत्वासाधकत्वे स्वतानन्यार्थमित्याह व्यभिचारिणीतिःवश्यंभा
वमात्रेतिमात्रपदेनतत् दूषकता साधकत्वव्यवच्छेदः अनुकूलतर्काभावे उपजीव्यतायास्तु दूषकता

८२

योविनिगमकत्वेनोक्तत्वात् तन्निराकृत्य उपाधेर्दूषकतां व्युत्पादयति उपजीव्योपजीवकाभावो
ह्यौति प्रकृत इति शेषः ऽसंभवात् अनुकूलतर्काभावस्य ईन्धनादिकारणत्वासंभवात् ऽकिं वि
स्तरः संभवन्नपि दूषकतायामविनिगमक उभयोरेव प्रत्येकं परस्परव्यापकत्वादिति भावः वि
षयस्य व्याप्यव्यापकभावेपि व्यापकस्यातानदशायां व्याप्यत्वानमत्वेपि ऽज्ञमित्यज्ञमित्यनुत्पादि
निर्वाहाय व्याप्यत्वानस्यापि दूषकतायामावश्यकत्वात् उपाध्यनुकूलतर्काभावयोस्तोयमनयो
विरोधित्वे तयोर्व्याप्यव्यापकभावः स्वतरामविनिगमकत्वमाह विशेषणतास्विति दूषकताया
मित्यथा किंचित्करत्वमुपपद्यते नानाद्येति वस्त्वर्थः अनुकूलतर्काभावः स्वरूपसन्नेव व्याप्य
ग्रहप्रयोजकः उपाधिस्तु ज्ञायमानः पर्ववीयोधित्वज्ञानदशायां ऽनुकूलतर्काभावस्य स्वरूपसतो
नियततयातनपव्याप्यग्रह निर्वाहकत्वाद्यर्थेनैतन्न प्रयोजकत्वमित्याशंकां निराकरोति नैव
न्यादिना भाविनाप्यनुकूलतर्कमिति तथा वा नुकूलतर्काभावेन तत्स्वयोर्व्याप्यग्रहप्रयोजकत्व
धित्वव्यभिचारग्रहद्वारा सचोपाधिज्ञानमपेक्षतनरतिनद्वारोपाधेर्दूषकत्वं निरावाधमेवेति भा
वः पर्वतो वह्निमान् धूमादित्यादौ हृदादौ साध्याभावो व्यापकव्यतिरेकप्रयोगेन वह्निसाम
ग्याहावतिव्याप्तवारणायाहात्रेति पदेत्यह्याहत्या साध्येति पक्षेनेतरत्वव्यवनिहतिः अन्वयनविषयो
ऽभावः प्रतियोगित्वमाख्यानार्थः स्तीयायाः स्वरूपयोग्यत्वमर्थः तथा च यदभावप्रत्युक्तपद
विशेष्यकोन्वयनविषयभावप्रतियोगिसाध्यपदविशेष्यकसाध्याभावोन्वयनयोग्याभावप्र
तियोगीयरत्वार्थः पर्यवसितः तादृशायोग्यतावपदहूतित्वचदिनेत्याशयेन व्याचष्टे पदनिष्ठे

७०।

गदा०
८३
३५

ति पक्षनिष्ठाबाधकत्वाद्उन्नायकव्याहतिविशेषणं उन्नायकत्वं व्याप्यत्वमेव तथा च पक्षवृत्तिना व्यवहि
तत्वेण साध्याभावव्याप्येन योभावस्तत्प्रतियोगित्वमित्यर्थः तेनायोगोलकं धूमवद्वह्नेरित्यादौ
पक्षनिष्ठसाध्याभावस्य हृदादावुन्नायकतत्पदेन हि हेतुरिति तिनाद्यः विवरणाभावेसाससद्विपा
लहेत्यादौ व्वेदोतुरोधादिना हि हेतुत्रिदर्शनात् न्याये तु प्रयुज्यमाने प्राथमिकस्य न्यायस्य तथा साध्य
त्वेपि न तत्र हि हेतुः सकलसामग्रीप्रत्यापनेन व्याप्तिपक्षधर्मतात्वेपि तत्पदस्याहि हेतुस्य साधकतासंभ
वः महत्त्वविशेषेणाग्रदर्शनादेतद्विस्पष्टयितुं भवमतिनोयाथार्थ्यं प्रयोगादर्शयते हेतुत्रय
त्वस्वबोधितनानाधर्मिणामेकेन तत्पदेन परामर्शोयोग इत्यारांकां निरस्यति विद्रूपेति महा
नसमहानसान्यत्वादिविभिन्नप्रकारेणेत्यर्थः तत्पदेन परामर्शात् तत्पदेन परामर्शासंभवात्
तत्पदस्य परामर्शकतायोरिक्त्वात्त्रिविरोधे हि हेतुः तत्पदेनापि तव हेतुर्भिन्नोयासंभवात त्रु
त्रिविरोधप्रवनस्याभित्याकाशायामाह तद्धिस्थाप्यत्वादिति तद्धिप्रकारावच्छिन्नेषु सर्वे
कपाद्येरित्यर्थः त्रुत्यत्रिविरोधं दृष्टान्तेन द्रढयति यथेति ॥ इत्यवयवटिप्पणी समाप्ता ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥